This is a digital copy of a book that was preserved for generations on library shelves before it was carefully scanned by Google as part of a project to make the world's books discoverable online.

It has survived long enough for the copyright to expire and the book to enter the public domain. A public domain book is one that was never subject to copyright or whose legal copyright term has expired. Whether a book is in the public domain may vary country to country. Public domain books are our gateways to the past, representing a wealth of history, culture and knowledge that's often difficult to discover.

Marks, notations and other marginalia present in the original volume will appear in this file - a reminder of this book's long journey from the publisher to a library and finally to you.

Usage guidelines

Google is proud to partner with libraries to digitize public domain materials and make them widely accessible. Public domain books belong to the public and we are merely their custodians. Nevertheless, this work is expensive, so in order to keep providing this resource, we have taken steps to prevent abuse by commercial parties, including placing technical restrictions on automated querying.

We also ask that you:

+ *Make non-commercial use of the files* We designed Google Book Search for use by individuals, and we request that you use these files for personal, non-commercial purposes.

+ *Refrain from automated querying* Do not send automated queries of any sort to Google's system: If you are conducting research on machine translation, optical character recognition or other areas where access to a large amount of text is helpful, please contact us. We encourage the use of public domain materials for these purposes and may be able to help.

+ *Maintain attribution* The Google "watermark" you see on each file is essential for informing people about this project and helping them find additional materials through Google Book Search. Please do not remove it.

+ *Keep it legal* Whatever your use, remember that you are responsible for ensuring that what you are doing is legal. Do not assume that just because we believe a book is in the public domain for users in the United States, that the work is also in the public domain for users in other countries. Whether a book is still in copyright varies from country to country, and we can't offer guidance on whether any specific use of any specific book is allowed. Please do not assume that a book's appearance in Google Book Search means it can be used in any manner anywhere in the world. Copyright infringement liability can be quite severe.

About Google Book Search

Google's mission is to organize the world's information and to make it universally accessible and useful. Google Book Search helps readers discover the world's books while helping authors and publishers reach new audiences. You can search through the full text of this book on the web at http://books.google.com/

BERKELEY
LIBRARY
UNIVERSITY OF
CALIFORNIA

Provided by
The Library of Congress
Special Foreign Currency Program.

Vol. XXI Part I (Half Yearly)

JOURNAL OF THE KERALA UNIVERSITY ORIENTAL RESEARCH INSTITUTE AND MANUSCRIPTS LIBRARY

EDITOR

Dr. K. RAGHAVAN PILLAI

A. D. 1976 / M. E. 1152
S. E. 1898

Licence No. 664, dated 3-9-1949

Vol. XXI Part I (Half Yearly)

JOURNAL OF THE KERALA UNIVERSITY ORIENTAL RESEARCH INSTITUTE AND MANUSCRIPTS LIBRARY

EDITOR

Dr. K. RAGHAVAN PILLAI

A. D. 1976 / M. E. 1152

S. E. 1898

Journal of the Oriental Research Institute and Manuscripts Library. (Half Yearly)
Vol XXI-Part I.

Editor,

Dr. K Raghavan Pillai,
B A. (Hons). Ph. D. (Lond)
Director and Professof of Sanskrit,
O. R. I and Mss. Library. University of
Kerala, Trivandrum-17.

Published in November 1976.
No. of Copies. 250
Printed at Vijnanabhavan Printers Trivandrum.9
Annual Subscription Rs. 10/-

Publishers
O. R. I and Mss. Library, University of
Kerala, Trivandrum-17

PK
2511
T8
v.21

CONTENTS

PART-A

		PAGES
१	नारदीयस्तोत्रम् (गद्यम्)	1—2
२	सर्वमतसंग्रहः	3—30
३	गजेन्द्रमोक्षप्रबन्धः	31—44
४	उडुजातकोदयः	45—73
५	कृत्यरत्नावली	75—134

PART-B

1	Some Letters of Mm. T. Ganapati Sastri.	1—28
2	Daṇḍin's Version of the Story of Kadambari. Dr. Man Singh.	1—8
3	A Short Note on Telugu Prosody N. V. Krishna Warrior.	1—18
4	The role of mathematics in Physics and its absence in the Vaiśeṣika Sutrā and the Prasastapāda Bhāṣya. Dr. Kadambari Haravu.	1—10

CONTENTS

PART-A

... (गद्य)

31

75—1...

PART-B

1. Some Letters of M... Sastri — 1—...
2. ... of the ... of Kadamb... — 1—...
3. A Short Note ... Prosody ... V ... — 1—18
4. ... Mathematic... in Physics and its ... in the Vaisesika Sutra and the ... Dr. K... — 1—10

नारदीयस्तोत्रम्* [गद्यम्]

जयतु भगवानयं जगत्त्रयपवित्रीकरणचणविचित्रतरचरित्रशाली
कालत्रितयसाक्षात्कर्ता दुष्टनिग्रहशिष्टानुग्रहनिरवग्रहधृताग्रहः
तत्तदवसरेषु तत्र तत्र सत्वरमुपागत्य तत्तज्जनांस्तत्तत्कर्मसु प्रवर्तयन्नयत्नमेव निजनयनैपुण्येन
हिरण्याक्षपुरस्सराणाममर्त्यपरिषदमित्राणामत्यन्तमसौ दैत्यहितकृत्याशंसी
नित्यमेवास्मन्मित्रमिति चित्तविश्वस्ततामुत्पाद्य सद्य एव तद्वधस्य निमित्तोऽभवत्
कदापि निजानुचरतुम्बुरुपर्वतप्रष्ठवसिष्ठार्ष्टिषेणारिष्टनेमिभृगुभरद्वाज-
शरद्वदत्रिमैत्रेयच्यवनकण्वौर्वदेवलौतथ्यमेधातिथिगौतमाङ्गिरःपराशर-
कौशिकपिप्पलादपुलस्त्यागस्त्यप्रभृतिसमस्तमुनिस्तोमपरिवीतपरिसरो बदरिकाश्रम-
मविरलबदरीतरुनिकुरुम्बनिबिरीसमविरतविमुक्तविरोधसहविहरणसंजातसौहार्द-
हरिद्विरदहरिणशार्दूलनकुलकाद्रवेयप्रमुखमृगकुलाकुलं मदतरलकरिकलभकर्णताल-
मद्दलध्वनिमिलितमदकलकलकण्ठकण्ठनालगलितकलकूजितगानानुसारि-
मदोदग्रमयूरपटुतरनटनाटोपसम्पन्नतौर्यत्रिकविचित्रितमुपेत्य
प्राक्तनमुनीश्वरयोर्नरनारायणयोः स्वविरचितसाङ्ख्यसारसर्वस्वभूतविविधस्तव-
प्रकारकलितप्रसाद-
वदनसुधाकरोदरनिरित्वरपरमोपदेशामृतरसमास्वादयन्
कदाचिदमन्दचिदानन्दाद्वैतसदानुभूतिविदूरितमदादिविकारपरमहंसैकनिकेतं
श्वेतद्वीपमासाद्य सुदुर्लभतरतदीश्वरवरिवस्यामहोत्सवमनुभवन्,
कदापि च सत्यलोकमेत्य निजापत्यसल्लापकौतुकतदात्वपरित्यक्तनित्यवेदपाठकृत्यं
पितरमभिवन्द्य भुवनवृत्तान्तानावेदयन्,
कदाचिदपि प्रदोषसमयप्रवृत्तनृत्तपुरत्रयविमर्दनसमर्चनससंभ्रमसमापनीपत्यमान-
समस्तामरसमुदयसम्मर्दसमाकुल कैलासशैलमुपगम्य गिरिजागमनसमा-
कुञ्चितविपञ्चिकाप्रपञ्चनविरिञ्चप्रियतमा-
विमुक्तमासनम् उदञ्चितानन्दपञ्चबाणारिनयनाञ्चलाभिनन्दितः समलङ्कुर्वन्,
कदाचन सकलभुवनोपरि परिलसितम् अफलाभिलषितबहुलजन्माचरित-
विपुलधर्मकलितनिर्मलीभाव-

* This stotra is taken from the Manuscript No. 20163 K.

चित्तसमुदित्वरभक्तिभरसमाराधितपरमपुरुषप्रसादसमधिगततत्तादृशोन्नतपददिव्य-
जनाधिष्ठितविमानशतपरिवृतम्
अनिर्वचनीयरूपसर्वातिशायिनिर्वाणफलविश्राणननिर्वासितगीर्वाणवनोर्वीरुहगर्वातिरेक-
विविधविटपिपटलविलसितनैश्रेयसवनराजिविराजदविरलतुलसीदलबहुलपरिमल-
पूरितगगनान्तरालं मन्दमारुतान्दोलितकनकारविन्दकन्दोद्गतमकरन्दनिष्यन्दि-
मकरन्दपानतुन्दिलमत्तमिलिन्दवृन्दझङ्कारविजितकलहंसकाकुकुहुकलरवमञ्जु-
वर्धमानसुखितित्तिरिदार्वि-
परभृतककरकुररमयूरकोद्भुवकचातुकप्रमुखशकुनिनिकुरम्बाभिनन्दितम्
अकुण्ठमहिम वैकुण्ठभुवनम् अभ्येत्य भक्तिभरपरवशप्रकटितमञ्जलाञ्जलिपाणि-
सम्पुटपरम्पराविडम्बित-
नवाम्बुजकदम्बकग्रथितमालिकावद्धोपहारमाल्याङ्कुरया सरभसा
सप्तकक्ष्यान्तराण्यतीत्य सविनयेन
भृत्यानुकम्पिना नित्यानन्दमयेन महाप्रभुदेवेन सद्यः प्रत्युत्थाय दत्तार्हणो
महार्हमणिविष्टरनिविष्टः प्रहृष्टरोमा भगवद्रूपामृतनिपानतृषितदृष्टिः पुरुषवरमनुष्टुभा
तत्तद्वृत्तवर्णनैरनन्तशायिनमभिरतजनपुण्यस्य हृदन्तरविनोदमुत्पादयन्,
कलितकुतूहलम् अतलवितलसुतलरसातलादिष्वपि सकललोकेषु स्वैरसञ्चारकारी
समस्तजनक्षेमनिर्वाणनिर्वाहधुरन्धरो दुर्दान्तयोः प्रमादमत्तमदे निपतितयोर्नल-
कूबरमणिग्रीवयोरर्जुनमित्रेण
भगवतानुग्राह्यतां सम्पादयितुमेव दत्तार्जुनीभावः, पुण्यकृतामग्रणीः, शरण्यः
सर्वभूतानां, ज्ञानस्वैकाधिकारिणां, वसुदेवहृदयमोहनीहारहारिहरिदश्वः, सरिदीश्वर इव
सपक्षपर्वतोपसेवितः, पर्वतेन्द्र इव बहुधातुकलितविख्यातिः,
पतगपतिरिव विबुधाभिमतकलशावहनलम्पटः, सज्जनसमाज इव सन्मार्गकृतासङ्गी,
शरत्काल इव कलहंसकुतुकमुद्भावयन्, कलानिधिरपि दोषासङ्गवर्जितः,
सुप्तोऽपि प्रबुद्धः, सदेवोऽप्यदेवः, नागरसमाश्रितचरणोऽपि नरामरसमाश्रितचरणः,
शरणागतसकलकल्याणवितरणसामर्थ्यशाली वल्लकीतलजसमुल्लसितपाणिपल्लवः
शरदागमविमलनीरदमदविदूरीकरणविशारदशरीरशोभः शारदारमणनन्दनः
श्रीनारदमहामुनिः ॥

सर्वमतसंग्रहः

[नारायणभट्टप्रणीतः]

१ … २
बध्नीमश्चित्तबन्धं कलभवरमुखं धाम पाटीरवाटी-
क्षेत्रे वास्तव्यमेतत् त्रिभुवनजननत्राणसंहारदक्षम् ।
शश्वन्निश्श्रेयसाय स्मृतनिजचरणाम्भोजनिःशेषलोक-
श्रेयस्याः कल्पवृक्षं प्रकटितकरुणाकन्दलश्रीकटाक्षम् ॥१॥

चतुर्दोष्णे कोष्णस्तनभररमालिङ्गनसुख-
प्रहृष्यद्रोम्णेऽस्मै त्रिभुवनपरित्राणपटुने ।
३
पटीरारामं नः स्फुटमनुजिघृक्षयाधिवसते
नमस्कुर्वे धाम्ने प्रसृमरमहःकौस्तुभयुजे ॥२॥

विश्वोत्पत्त्यादिहेतुर्मिलनदरगदाचक्रजाज्वल्यमान-
श्रीमद्बाहाचतुष्कं बहलघनघनश्यामलं निष्कलं नः ।
साक्षाद् ब्रह्माद्वितीयं तदिदमुपनिषद्वेद्यमानन्दरूपं
४ … ५
धामैध्येधीति मुक्त्यै झटिति मलयजारामवास्तव्यमस्तु ॥३॥

---

१. 'अधिकरणे बन्धः' (पा०सू०३.४.४१) इति णमुल् । चित्ते बध्नीम इत्यर्थः ।
२, ३, ५. 'चन्दनवनकाननं' क्षेत्रम् । ४. 'क्रियासमभिहारे च' (वा०) इति द्विर्वचनम् । एध्येधीत्यस्तु भृशमेधीत्यर्थः ।

BERKELEY
LIBRARY
UN
CALIFORNIA

Provided by
The Library of Congress
Special Foreign Currency Program.

१
जीवोऽजीवास्रवश्चैव संवरो निर्जरस्तथा ।
२
बन्धो मोक्षश्च पञ्चास्तिकायास्तेष्वाद्ययोर्भिदा ॥२१॥

जीवो बोधस्वभावोऽयं स द्वेधा, द्वयात्मकस्तु जीवास्तिकायः
३
सिद्धो बद्धश्च मुक्तस्त्रिविध इति; परः पुद्गलाख्योऽस्तिकायाः ।
आद्योऽयं क्ष्मादिभूतान्यचरमपि चरं; पुंप्रवृत्तिस्थितिभ्यां
४
धर्माधर्मास्तिकायौ विदुरनुमितितः; खास्तिकायं द्विधाहुः ॥२२॥

लोकान्तर्वर्त्यदो व्योम लोकाकाशोऽस्य चोपरि ।
अलोकाकाश इष्टोऽसौ मोक्षस्थानमिति स्थितिः ॥२३॥

५
पुण्याः पुद्गलकास्तु धर्म इतरोऽधर्मो जगत् तैरभूत्
देहश्चावयवीह तत्परिमितो जीवोऽणुरित्यन्यके ।

---

१. केचन दिगम्बराः जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षाः सप्त तत्त्वानीति वदन्ति । तन्मतेनायं विभागः । २. आद्ययोः—जीवाजीवयोः भिदाः पञ्चास्तिकायाः जीवपुद्गलधर्माधर्माकाशास्तिकायभेदात् । परः पुद्गलाख्योऽस्तिकायो द्विविधः चराचरभेदात् । ३. अस्तीति कायन्ते शब्द्यन्ते इत्यस्तिकायाः । स्पर्शरसगन्धवर्णवन्तः पुद्गलाः । पुद्गलं शरीरम् । पृथिव्यादीनां चतुर्णां स्थावरजङ्गमयोश्च पुद्गलजनकत्वात् । तद्भेदाः पृथिव्यादीनि । ४ धर्मास्तिकायः प्रवृत्त्यनुमेयः । प्रवृत्तिः शास्त्रचोदितमनुष्ठानं शास्त्रीयबाह्यप्रवृत्तिश्च । ताभ्यामपूर्वाख्यो धर्मोऽनुमेयः । ऊर्ध्वगमनशीलस्य जीवस्य देहेऽवस्थानेनाधर्मोऽनुमेयः । तेन ह्ययं देहे तिष्ठति ॥ ५. 'सत्कर्मपुद्गलाः पुण्यं पापं तस्य विपर्ययः' (सर्वमतसंग्रहे) । पुण्यैः सत्कर्मभिर्जाताः पुद्गला धर्मः, पापैः कर्मभिर्जाताः पुद्गला अधर्मः । आत्मा तत्तद्देहपरिमाणवान् इति केचित् । अणुरित्यन्ये ।

भूरिच्छिद्रघटस्थदीपवदसौ कर्मास्रवे(हो ? हा)वृतो
ज्ञानातीन्द्रियपञ्चकेन विषयानेव प्रमातेव नः ॥२४॥

[1] पुंस आस्रावयत्येतान् विषये पातयत्यसौ ।
इतीन्द्रियप्रवृत्तिर्वास्रवणात् कर्म वास्रवः ॥२५॥

[2] शमाद्यात्मा प्रवृत्तिस्तु संवृणोतीति संवरः ।
पुण्यापुण्ये निर्जरयेत् तप इत्येव निर्जरः ॥२६॥

स तु तप्तशिलारोहकेशोल्लुञ्छनपूर्वकः ।
बन्धोऽष्टविधकर्मोत्थ घातिकर्म चतुर्विधम् ॥२७॥

सम्यग्ज्ञानं न मोक्षस्य साधनं स्यादिति भ्रमः ।
स्याज्ज्ञानावरणी[illegible] ॥२८॥

दर्शनावरणीयं [illegible]ति धीः ।
[3] मोक्षाध्वसु [illegible] ॥२९॥

[illegible] ।
एतच्चतुर्विधं श्रेयोहन्तृत्वाद् घातिकर्म नः ॥३०॥

---

१ आस्रावयति विषयेष्विति व्युत्पत्त्या इन्द्रियप्रवृत्तिरास्रव इत्युच्यते । आस्रवति [illegible] पुरुषान् विषयेषु आस्रावयति पातयति इतीन्द्रियप्रवृत्तेरास्रवत्वम् । द्वितीये आस्रवति [illegible] ॥ २ इन्द्रियप्रवृत्तिमिति शेषो [illegible] । 'शमाद्या [illegible]' इत्यपि पाठः । ३ [illegible]-ष्वित्यर्थः ।

आयुः[1] कायविहायुष्कं मिलितं शुक्लशोणितम् ।
देहाकारपरीणाहशक्तिरस्यैव गोत्रिकम् ॥३१॥

नामिकं त्वत्र कललाद्यवस्थारम्भकक्रिया ।
वेदनीयं तु कर्मैषद्घनीभावोऽस्य तेजसा ॥३२॥

तत्त्वज्ञानाविघातित्वादघातीदं चतुर्विधम् ।
(ए)तत्कर्माष्टकं बन्धो बध्नाति पुरुषानिति ॥३३॥

मोक्षस्त्वक्षयदेहाप्तिरलोकाकाश आत्मनः ।
सदोर्ध्वगतिरित्यन्येऽत्रार्हत्प्राप्तिरितीतरे ॥३४॥

तत्सिद्धिः सर्ववस्तूनामनेकान्तत्वबोधतः ।
स्वतः सर्वमनेकान्तमैकान्त्यानुपपत्तितः ॥३५॥

सर्वत्र सर्वथा सर्वं सदा सर्वात्मनास्ति चेत् ।
कस्येच्छया प्रवृत्तिः स्यान्निवृत्तिर्वा जिहासया ॥३६॥

अनेकान्तत्वपक्षे तु सत्त्वासत्त्वाव्यवस्थितेः ।
हेयहान्यै निवृत्तिः स्यात् प्रवृत्तिश्चे[2]हिताप्तये ॥३७॥

---

१. आयुः कायत् उत्पादमद्यारेत्यायुष्कम् । २. 'श्चेप्सिताप्तये' इत्यपि पाठान्तरम् ।

तत्रानेकान्ततामानं सप्तभङ्गीयमुच्यते[1] ।
सर्वस्यैकान्तिकी सत्ता स्यादस्तीति निरस्यते ॥३८॥

असत्त्वसदसत्त्वानिर्वाच्यताश्च व्यवस्थिताः ।
स्यान्नास्ति स्यादस्ति नास्ति स्यादवाच्यमिति क्रमात् ॥३९॥

स्यादस्ति चावाच्यं चेति सदनिर्वाच्यतेदृशी ।
स्यान्नास्ति चावाच्यं चेति नियताऽसदवाच्यता ॥४०॥

स्यादस्ति नास्त्यवाच्यं चेत्युभयावाच्यतेदृशी ।
अनैकान्तिकताद्योती स्याच्छब्दोऽयमिहाव्ययम् ॥४१॥

तेनानेकान्तिकत्वेन सत्त्वाद्यस्तीति[2] कथ्यते ।
सप्तभङ्गीनयोऽयं स्यात् तेनानेकान्तता स्थिता ॥४२॥

---

१. सप्तभङ्गीनयः—स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यः, स्यान्नास्ति चावक्तव्यः, स्यादस्ति च नास्ति चावक्तव्यः, इति वाक्यसमूहः सप्तभङ्गीनय इत्युच्यते । अत्र सर्वत्र स्याच्छब्दः सापेक्षताया अनेकान्ततायाश्च द्योतकः । एवमेतदिति निश्चयाभावोऽनेकान्तता वक्तव्यशब्दस्य अनिर्वाच्यमित्यर्थः । सर्ववस्तूनामनेकान्ततासाधनाय आर्हतैरयं न्यायः प्रयुज्यते । यथा-घटाद्यस्तित्वविवक्षायां 'स्यादस्ति', कथञ्चिदस्तीत्यर्थः । देशकालगुणाद्यपेक्षया च कथञ्चित्त्वम् । घटादिनिषेधविवक्षायां 'स्यान्नास्ति', कथञ्चिन्नास्तीत्यर्थः । क्रमेण घटास्तित्वनास्तित्वविवक्षायां 'स्यादस्ति च नास्ति च' इति प्रयोगः । कथञ्चिदस्ति कथञ्चिन्नास्तीत्यर्थः । युगपदस्तित्वनास्तित्वयोर्विवक्षायां वाचः क्रमप्रवृत्तित्वादुभयं युगपदवाच्यमिति 'स्यादवक्तव्यम्' इत्यस्यार्थः । आद्यास्तित्वभङ्गः अन्त्येनासत्त्वेन सह युगपदवाच्य इति 'स्यादस्ति चावक्तव्यम्' इत्यस्यार्थः । अन्त्यश्चाद्येन भङ्गेन सह युगपदवाच्य इति 'स्यान्नास्ति चावक्तव्यम्' इत्यस्यार्थः । 'स्यादस्ति नास्ति' इत्ययं भङ्गः एकैकेन सह युगपदवाच्य इति 'स्यादस्ति नास्ति चावक्तव्यम्' इत्यस्यार्थः ॥ २. 'सत्ताद्य' इति पाठान्तरम्

एकान्तनित्यतावादी[1] च स्याद्वादं[2] योजयामहे ।
स्यादस्ति नित्यमित्यादिमनेकान्तं ततोऽखिलम् ॥४३॥

पक्षाः सद्वाद्यसद्वादिसदसद्वादिनां क्रमात् ।
अनिर्वाच्यसदाद्युक्तपूर्वानिर्वाच्यवादिनाम् ॥
निर(स? स्य)न्ते (सप्त)भङ्गीनयेनात्र स उच्यते ॥४४॥

[3]विमतं वस्त्वनेकान्तं प्रमेयत्वान्नृसिंहवत् ।
इत्यादिनानुमानेनाप्यनेकान्तिता स्थिता ॥४५॥

भ्रान्तावन्यस्फूर्तिबाधौ युक्तौ तत्सदसत्त्वतः[4] ।
सदसत्ख्यातिरेषातो दृष्टान्तोऽत्रैव चेष्यते ॥४६॥

तस्मात् सर्वविदोऽर्हतस्तु समये स्वर्गं व्रजेत् कर्मभिः
केशोल्लुञ्छनपिञ्छधारणमुखैर्हिंसादिभिर्वाप्यमन् ।
कृत्स्नं वस्त्वनुमाविधानबलतो ज्ञात्वा त्वनैकान्तिकं
मुक्तः प्राप्स्यति चेत् सदोर्ध्वगमनं धर्माश्रयं चार्हतः ॥४७॥

अन्यमते भेद इत्यादयश्चार्हतानुक्तशब्दाः ।
वेदाद्यप्रामाण्यं योगादीनां न धर्मता चेति ॥४८॥

---

१ 'नित्यत्वैकत्वादिके च', २. 'योजयन्' लिङ्' इति च पाठान्तरम् ।
३. विमतं सर्वं वस्तु अनेकान्तं प्रमेयत्वान्नृसिंहवत् । हेरम्बवत् सामान्यविशेषवत्
इत्यादिः आदिशब्दार्थः । ४. सदसत्त्वतः- अनेकान्ततया "इदं रजतं" "ने
रजतम्' इति प्रतीतिबाधौ सम्भवतः । सत्त्वात् प्रतीतिः असत्त्वाद् बाधश्चेत्यर्थः ।

नायं पक्षो युक्त एकत्र तावत् सत्त्वासत्त्वे नोपपन्ने विरोधात् ।

ते[1] धर्मा किं वस्तुनोऽथ स्वरूपं नाद्योऽन्यत्वेऽन्यधर्म[2]प्रसङ्गात् ॥४९॥

[3]नान्त्योऽन्यत्वेऽप्यन्यस्वरूपाप्रकाशनात् तत्त्वे मुक्ते देशकालादिभेदात् ।

तद्यत् प्रोक्तं न प्रवृत्तिर्निवृत्तिश्चैकान्तत्वे स्यादितीदं निरस्तम् ॥५०॥

देशे क्वापि क्वापि काले च सत्त्वाद् व्यापारो[4]ऽत्रवान्ययोः स्यान्निवृत्तिः ।

युष्मत्पक्षे सप्त[5] चैते पदार्था एतावन्तश्चैवेदृशाश्चेति न स्यात् ॥५१॥

स्याद्वादोऽयं तेषु सप्तस्वपि स्यात् तेनैतेषां नैव निर्धारणं स्यात् ।

वस्तुत्वात् स्यात् किञ्च निर्धारणेऽपि स्याद्वादस्तत्कर्तृमानादिके च ॥

एतान्यातः सन्ति नो वेत्यमन्दे सन्देहे स्यान्नैव निर्धारणेषाम् ।

तद्वैधुर्ये नोपदेशो गुरूणां शिष्याणां चानिर्णयान्न प्रवृत्तिः ॥५३॥

नित्यत्वादेरप्यनेकान्ततोक्ता तज्जीवादेर्नित्यता स्यान्न वेति ।

सिद्धेस्तस्य वा तस्य मोक्षाद्यवश्च स्याद्वा नो वेत्याकुलत्वाच्च नोभौ[6] ॥५४॥

---

१. ते सत्त्वासत्त्वे । असत्त्वदशायां सत्त्वस्य सत्त्वदशायामसत्त्वस्य चानुवृत्तिप्रसङ्गात् उभयोरपि वस्तुधर्मत्वात् । २. 'प्यस्य सत्त्वप्र' इत्यपि पाठान्तरम् । (?) ३. सर्वदा एकस्मिन् वस्तुनि द्वयप्रसङ्गान्न वस्तुतत्त्वं सत्त्वासत्त्वे । ४. अत्रैव— यस्मिन् देशे यस्मिन् काले च घटादिवस्तु न वर्तते तस्मिन् देशे तस्मिन् काले च । ५. सप्त पदार्थाः— जीवाजीवास्रवसंवरनिर्जरबन्धमोक्षाः । ६. उभौ— मोक्षादि जीवादी ।

स्याद्वादोऽयं[1] मानमेवोभयात्मा किं वाद्यश्चेत् सोऽपसिद्धान्त एव ।
द्वितीयोके केन सिद्धान्तसिद्धिः प्रामाण्याच्चेद् वैपरीत्यान्न च स्यात् ॥५५॥

प्रत्यक्षाद्यैः[2] सर्वभावा गृहीता एकान्तास्तत्तैर्विरुद्धानुमा ते ।
एकान्ताश्चेत्[3] त्वत्पदार्थाश्च हेतोश्चानैकान्त्यं स्यान्न चेदप्रवृत्तिः ॥५६॥

दृष्टान्तेऽस्मिन् यो नृसिंहाविरुक्तस्तस्यापि[4] स्यात् साध्यवैकल्यदोषः ।
नारैः सैंहैश्चाङ्गभेदैरुपेतो जन्तुः सोऽपीत्यस्य चैकान्ततेति ॥५७॥

आत्मानं[5] कथयन्ति नास्तिकधियो लोकायताद्या वपुः
केचित् तं पुनरिन्द्रियाण्यथ पुनः प्राणान् वदन्त्यार्हताः ।
बुद्धा बुद्धिमुशन्ति(ता मम ? तेष्वपि) पुनर्बाह्यार्थमाध्यक्षतः
सिद्धं क(श्च)न कश्चिदप्यनुमितेः सिद्धं तमेवाब्रवीत् ॥५८॥

---

१. उभयात्मा— स्यादस्ति मानं, स्यान्नास्ति मानम्, इतिरूपम्, मानामानात्मकम् । २. प्रत्यक्षेण यावतां भावानामुपलम्भः तावतामेकान्तमेव (नियतमेव) रूपमुपलभ्यते नानियतम् । अतोऽध्यक्षबाधः । ३. त्वत्पदार्थानां नित्यसिद्धानामार्हतसम्मतानां पदार्थानामनेकान्ततापत्तिः । हेतोः प्रमेयत्वस्यानेकान्त्यं, तस्मादप्रवृत्तिः अनुमानस्य । ४. नृसिंहो नाम नरावयवैः सिंहावयवैश्च सम्भूयारब्धः कश्चिदवयवी । तस्यैकरूपत्वान्न द्वैरूप्यम् इति साध्यवैकल्यम् । ५. प्रधानतया चत्वारो बौद्धाः माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकभेदात् । तत्र वैभाषिकमते बाह्यार्थः प्रत्यक्षतः सिद्धः सौत्रान्तिकमते अनुमितेः सिद्धः ।

१
कश्चित् तामिह केवलां कथितवानद्वैतवादी परः
शून्यां तामपि कश्चिदाह तदिमे चत्वार एषां मतम् ।
यत् सत् तत् क्षणिकं मनोमयमिदं, नास्तीश्वरः कश्चन
प्रामाण्यं निगमस्य नास्ति, यदतः कार्या न(या)गादयः ।।५९।।

२
प्रत्यक्षं हि प्रमाणं न तु पुनरपरं भूतसंयोगतश्चिद्
देहस्त्वात्मा स्वभावः सुखमसुखमतो नास्ति धर्मस्तदर्थः ।
मोक्षः प्राणाख्यवायोरपगम इह भोगो हि तस्मादुपास्यो
विद्वद्भि(र्दुन्ध ? र्दण्ड)नो(त्यादिभि ? त्ये)न्द्रियमपि च
परापेक्षया प्राण आत्मा ।।६०।।

कर्ता धर्मस्य भोक्ता वपुषि परिमितो ज्ञानतो बन्धमो(क्षौ ? क्षौ)
कादाचित्कस्वभा(वो? वो)न भवति सुख(दे? दो)धर्म आत्मानुगामी।
धर्मोऽहिंसैव येषां क्षपणकगुरवो वेदबाह्याश्च तेऽपि
० * * * * * ।।६१।।

भूरीद ऽात्मानं चिदचिद्भिदोरिति कथयन्त्येव लोकायताद्याः (?)
देहो नात्मा जडो ने भर्यामिह प्राहुर्हि वैशेषिका (?)
मन्यन्ते पुनराश्रया...तममुं नैयायिकाः केचन
प्राहुः के(श ? च)न कर्मभाजमनिशं प्राभाकर(ा)स्ते पुन-
स्ते(भरगा?)खलु कर्मभिश्च तमिति प्रायोऽत्र भेदः स्मृतः(?)।।६२।।

१. अद्वैतवादी परः– योगाचारः । तन्मते केवला बुद्धिरेवास्ति । शून्यां तामपि- तामपि बुद्धिमपि शून्यां कश्चित् माध्यमिक आह । माध्यमिकस्य मते शून्यमेवैकं तत्त्वं विद्यते नान्यत् किञ्चित् ।। २. चित् चैतन्यम् ।

सांख्याः सप्रकृतिं सृजन्तमखिलं चात्मानमाहुः परं
प्रोचुः पाशुपताः सदाशिवममुं श्रीवासुदेवं पुनः ।
प्रद्युम्नं त्वनिरुद्धमूचुरपरे[1] ते(च ? चै)व सङ्कर्षणं
* * * * * * ॥६३॥

कर्मद्रव्यगुणा विशेषसमवायौ (च ? चापि) सामान्यमि-
त्येतत्षट्कपदार्थजातमवदन्न्यायी स(तु ?)वैशेषिकः ।
द्रव्यान्तर्गत एव जीवपरताभिन्नोऽयमात्मा तत-
स्तज्ज्ञानादिह मुक्तिरत्र सुलभा साधर्म्यवैधर्म्यतः ॥६४॥

*प्रत्यक्षं त्वनुमानमागम इह त्रीण्येव मानानि ..
श्रौतं कर्म हि कार्यमीश्वरकृतत्वादेव मानं श्रुतेः ।
जीवानां कृतकर्मणां स फलदो नान्ये तु जीवादयः
* * * * * * ॥६५॥

हित्वा काम्यनिषिद्ध ... — — ... ... मतकं
य(नु ?)त्तत् कर्म हि कुर्वतामनुदिनं शुध्येत धीर्यत्ततः ।
प्रारब्धावधि कर्मभोगविरतौ मोक्षः शिलासन्निभः
पक्षेऽयं गदितः प्रभाकरगुरोश्चात्मा विभुश्च ध्रुवः ॥६६॥

विभुर्विभिन्नः प्रतिदेहमात्मा जडो भजन् कर्मफलानि भुङ्क्ते ।
* * * * * * ॥६७॥

---

१. अपरे रामानुजीयाः ।

---

* 'भासर्वज्ञश्च सांख्यास्तितयम्' (मानमेयोदयः P. ४) इति दिशा तार्किकान्यतमस्य भासर्वज्ञस्य मतमिदं स्यात् ।

भक्तावाञ्छितदो(?)वदति करणाद्यावेऽस्य मुक्ति शिलां(?)

*   *   *   *   *   *   *

नित्यानन्दानुभूतिर्भवति नहि शिलासन्निभा मुक्तिरेषा ।
को वा वेदप्रणीतं विधिर्वदिह विधायेश्वरस्य प्रसादा-
न्मूर्च्छामिच्छेद्धि ?श्चिद्धहह विरसतामात्मनोऽन्यत्समानम् ॥६८॥

शास्त्रं प्रायोऽत्र भे(दंस्त?दस्त्व)यमिह तु पुनः षोडश स्युःपदार्थाः॥६९॥

*   *   *   *   *   *   *

*   *   *   *   *   *

गोरूपेण यथावगम्य गवयस्तेनोपमानाद्द्वयं
मानं चापि चतुर्थमि(ष्य? च्छ)ति पदार्थास्ते प्रमाणादय(:)॥७०॥

द्वेधैव[1] वैशेषिकनामकं च नैयायिकं चेति हि तर्कशास्त्रम् ।
*द्विमानमाद्यं कृतवान् कणादश्चतुष्प्रमाणं परमक्षपादः ॥७१॥

(वैशेषिकमतम्)

प्रत्यक्षमनुमितिर्द्वयमेव मानं कणादस्तु वक्तृधिय एव हि लिङ्गभूतः ।
वैशेषिकस्य कणादात् तु विशेष एव ईश्वरस्य[£] बुद्ध्यनुमिते[2] विधानः प्रमाणम्
॥७२॥

---

१. 'द्वेधे' B.   २. [illegible]' B

---

* द्विमानं प्रत्यक्षानुमानरूपम् ।

£ वेदवाक्यप्रयोगहेतुभूतबुद्धिमत्त्वेनेश्वरेऽनुमिते सति तस्मिन् वेदस्यापि प्रामाण्यमित्यर्थः ।

अत्र खलु द्रव्यगुणौ कर्म च जातिर्विशेषसमवायौ ।
इति षड् भावपदार्थाः सप्तममिच्छन्त्यसावभावमपि ।।७३।।

द्रव्यं गुणाश्रयं स्यात् क्षितिजलतेजःसमीरगगनानि ।
कालदिगात्ममनांसीत्येवं द्रव्याणि नवविधान्येव ।।७४।।

क्षित्याद्याश्चत्वारो नित्यैरणुभिः कृता अनित्याश्च ।
गगनादयोऽत्र नित्या विभवश्च मनस्तु गतिम(व)णुरूपम् ।।७५।।

पृथिवी मृत्पाषाणद्रुमघटरत्नादिरूपिणी[1] विविधा ।
घृततैलक्षीरादिश्चाग्निविनाश्यत्वहेतुतः पृथिवी ।।७६।।

सरिदर्णवहिमकरकप्रमुखैर्भेदैश्च वारि भूरिविधम्[2] ।
तेजश्च सूर्य[3]ताराविद्युद्दहनादिभेदतो विविधम् ।।७७।।

कलधौतसीसलोहास्तेजांस्येवाग्निनाश्यताभावात् ।
वायुः प्रणादिभिदः परमाणुकृतास्त्वमी पृथिव्याद्याः ।।७८।।

गगानाद्यास्त्विह नित्यास्तेष्वणुरूपं मनोऽपरे विभवः ।
अत्र चतुर्विंशतिधा गुणा मतास्तेषु चाष्ट भूतगुणाः ।।७९।।

रूपरसगन्धशब्दस्पर्शस्नेहद्रवत्वगुरुताख्याः ।
सुखदुःखेच्छाद्वेषप्रयत्नधर्मा अधर्मबुद्धी च ।।८०।।

---

१. 'त्नाद्रिरू' इत्यप्यादर्शे । (A) २. 'रि विविधम्' A. ३. 'सूर' B.

आत्मगुणा अष्ट; ततः सामान्यगुणाः परत्वमपरत्वम् ।
योगविभागपृथक्त्वाः संख्या परिमाणमपि च संस्कारः ॥८१॥

*नैल्यमृते धरणिगुणास्तेजोन्वयरूपपाकजाः सर्वे ।
आकुञ्चनप्रसारणमुत्क्षेपणमत्र[१] खल्वपक्षेपः ॥८२॥

गमनमिति पञ्चधा स्यात् कर्म; भ्रमणादिकं च गतिरेव ।
द्रव्यगुणकर्मवृत्तिर्द्रव्येष्वेकत्वधीकरी जातिः ॥८३॥

सा द्विविधा परजातिः सत्ता गोत्वादिरपरजातिः स्यात् ।
भेदकरहितेषु पुनः परमाणुष्वपि च मुक्तजीवेषु ॥८४॥

अन्योन्यपृथक्त्वार्थं विशेषनामा पदार्थ आद्रियते ।
गुणजातिकर्मणां यो द्रव्यैः संबन्ध एष समवायः ॥८५॥

नास्तीति बुद्धिबोध्यस्स्वभाव इत्थं पदार्थनिर्णीतिः ।
एवं पदार्थतत्त्वे ज्ञाते संसारबोधमवगच्छन् ॥८६॥

आत्मस्वन्तर्भूतं शिवमेकं भजति विश्वकर्तारम् ।
तदनुग्रहाद् विरक्तः सुखेष्वपि स्फीतदुःखमिश्रेषु ॥८७॥

(नैयायिकमतम्)

आत्मगुणोच्छेदमयीं मुक्तिं पाषाणवत् स्थितिं लभते ।
तदिदं मतं न हृद्यं कथं हि शाब्दं प्रमाणमपनोद्यम् ॥८८।

१. 'व' B.

* इदं चिन्त्यं नैल्यस्यापि पाकजत्वात् ।

अज्ञातेऽर्थे तु कथं तद्विषया वस्तुबुद्धिरनुमेया ।
उपमानमपि च मानं गोसदृशो गवय इत्युपाकर्ण्य ॥८९॥

विपिनगतो गोसदृशं पश्यन् गवयोऽयमित्यवैति दृढम् ।
तस्माच्चतुष्प्रमाणी ग्राह्येति [illegible] ब्रुवते ।९०॥

षोडशपदार्थबोधादेव च निःश्रेयसाप्तिरेतेषाम् ।
विक्ता हि षट्पदार्थी नास्तिकवाक्यैर्हि याति सन्देहम् ॥९१॥

जल्पाद्यैस्तान् जित्वा मानाद्यैर्निजमतस्थितिः कार्या ।
मानप्रमेयसंशयफलदृष्टान्तास्तथैव सिद्धान्तः ॥९२॥

अवयवतर्कविनिर्णयवादा जल्पस्ततो वितण्डा च ।
हेत्वाभासाश्छलमपि जातिविभेदाश्च निग्रह[1]स्थानम् ॥९३॥

एवं द्व्यष्टपदार्थाः; [illegible] मानम् ।
परमाणुसृष्टताद्यं चास्मिन् कणभक्षवत् प्रेक्ष्यम् ॥९४॥

षोडशवस्तुषु चैषु प्रमेयबोधः प्रधानममृताप्त्यै ।
आत्मशरीराक्षार्था बुद्धिश्च मनः प्रवृत्तिदोषौ च ॥९५॥

प्रेत्योद्भवफलदुःखान्यपवर्गो द्वादश प्रमेयाणि ।
एषां तत्त्वविवेकाद् भ्रमादिनाशेन[2] विषयवैराग्यात् ॥९६॥

---

१. 'विग्र' B.   २. 'दिरहितः शिवार्चनास्तमनः' इत्यपि पाठः—A, B.

मोक्षेच्छुः स्वात्मानं जीवमनुध्याय सम्यगाकलयन् ।
शिवभजनलब्धयोगात् पूर्वार्जितसुकृतदुष्कृते पश्यन् ॥९७॥

योगकृतैर्बहुदेहैस्ते[1] संक्षिप्यानुभूय संक्षपयन् ।
*सुखदुःखदेहहीनो मुक्तः स्वस्थः शिलावदेवास्ते ॥९८॥

(निरीश्वरसांख्यमतम्)

इदमपि मतं न रम्यं वेदस्य हि नेश्वरो भवेत् कर्ता ।
उपदेष्टैवास्य स्यात् सर्वज्ञः किं स विस्मरेद् वेदान्

तेन हि नित्यान् वेदान् प्रामाण्यं च स्वतो जगुः सांख्याः ।
परमाणुजसृष्टेश्च श्रुतिबाधात् प्रकृतिसृष्टिमेवाहुः ॥१००॥

प्रकृतिः स्वयमेवासौ महदादिजगन्मयी हि परिणमते ।
कपिलपतञ्जलिरचितं निरीश्वरं सेश्वरं च सांख्यं स्यात् ॥१०१॥

तत्राद्ये स्वयमेव प्रकृतिर्जगदात्मना हि परिणमते ।
असतः शशशृङ्गादिवदनुद्भवाद्[2] व्यक्तिरेव सृष्टिः स्यात् ॥१०२॥

प्रकृतेर्महानमुष्मात् त्रिगुणैस्त्र्यंशो भवेदहङ्कारः ।
सत्त्वांशात् तस्य मनो राजसभागाद् दशेन्द्रियाणि स्युः ॥१०३॥

---

१. ते सुकृतदुष्कृते । २. तिले पूर्वं स्थितस्य तैलस्य यथा निष्पीडनेन प्रकाशः (व्यक्तिः) तथा सृष्टिरपि प्राक् तत्कारणे सूक्ष्मरूपेण स्थितस्य प्रकाश एव ।

---

* 'एकविंशतिप्रभेददुःखोच्छेदो मोक्ष इति तार्किकाः कीर्तयन्ति । देहः, षडिन्द्रियाणि, षड् विषयाः, षड् बुद्धयः, सुखं, दुःखं चेत्येकविंशतिप्रभेदं दुःखमाचक्षते' (मानमेयोदयः–P. ८७)

तामसभागाच्छब्दः स्पर्शो रूपं रसश्च गन्धोऽपि ।
तैरेव[1] भूतसूक्ष्मैः कृतानि वियदादिपञ्चभूतानि ॥१०४॥

एतानि प्रकृतिमुखान्यत्र[$] चतुर्विंशतिर्हि तत्त्वानि ।
अक्षानुमानशब्दैस्त्रिभिः प्रमाणैस्तु तानि विज्ञाय ॥१०५॥

*तेभ्यः पुरुषस्य पुनर्विवेकबोधेन मुक्तिरेतेषाम् ।
बन्धक एव[2] तु यागो हिंसायोगेन नरकमिश्रश्च ॥१०६॥

ये तु ध्यानजपाद्या निवृत्तिधर्मास्त एव मोक्षाङ्गम् ।
महदाख्याया बुद्धेः सुखदुःखाद्या गुणा न पुरुषस्य ॥१०७॥

प्रकृतिवियोगात् तेषां विगमो मोक्षः शिलावदत्रापि ।
इति हि निरीश्वरसाख्यं सृष्टावत्रेश्वरस्य नाश्रयणात् ॥१०८॥

(सेश्वरसांख्यमतम्)

सेश्वरसांख्ये तु पुनः प्रकृतिः सृजतीश्वरेक्षणक्षुभिता ।
महदादयोऽत्र तुल्या ईशयुतं[£] पञ्चविंशकं तत्त्वम् ॥१०९॥

---

१. तैरेव–शब्दादिभिरेव । २. 'योगो' B.

---

* 'प्रकृतिपुरुषविवेकज्ञानात् पुरुषस्य स्वरूपावस्थानं मोक्ष इति सांख्याः' (मानमेयोदय P. 88)

$ पुरुषप्रकृतिमहदहङ्कारमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलभूमिषु पञ्चविंशति तत्त्वेषु पुरुषमपहायेदमुक्तिः ।

£ पुरुषः, परः पुरुष, इति भेदे सेश्वरसांख्यानां तत्त्वनि षड्विंशतिः ।

न पुनर्विबोधमा[1](त्रा मु? त्रान्मु)क्तिः समलस्य सम्यगस्फुरणात् ।
अष्टाङ्गात् त्विह योगाद् विमलस्याश्वात्मदर्शनान्मोक्षः ॥११०॥

वर्ज्यत्यागोऽत्र यमो हरिभजनादिव्रतं तु नियमः स्यात् ।
पद्माद्यासनमाहुः प्राणायामांस्तु रेचकादींस्त्रीन् ॥१११॥

प्रत्याहारः स्वात् स्वात् समनस्केन्द्रियनिवर्तनं विषयात् ।
मूलाधारप्रभृतौ धारणम[2]निलस्य धारणामाहुः ॥११२॥

ईश्वरचिन्ता ध्यानं तत्रैव मनोलयः समाधिः स्यात् ।
विद्याविद्यारूपं द्विविधं योगस्य फलमिति प्राहुः ॥११३॥

भक्तिविरागज्ञानं विद्यात्मकमन्यदणिममहिमादि ।
सेश्वरसांख्ये ऽप्यस्मिन् बहवो जीवाः शिलानिभो मोक्षः[*] ॥११४॥

(प्राभाकरमीमांसादर्शनम्)

मीमांसको न सहते यागादौ दुरितवादिनः सांख्यान् ।
यागे हिंसां शंसन् विधिरेव हि तन्निषेधमपहरते ॥११५॥

कार्यं प्रवर्तकं स्याद् व्यु[3]त्पत्तिश्च प्रवृत्तिदृष्टयैव ।
प्राभाकरस्य पक्षे तस्मात् कार्यार्थतैव सकलगिराम् ॥११६॥

---

१. 'मात्र मु' B.   २. 'णमा' A.   ३. 'स्याद्युत्पत्ति' A.

---

* सेश्वरस्य तत्त्वज्ञानसहकृतो योगो मुक्तिहेतुः इतरस्य योगसहितं तत्त्वज्ञानं मुक्तिहेतुः ।

वेदे तु स्वर्गेच्छोर्यागेऽस्मिन् अर्थिणि कार्यधीविरहात् ।
[1]
यागेनेहापूर्वं कार्यमिति स्याल्लिङो हि मुख्योऽर्थः ॥११७॥

एवं विधिवाक्यमयं शास्त्रं मानं हि वेद एवास्ति ।
पुरुषगिरस्त्वनुवादा वक्तृज्ञानानुमानसिद्धेऽर्थे ॥११८॥

अनुभूतिस्त्विह मानं, स्मृत्यतिरिक्ता च संविदनुभूतिः ।
$नहि कुहचिद् भ्रान्तिमतिर्भेदाग्रह एव शुक्तिरजतादौ ॥११९॥

[2]
ज्ञानं स्वयंप्रकाशं विषयात्मस्वात्मभानतस्त्रिपुटम् ।
अर्थापत्त्या सार्धं प्राहुः पञ्चैव तु प्रमाणानि ॥१२०॥

नाभावोऽस्ति पदार्थो विषयहतेः का नु तत्प्रमाणकथा ।
द्रव्यगुणकर्मसंख्या जातिः समवायशक्तिसादृश्यम् ॥१२१॥

अष्टौ सन्ति पदार्था इष्टा न* तु विप्रतारिका जातिः ।
£कार्यार्थ एव वेदो मानं न तु सिद्धवस्तुनि क्वापि ॥१२२॥

---

१. 'यागाद्यतिरिक्तं यत् स्थायि च कार्यं लिङादिवाच्योऽर्थः' इत्यपि पाठः A.
२. 'ज्ञानं यथार्थमखिलं' इत्यपि पाठः A, B. विषयात्मस्वात्मेत्यत्र स्वात्मपदं ज्ञानार्थकम् ।

$ इदं रजतमित्यत्रेदमित्यगृहीतविशेषं शुक्तिशकलं गृह्यते । रजतमिति च रजतमात्रं स्मर्यते । तयोश्च भेदाग्रहात् पुरोवर्तिनि रजतार्थिनः प्रवृत्तिः, न तु शुक्तिशकलस्य रजतत्वेन भानमस्ति' । (मानमेयोदयः P. २)

* जातिबोधस्य पूर्वाकारावमर्शनियतत्वात् तदभावेन सत्त्वशब्दत्वब्राह्मणत्वादीनामभाव इति भावः । £ कार्ये कृतिसाध्ये यागादावेव वेदः प्रमाणम् ।

तेनार्थवादमन्त्रा विधिशेषा एव ‡नो निजार्थपराः ।
*आत्मज्ञेयत्वविधेः शेषत्वात् स्वार्थहानिरुपनिषदाम् ॥१२३॥

†विहितैककर्मकारी मुक्तिं पाषाणवत् स्थितिं लभते ।
नेच्छति चेन्नेच्छतु तां स्वर्गादिसुखे तु कर्मजे रमताम् ॥१२४॥

(कुमारिलमतम्)

सिद्धेऽपि चार्थे भवति प्रमाणं
शब्दोऽयमित्याह कुमारिलार्यः ।
तेनार्थवादोपनिषत्प्रपञ्चोऽ-
प्यबाधितेऽर्थे भवति प्रमाणम् ॥१२५॥

इष्टाभ्युपायत्वधिया प्रवर्तते
तदेव सर्वत्र लिङर्थ इष्यते ।
यजेतशब्दाद् यजिरिष्टसाधनं
त्रिविष्टपैकाशोरिति हि प्रमीयते[1] ॥१२६॥

1: 'प्रतीयते' B.

---

‡ नो निजार्थपराः स्वार्थे तात्पर्यरहिताः ।

* मोक्षार्थमात्मनो ज्ञेयत्वं विधीयते 'आत्मा वारे द्रष्टव्यः' इत्यादिना । तत्र प्राशस्त्यज्ञानमुत्पादयन्त्यः उपनिषदः कृतार्था भवन्ति । तस्मात् तासां स्वार्थे मुख्यं तात्पर्यं नास्ति । अतस्तेषामात्मज्ञेयत्वविधेः शेषत्वम् (अङ्गत्वम्) एव ।

† 'सुखदुःखादिविशेषगुणविलये सति आत्मनः स्वरूपावस्थानं मोक्ष इति प्राभाकराः' (मा–P. ८८)

ततश्च तत्साधनतोपपत्तये
१
कल्प्यं त्वपूर्वं न लिङ्ंव बोध्यते ।
क्रियोद्भवा शक्तिरपूर्वमुच्यते
फलोदयान्तं वसतीयमात्मनि ।१२७॥

* २
अज्ञाततत्त्वबोधः प्रमाणमस्मिन् प्रमादि चाभिमतम् ।
$इदमिह रजतमितीत्थं तादात्म्यधियान्यथाग्रहाश्रयणात् ॥१२८॥

अस्ति प्राकट्याख्यो धर्मो ज्ञानोद्भवो हि विषयेषु ।
£
ज्ञानं तेनानुमितं न मानसं, न स्वयंप्रकाशं वा ॥१२९॥

---

१. 'लिङ्गेव' B. २. 'मादिर' B

---

* प्रमाणं प्रमात्मकं ज्ञानं, तस्यापि प्राकट्यरूपप्रमां प्रति कारणत्वात् । प्रमाशब्देन लक्षणया तत्कार्यभूतस्य प्राकट्यस्यापि प्रतिपादनात् तस्यापि प्रमात्वम् । 'तस्मादज्ञाततत्त्वार्थज्ञानसाधनमेव नः । प्रमाणमिति निर्णीतम्' (मा–P. ४)

$ 'तत्तज्ज्ञानस्य स्वविषय एव प्रवृत्तिकरत्वनियमाद् रजतज्ञानस्यापीदंविषयत्वाभावे तत्र प्रवृत्तिर्न सिध्येत्, तथेदमेव रजतमिति सामानाधिकरण्यं तयोरभेदप्रतीतिं विना न सिध्येदित्यादिदिशा निराकरणीयम् ।' (मा – P. ३)

£ तेन प्राकट्येनानुमितम् । 'घटः प्रकाशते' 'घटो भाति' 'प्रकटो घटः' इत्यादयो व्यवहाराः प्राकट्यसाधकाः । एते व्यवहाराः स्वोपपादाय प्रकाशविशिष्टमेवार्थमवकल्पयन्ति । तत्र विशेषगुणभूतः प्रकाशपदार्थः प्राकट्यमित्युच्यते ॥ ज्ञानं मानसप्रत्यक्षमिति तार्किकाः । तन्निरासमाह—न मानसमिति । न मनोजन्यप्रत्यक्षविषयमित्यर्थः ॥ ज्ञानं स्वयंप्रकाशं न ज्ञानान्तरप्रकाश्यमिति प्रभाकरः श्रीशङ्करश्च । तन्निरासमाह – न स्वयंप्रकाशं वेति । आत्मस्वविषयैतत्त्रितयविषयकं न भवतीत्यर्थः । ज्ञातृज्ञानज्ञेयत्रितयविषयकं न भवतीदि यावत् ।

वस्त्वस्त्यभावसंज्ञं नास्तीति धियो हि नापरं शरणम् ।
‡ तत्पुनरभावमानात् प्रमीयते तेन षट्† प्रमाणानि ॥१३०॥

द्रव्यगुणकर्मजातीर्भावपदार्थांस्तु चतुर* एवाहुः ।
तादात्म्यं हि गुणादेः संबन्धस्तेन नास्ति समवायः ॥१३१॥

सादृश्यमित्यभीष्टो योगो बह्ववयवादिजातीनाम् ।
द्रव्याण्येकादश तु क्षित्याद्या नव च शब्दतमसी च ॥१३२॥

प्रत्यक्षाणि दशापि द्रव्याण्यनुमेयमत्र मन एव[1] ।
तिमिरं चाद्यचतुष्कं परमाणुकृतं परे तु षड् विभवः ॥१३३॥

विभुषु च मनआत्मानो ह्यमिता दिक्कालगगनमेकैकम् ।
षडधिकचत्वारिंशद् वर्णाः शब्दाः पृथङ् न दीर्घाद्याः ॥१३४॥

** अजसंयोगोऽस्ति मिथः सर्वविभूनां निरन्तरात्वात् ।
विहितहतकर्मरूपो धर्माधर्मौ रवश्च नैव गुणाः ॥१३५॥

---

१. 'नवएव' B.

---

‡ अभावमानादभावाख्यप्रमाणात् ।

† षट् प्रमाणानि प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यभावाख्यानि । अभावोऽनुपलब्धिः 'प्रत्यक्षमनुमानं च शाब्दं चोपमितिस्तथा । अर्थापत्तिरभावश्च, षट् प्रमाणानि मादृशाम् ॥ (मा ब. P. 4)

* चतुर एवेत्यनेन विशेषसमवाययोर्निरासः । प्रभाकरमते सादृश्यस्य पृथक् पदार्थत्वं, भाट्टमते तस्य न तथात्वम् । किन्तु बह्ववयवादिजातीनां योग एव सादृश्यम् । अभावः पञ्चमः पदार्थः इति पञ्च पदार्था भाट्टाभिमताः ।

** अजसंयोगो नित्यसंयोगः ।

अत्र खलु द्रव्यगुणौ कर्म च जातिर्विशेषसमवायौ ।
इति षड् भावपदार्थाः सप्तममिच्छन्त्यसावभावमपि ॥७३॥

द्रव्यं गुणाश्रयं स्यात् क्षितिजलतेजःसमीरगगनानि ।
कालदिगात्ममनांसीत्येवं द्रव्याणि नवविधान्येव ॥७४॥

क्षित्याद्याश्चत्वारो नित्यैरणुभिः कृता अनित्याश्च ।
गगनादयोऽत्र नित्या विभवश्च मनस्तु गतिम(व)णुरूपम् ॥७५॥

पृथिवी मृत्पाषाणद्रुमघट[१]रत्नादिरूपिणी विविधा ।
घृततैलक्षीरादिश्चाग्निविनाश्यत्वहेतुतः पृथिवी ॥७६॥

सरिदर्णवहिमकरकप्रमुखैर्भेदैश्च वारि[२] भूरिविधम् ।
तेजश्च [३]सूर्यताराविद्युद्दहनादिभेदतो विविधम् ॥७७॥

कलधौतसीसलोहास्तेजांस्येवाग्निनाश्यताभावात् ।
वायुः प्राणादिभिदः परमाणुकृतास्त्वमी पृथिव्याद्याः ॥७८॥

गगनाद्यास्त्विह नित्यास्तेष्वणुरूपं मनोऽपरे विभवः ।
अत्र चतुर्शितिधा गुणा मतास्तेषु चाष्ट भूतगुणाः ॥७९॥

रूपरसगन्धशब्दस्पर्शस्नेहद्रवत्वगुरुताख्याः ।
सुखदुःखेच्छाद्वेषप्रयत्नधर्मा अधर्मबुद्धी च ॥८०॥

---

१. 'त्नाद्रिरू' इत्यप्यादर्शे । (A)   २. 'वि विविधम्' A.   ३. 'सूर' B.

आत्मगुणा अष्ट; ततः सामान्यगुणाः परत्वमपरत्वम् ।
योगविभागपृथक्त्वाः संख्या परिमाणमपि च संस्कारः ॥८१॥

*नैल्यमृते धरणिगुणास्तेजोन्वयरूपपाकजाः सर्वे ।
आकुञ्चनप्रसारणमुत्क्षेपणमत्र खल्वपक्षेपः[1] ॥८२॥

गमनमिति पञ्चधा स्यात् कर्म; भ्रमणादिकं च गतिरेव ।
द्रव्यगुणकर्मवृत्तिर्द्रव्येष्वेकत्वधीकरी जातिः ॥८३॥

सा द्विविधा परजातिः सत्ता गोत्वादिरपरजातिः स्यात् ।
भेदकरहितेषु पुनः परमाणुष्वपि च मुक्तजीवेषु ॥८४॥

अन्योन्यपृथक्त्वार्थं विशेषनामा पदार्थ आद्रियते ।
गुणजातिकर्मणां यो द्रव्यैः संबन्ध एष समवायः ॥८५॥

नास्तीति बुद्धिबोध्यस्त्वभाव इत्थं पदार्थनिर्णीतिः ।
एवं पदार्थतत्त्वे ज्ञाते संसारबोधमवगच्छन् ॥८६॥

आत्मस्वन्तर्भूतं शिवमेकं भजति विश्वकर्तारम् ।
तदनुग्रहाद् विरक्तः सुखेष्वपि स्फीतदुःखमिश्रेषु ॥८७॥

(नैयायिकमतम्)

आत्मगुणोच्छेदमयीं मुक्तिं पाषाणवत् स्थितिं लभते ।
तदिदं मतं न हृद्यं कथं हि शाब्दं प्रमाणमपनोद्यम् ॥८८॥

---

१. 'व' B.

---

* इदं चिन्त्यं नैल्यस्यापि पाकजत्वात् ।

अज्ञातेऽर्थे तु कथं तद्विषया वक्तृबुद्धिरनुमेया ।
उपमानमपि च मानं गोसदृशो गवय इत्युपाकर्ण्य ॥८९॥

विपिनगतो गोसदृशं पश्यन् गवयोऽयमित्यवैति दृढम् ।
तस्माच्चतुष्प्रमाणी ग्राह्येति न्यायशालिनो ब्रूते ॥९०॥

षोडशपदार्थबोधादेव च निःश्रेयसाप्तिरेतेषाम् ।
विदिता हि षट्पदार्थी नास्तिकवाक्यैर्हि याति सन्देहम् ॥९१॥

जल्पाद्यैस्तान् जित्वा मानाद्यैर्निजमतस्थितिः कार्या ।
मानप्रमेयसंशयफलदृष्टान्तास्तथैव सिद्धान्तः ॥९२॥

अवयवतर्कविनिर्णयवादा जल्पस्ततो वितण्डा च ।
हेत्वाभासाश्छलमपि जातिविभेदाश्च निग्रहस्थानम्[1] ॥९३॥

एवं तु षट्पदार्थाः वैशेषिकानुसारतया मानम् ।
परमाणुसृष्टताद्यं चास्मिन् कणभक्षवत् प्रेक्ष्यम् ॥९४॥

षोडशवस्तुषु चैषु प्रमेयबोधः प्रधानममृताप्त्यै ।
आत्मशरीराक्षार्था बुद्धिश्च मनः प्रवृत्तिदोषौ च ॥९५॥

प्रेत्योद्भवफलदुःखान्यपवर्गो द्वादश प्रमेयाणि ।
एषां तत्त्वविवेकाद् भ्रमादिनाशेन[2] विषयवैराग्यात् ॥९६॥

---

१. 'विग्र' B. २. 'दिरहितः शिवार्चनास्तमलः' इत्यपि पाठः–A, B.

मोक्षेच्छुः स्वात्मानं जीवमनुध्याय सम्यगाकलयन् ।
शिवभजनलब्धयोगात् पूर्वार्जितसुकृतदुष्कृते पश्यन् ॥९७॥

योगकृतैर्बहुदेहैस्ते[1] संक्षिप्यानुभूय संक्षपयन् ।
*सुखदुःखदेहहीनो मुक्तः स्वस्थः शिलावदेवास्ते ॥९८॥

(निरीश्वरसांख्यमतम्)

इदमपि मतं न रम्यं वेदस्य हि नेश्वरो भवेत् कर्ता ।
उपदेष्टैवास्य स्यात् सर्वज्ञः किं स विस्मरेद् वेदान्

तेन हि नित्यान् वेदान् प्रामाण्यं च स्वतो जगुः सांख्याः ।
परमाणुजसृष्टेश्च श्रुतिबाधात् प्रकृतिसृष्टिमेवाहुः ॥१००॥

प्रकृतिः स्वयमेवासौ महदादिजगन्मयी हि परिणमते ।
कपिलपतञ्जलिरचितं निरीश्वरं सेश्वरं च सांख्यं स्यात् ॥१०१॥

तत्राद्ये स्वयमेव प्रकृतिर्जगदात्मना हि परिणमते ।
असतः शशशृङ्गादिवदनुद्भवाद्[2] व्यक्तिरेव सृष्टिः स्यात् ॥१०२॥

प्रकृतेर्महानमुष्मात् त्रिगुणैस्त्र्यंशो भवेदहङ्कारः ।
सत्त्वांशात् तस्य मनो राजसभागाद् दशेन्द्रियाणि स्युः ॥१०३॥

---

१. ते सुकृतदुष्कृते । २. तिले पूर्वं स्थितस्य तैलस्य यथा निष्पीडनेन प्रकाशः (व्यक्तिः) तथा सृष्टिरपि प्राक् तत्कारणे सूक्ष्मरूपेण स्थितस्य प्रकाश एव ।

---

* 'एकविंशतिप्रभेददुःखोच्छेदो मोक्ष इति तार्किकाः कीर्तयन्ति । देहः, षडिन्द्रियाणि, षड् विषयाः, षड् बुद्धयः, सुखं, दुःखं चेत्येकविंशतिप्रभेदं दुःखमाचक्षते' (मानमेयोदयः–P. ८७)

तामसभागाच्छब्दः स्पर्शो रूपं रसश्च गन्धोऽपि ।
[१]तैरेव भूतसूक्ष्मैः कृतानि वियदादिपञ्चभूतानि ॥१०४॥

एतानि प्रकृतिमुखान्यत्र चतुर्विंशतिर्हि तत्त्वानि ।[$]
अक्षानुमानशब्दैस्त्रिभिः प्रमाणैस्तु तानि विज्ञाय ॥१०५॥

*तेभ्यः पुरुषस्य पुनर्विवेकबोधेन मुक्तिरेतेषाम् ।
बन्धक एव तु [२]यागो हिंसायोगेन नरकमिश्रश्च ॥१०६॥

ये तु ध्यानजपाद्या निवृत्तिधर्मास्त एव मोक्षाङ्गम् ।
महदाख्याया बुद्धेः सुखदुःखाद्या गुणा न पुरुषस्य ॥१०७॥

प्रकृतिवियोगात् तेषां विगमो मोक्षः शिलावदत्रापि ।
इति हि निरीश्वरसाख्यं सृष्टावत्रेश्वरस्य नाश्रयणात् ॥१०८॥

(सेश्वरसांख्यमतम्)

सेश्वरसांख्ये तु पुनः प्रकृतिः सृजतीश्वरेक्षणक्षुभिता ।
महदादयोऽत्र तुल्या ईशयुतं[£] पञ्चविंशकं तत्त्वम् ॥१०९॥

---

१. तैरेव–शब्दादिभिरेव । २. 'योगो' B.

---

* 'प्रकृतिपुरुषविवेकज्ञानात् पुरुषस्य स्वरूपावस्थानं मोक्ष इति सांख्याः' (मानमेयोदय P. 88)

$ पुरुषप्रकृतिमहदहङ्कारमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलभूमिषु पञ्चविंशति तत्त्वेषु पुरुषमपहायेदमुक्तिः ।

£ पुरुषः, परः पुरुष, इति भेदे सेश्वरसांख्यानां तत्त्वानि षड्विंशतिः ।

न पुनर्विबोधमा(त्रा मु ? त्रान्मु)क्तिः समलस्य सम्यगस्फुरणात्[1] ।
अष्टाङ्गात् त्विह योगाद् विमलस्याश्वात्मदर्शनान्मोक्षः ॥११०॥

वर्ज्यत्यागोऽत्र यमो हरिभजनादिव्रतं तु नियमः स्यात् ।
पद्माद्यासनमाहुः प्राणायामांस्तु रेचकादींस्त्रीन् ॥१११॥

प्रत्याहारः स्वात् स्वात् समनस्केन्द्रियनिवर्तनं विषयात् ।
मूलाधारप्रभृतौ धारणमनिलस्य[2] धारणामाहुः ॥११२॥

ईश्वरचिन्ता ध्यानं तत्रैव मनोलयः समाधिः स्यात् ।
विद्याविद्यारूपं द्विविधं योगस्य फलमिति प्राहुः ॥११३॥

भक्तिविरागज्ञानं विद्यात्मकमन्यदणिममहिमादि ।
सेश्वरसांख्ये ऽप्यस्मिन् बहवो जीवाः शिलानिभो मोक्षः* ॥११४॥

(प्राभाकरमीमांसादर्शनम्)

मीमांसको न सहते यागादौ दुरितवादिनः सांख्यान् ।
यागे हिंसां शंसन् विधिरेव हि तन्निषेधमपहरते ॥११५॥

कार्यं प्रवर्तकं स्याद्[3] व्युत्पत्तिश्च प्रवृत्तिदृष्टयैव ।
प्राभाकरस्य पक्षे तस्मात् कार्यार्थतैव सकलगिराम् ॥११६॥

---

१. 'मात्र मु' B. २. 'णमा' A. ३. 'स्याद्युत्पत्ति' A.

---

* सेश्वरस्य तत्त्वज्ञानसहकृतो योगो मुक्तिहेतुः इतरस्य योगसहितं तत्त्वज्ञानं मुक्तिहेतुः ।

वेदे तु स्वर्गच्छोर्यागेऽस्मिन् क्षयिणि कार्यधीविरहात् ।
१
यागेनेहापूर्वं कार्यमिति स्याल्लिङो हि मुख्योऽर्थः ॥११७॥

एवं विधिवाक्यमयं शास्त्रं मानं हि वेद एवास्ति ।
पुरुषगिरस्त्वनुवादा वक्तृज्ञानानुमानसिद्धेऽर्थे ॥११८॥

अनुभूतिस्त्विह मानं, स्मृत्यतिरिक्ता च संविदनुभूतिः ।
$नहि कुहचिद् भ्रान्तिमतिर्भेदाग्रह एव शुक्तिरजतादौ ॥११९॥

२
ज्ञानं स्वयंप्रकाशं विषयात्मस्वात्मभानतस्त्रिपुटम् ।
अर्थापत्त्या सार्धं प्राहुः पञ्चैव तु प्रमाणानि ॥१२०॥

नाभावोऽस्ति पदार्थो विषयहृतेः का नु तत्प्रमाणकथा ।
द्रव्यगुणकर्मसंख्या जातिः समवायशक्तिसादृश्यम् ॥१२१॥

अष्टौ सन्ति पदार्था इष्टा न* तु विप्रतादिका जातिः ।
£कार्यार्थ एव वेदो मानं न तु सिद्धवस्तुनि क्वापि ॥१२२॥

---

१. 'यागाद्यतिरिक्तं यत् स्थायि च कार्यं लिङादिवाच्योऽर्थः' इत्यपि पाठः A.
२. 'ज्ञानं यथार्थमखिलं' इत्यपि पाठः A, B. विषयात्मस्वात्मेत्यत्र स्वात्मपदं ज्ञानार्थकम् ।

$ इदं रजतमित्यत्रेदमित्यगृहीतविशेषं शुक्तिशकलं गृह्यते । रजतमिति च रजतमात्रं स्मर्यते । तयोश्च भेदाग्रहात् पुरोवर्तिनि रजतार्थिनः प्रवृत्तिः, न तु शुक्तिशकलस्य रजतत्वेन भानमस्ति' । (मानमेयोदयः P. २)

* जातिबोधस्य पूर्वाकारावमर्शनियतत्वात् तदभावेन सत्त्वशब्दत्वब्राह्मणत्वादीनामभाव इति भावः । £ कार्ये कृतिसाध्ये यागादावेव वेदः प्रमाणम् ।

तेनार्थवादमन्त्रा विधिशेषा एव ‡नो निजार्थपराः ।
*आत्मज्ञेयत्वविधेः शेषत्वात् स्वार्थहानिरुपनिषदाम् ॥१२३॥

†विहितैककर्मकारी मुक्तिं पाषाणवत् स्थितिं लभते ।
नेच्छति चेन्नेच्छतु तां स्वर्गादिसुखे तु कर्मजे रमताम् ॥१२४॥

(कुमारिलमतम्)

सिद्धेऽपि चार्थे भवति प्रमाणं
शब्दोऽयमित्याह कुमारिलार्यः ।
तेनार्थवादोपनिषत्प्रपञ्चोऽ-
प्यबाधितेऽर्थे भवति प्रमाणम् ॥१२५॥

इष्टाभ्युपायत्वधिया प्रवर्तते
तदेव सर्वत्र लिङर्थ इष्यते ।
यजेतशब्दाद् यजिरिष्टसाधनं
त्रिविष्टपेप्सोरिति हि प्रमीयते[1] ॥१२६॥

१: 'प्रतीयते' B.

---

‡ नो निजार्थपराः स्वार्थे तात्पर्यरहिताः ।

* मोक्षार्थमात्मनो ज्ञेयत्वं विधीयते 'आत्मा वारे द्रष्टव्यः' इत्यादिना । तत्र प्राशस्त्यज्ञानमुत्पादयन्त्यः उपनिषदः कृतार्था भवन्ति । तस्मात् तासां स्वार्थे मुख्यं तात्पर्यं नास्ति । अतस्तेषामात्मज्ञेयत्वविधेः शेषत्वम् (अङ्गत्वम्) एव ।

† 'सुखदुःखादिविशेषगुणविलये सति आत्मनः स्वरूपावस्थानं मोक्ष इति प्राभाकराः' (मा–P. ८८)

ततश्च तत्साधनतोपपत्तये

१

कल्प्यं त्वपूर्वं न लिङ्ग्व बोध्यते ।

क्रियोद्भवा शक्तिरपूर्वमुच्यते

फलोदयान्तं वसतीयमात्मनि ।१२७॥

* २

अज्ञाततत्त्वबोधः प्रमाणमस्मिन् प्रमादि चाभिमतम् ।

$इदमिह रजतमितीत्थं तादात्म्यधियान्यथाग्रहाश्रयणात् ॥१२८॥

अस्ति प्राकट्याख्यो धर्मो ज्ञानोद्भवो हि विषयेषु ।

£

ज्ञानं तेनानुमितं न मानसं, न स्वयंप्रकाशं वा ॥१२९॥

---

१. 'लिङ्गेव' B.   २. 'मादिर' B

---

* प्रमाणं प्रमात्मकं ज्ञानं, तस्यापि प्राकट्यरूपप्रमां प्रति कारणत्वात् । प्रमाशब्देन लक्षणया तत्कार्यभूतस्य प्राकट्यस्यापि प्रतिपादनात् तस्यापि प्रमात्वम् । 'तस्मादज्ञाततत्त्वार्थज्ञानसाधनमेव नः । प्रमाणमिति निर्णीतम्' (मा–P. ४)

$ 'तत्तज्ज्ञानस्य स्वविषय एव प्रवृत्तिकरत्वनियमाद् रजतज्ञानस्यापीदंविषयत्वाभावे तत्र प्रवृत्तिर्न सिध्येत्, तथेदमेव रजतमिति सामानाधिकरण्यं तयोरभेदप्रतीतिं विना न सिध्येदित्यादिदिशा निराकरणीयम् ।' (मा – P. ३)

£ तेन प्राकट्येनानुमितम् । 'घटः प्रकाशते' 'घटो भाति' 'प्रकटो घटः' इत्यादयो व्यवहाराः प्राकट्यसाधकाः । एते व्यवहाराः स्वोपपादाय प्रकाशविशिष्टमेवार्थमवकल्पयन्ति । तत्र विशेषगुणभूतः प्रकाशपदार्थः प्राकट्यमित्युच्यते ॥ ज्ञानं मानसप्रत्यक्षमिति तार्किकाः । तन्निरासमाह–न मानसमिति । न मनोजन्यप्रत्यक्षविषयमित्यर्थः ॥ ज्ञानं स्वयंप्रकाशं न ज्ञानान्तरप्रकाश्यमिति प्रभाकरः श्रीशङ्करश्च । तन्निरासमाह – न स्वयंप्रकाशं वेति । आत्मस्वविषयैतत्त्रितयविषयकं न भवतीत्यर्थः । ज्ञातृज्ञानज्ञेयत्रितयविषयकं न भवतीति यावत् ।

वस्त्वस्त्यभावसंज्ञं नास्तीति धियो हि नापरं शरणम् ।
‡ †
तत्पुनरभावमानात् प्रमीयते तेन षट् प्रमाणानि ।।१३०।।

*
द्रव्यगुणकर्मजातीर्भावपदार्थांस्तु चतुर एवाहुः ।
तादात्म्यं हि गुणादेः संबन्धस्तेन नास्ति समवायः ।।१३१।।

सादृश्यमित्यभीष्टो योगो बह्ववयवादिजातीनाम् ।
द्रव्याण्येकादश तु क्षित्याद्या नव च शब्दतमसी च ।।१३२।।

१
प्रत्यक्षाणि दशापि द्रव्याण्यनुमेयमत्र मन एव ।
तिमिरं चाद्यचतुष्कं परमाणुकृतं परे तु षड् विभवः ।।१३३।।

विभुष् च मनआत्मानो ह्यमिता दिक्कालगगनमेकैकम् ।
षडधिकचत्वारिंशद् वर्णाः शब्दाः पृथङ् न दीर्घाद्याः ।।१३४।।

**
अजसंयोगोऽस्ति मिथः सर्वविभूनां निरन्तरात्वात् ।
विहितहतकर्मरूपो धर्माधर्मौ रवश्च नैव गुणाः ।।१३५।।

१· 'नवएव' B·

---

‡ अभावमानादभावाख्यप्रमाणात् ।

† षट् प्रमाणानि प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यभावाख्यानि । अभावोऽनुपलब्धिः 'प्रत्यक्षमनुमानं च शाब्दं चोपमितिस्तथा । अर्थापत्तिरभावश्च, षट् प्रमाणानि मादृशाम् ।। (मा ब. P· 4)

* चतुर एवेत्यनेन विशेषसमवाययोर्निरासः । प्रभाकरमते सादृश्यस्य पृथक् पदार्थत्वं, भाट्टमते तस्य न तथात्वम् । किन्तु बह्ववयवादिजातीनां योग एव सादृश्यम् । अभावः पञ्चमः पदार्थः इति पञ्च पदार्था भाट्टाभिमताः ।

** अजसंयोगो नित्यसंयोगः ।

शक्तिप्राकट्ये द्वे गुणाविहेत्येष तर्कतो भेदः ।
£संस्कृतिगुरुत्वशक्तिज्ञानोनगुणाश्च कर्म चाप्यक्षम् ॥१३६॥

‡ कुलबोधसहकृताक्ष्णा[1] वेद्यैव हि विप्रताविजातिरपि ।
जातिष्वपि सत्ता स्यात् तस्यां[2] सत्ता तु नानवस्थानात् ॥१३७॥

आत्मगुणोऽप्यानन्दो नित्योऽसौ व्यज्यते पुनर्मुक्तौ[3] ।
$काम्य[4]निषिद्धाकरणान्नैमित्तिकनित्ययोस्तथाचरणात् ॥१३८॥

आत्मतत्त्वज्ञानादार्जितभोगाच्च जायते मोक्षः ।
तत्र च नित्यानन्दं मनसैवात्मायमनुभवन्[5]नास्ते ॥१३९॥

---

१. ध्रहेतुनाक्ष्णा' B. २. 'तस्यां स' B. ३. 'परं मुक्तौ' B.
४. 'साम्य' B. ५. 'त्मानमनु' B

£ संस्कारगुरुत्वशक्तिज्ञानातिरिक्तगुणाः प्रत्यक्षाः, कर्म च प्रत्यक्षम् ।

‡ ब्राह्मणकुलोत्पन्नत्वबोधसहकृतेन चक्षुषा विप्रतादिजातिर्गृह्यत इत्यर्थः ।
नैयायिका द्रव्यगुणकर्मस्वेव सत्तां स्वीकुर्वन्ति भाट्टास्तु जातिष्वपि तामभ्युपगच्छान्ति ।

$ दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः ।
आनन्दस्यानुभूतिस्तु मुक्तिरुक्ता कुमारिलैः ॥ (मा. P. P.)
निषिद्धकाम्यकर्मभ्यः सम्यग् व्यावृत्तचेतसः ।
नित्यनैमित्तिकप्रायश्चित्तप्रध्वस्तदुष्कृतेः ॥
सुखदुःखानुभूतिभ्यां क्षीणप्रारब्धकर्मणः ।
मुक्तस्य बाह्यचक्षुरङ्गैः शमदमादिभिः ॥
कुर्वाणस्यात्ममीमांसां वेदान्तोक्तेन वर्त्मना ।
मुक्तिः सम्पद्यते सद्यो नित्यानन्दप्रकाशिनी ॥ (मा P. P. ८८, ८९)

भाट्टप्राभाकरयोरेष विशेषः समं त्विदं* ज्ञेयम् ।
स्वत एव प्रामाण्यं सर्वज्ञो नाम नास्ति कश्चिदपि ॥१४०॥

नित्याः खलु वर्णमयाः शब्दा अपि पदपदार्थसम्बन्धाः ।
वाक्यमपि वेदरूपं कर्तुरभावेन नित्यमेवाहुः ॥१४१॥

नैव हि सृष्टिप्रलयावनुमितिसिद्धस्तु नेश्वरोऽप्यस्ति ।
वेदे स्वतःप्रमाणे तत्सिद्धस्त्वीश्वरोऽत्र मत एव ॥१४२॥

विधिवाक्यैरेकवाक्यं भजन्ति मन्त्रार्थवादनामानि ।
स्मृत्यादिकमार्यवचो मूलाम्नायानुमानतो मानम् ॥१४३॥

धर्मे प्रमाणचिन्ता सेयं प्रथमे** प्रपञ्चिताध्याये ।
भेदो[1]ऽङ्गता प्रयुक्तिः क्रमोऽधिकारोऽतिदेशसामान्यम् ॥१४४॥

---

१. 'वेदो' B.

---

* इदं स्वत एव इत्यादिवक्ष्यमाणम् ।

** प्रथमेऽध्याये— द्वादशाध्यायात्मकस्य पूर्वमीमांसादर्शनस्य प्रथमेऽध्याय इत्यर्थः । प्रथमाध्याये धर्मे वेदस्य प्रामाण्यं प्रत्यक्षादीनां चाप्रामाण्यं प्रसाधितम् । द्वितीये शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयैः षड्भिः प्रमाणैः कर्मभेदो वर्णितः । तृतीये अङ्गत्वबोधकविधिनिरूपणाम् । चतुर्थे आमिक्षादिरूपप्रधान-कर्मणां दध्यानयनादिरूपाणामप्रधानकर्मप्रयुक्तत्वम् एवं वत्सापाकरणादिरूपा, प्रधानकर्मप्रयुक्तत्वं शाखाच्छेदादिरूपकर्मणां च निरूपितम् । पञ्चमे अङ्गप्रधान-योरनुष्ठाने श्रुत्यर्थपाठादिना क्रमो निरूपितः । षष्ठे कर्मणामधिकारी क इति निरूपितम् । सप्तमे प्रकृतिवद्विकृतिः कर्तव्येति सामान्यातिदेशः । अष्टमे पशुयागानां सर्वेषामग्नीषोमीयः प्रकृतिः, तदङ्गानि विकृतिपशुयागेषु कर्तव्यानी

तस्य विशेषश्चोह्यो बाधस्तन्त्रं प्रसङ्ग इत्यर्थाः ।
£या चैव देवतासावुद्देश्येत्येव सा न फलदात्री ॥
कर्मादृष्टादेव तु फलसिद्धिरिहेति पूर्वमीमांसा ॥१४५॥

---

*निर्माय ग्रन्थावाम्नाये द्वे शास्त्राणि मयोर्मम ।
भवद्विषयिणीभावं भवद्भिः क्रियतांतराम् ॥१४६॥

कोलम्बे नागहुतभुग्घ्नेन्दुग्निकृते समे ।
स्वक्षेत्रं संसरत्यर्के सम्यगालेखितं त्विदम्$ ॥१४७॥

त्यादिविशेषातिदेशो निरूपितः । नवमे ऊहः । मन्त्रगतानां देवतादिरूपसंख्यानां वाचका ये शब्दास्तेषां प्रयोगविशेषे सन्दर्भानुसारेण परिवर्तनमूहः । यथा आग्नेये प्रकृतौ 'अग्नये जुष्टं निर्वपामि' इति निर्वापः विकृतौ, सौर्ययागे 'अग्नये' इत्यस्य स्थाने 'सूर्याय' इत्यूह्यते । दशमे बाधनिरूपणम् । तद्यथा-प्राजापत्यान् शतं कृष्णलान् निर्वपेदित्यादौ कृष्णलादीनां व्रीह्याकारत्वप्राप्तौ तेषामवहननप्राप्तौ वितुषीकरणस्याभावादवहननबाधः । एकादशे तन्त्रं निरूपितम् । सकृदनुष्ठानेन बहूनामुपकारात्मकं तन्त्रम् । 'तद्यथा–'आग्नेयोऽष्टाकपालः पुरोडाशः' 'ऐन्द्रं दधि' 'ऐन्द्रं पयः' इति त्रयाणां यागानां पञ्च प्रयाजाः सकृदनुष्ठिता उपकुर्वन्ति । एतादृशमनुष्ठानं तन्त्रेणानुष्ठानमित्युच्यते । द्वादशेऽध्याये प्रसङ्गेनोपकारसिद्धिनिरूपणं कृतम् । यथा लोके आम्रमूले सिक्ते जले आम्रोऽपि सिक्तो भवति पितरश्च तृप्ता भवन्ति तथा पितृकार्ये ... एवं सोमेन पशुयागस्य वपां श्रपयते 'वपयैतस्य चरेत्' 'पोडशेन पशुकर्मणा' इति वाक्येन विहिते पशुयागस्य यदपश्रपणं तद् दर्शपूर्णमासयागयोरप्युपकरोति । स च प्रसङ्गः ॥

£ एतन्मते आनुपूर्वीविशिष्टेन्द्रादिशब्दानामेव देवतात्वात् तेषां चाचेतनत्वान्न कर्मफलदातृत्वं किन्तु कर्मजन्यादृष्टस्यैव फलकारणम् इत्यर्थः ॥

* १४६, १४७ तमौ श्लोकौ A ग्रन्थे न स्तः । B ग्रन्थेऽपि ग्रन्थसमाप्तिसूचकरेखानन्तरमेव ।

$ एतदनन्तरं 'संसरत्यर्के सम्यक् कलिः' इति च दृश्यते । ग्रन्थपरिसमाप्तिकलिदिनसूचकोऽयम् ॥

NOTE

There are three versions of the Gajēndramokṣaprabandha. In the present publication, the version found in the 'Prabandaratnamālika' a compilation of Sri. Mēlputhūr Bhattathiri's Prabandhas is given, as the first and the other two are included as the I and II appendices. The materials used for the I version is the book Prabandharatnamālika, published by B. Kesava Pillai, (1083. Idavam 31 marked क) and the palm-leaf codex No. 15525 ख. of this Library. Manuscript No. 154 E. has been used for the preparation of the II version and the Mss. No. MC. 612. g, for the III version all belonging to this institution.

गजेन्द्रमोक्षप्रबन्धः

पृथ्वीपालाननम्रा(न)तुलितमहिमा वैरभाजो विजित्य
श्रीमान् सामाद्युपायैर्जलनिधिवसनामात्मसात्कृत्य पृथ्वीम् ।
भुक्त्वा भोगानशेषांश्चिरमभिलषितान् मुक्तसङ्गश्च पाण्ड्ये-
ष्विन्द्रद्युम्नाभिधानो (नरपति)रभवन्मग्नचेता मुकुन्दे ॥१॥

[1] नयविनयनिधानं सत्त्ववन्तं तनूजं
विगतविषयरागः सोऽभ्यषिञ्चत् स्वराज्ये ।
हरिचरणनिषेवातत्परा नाद्रियन्ते
सरसिजवसतेरप्यास्पदं किन्नु राज्यम् ॥२॥

सोऽयं त्यक्तविषोपमानविषयो मालेयमालाकुलं
शैलं भासुरमावसन् हि मलयं भूपो वितेने[2] तपः ।
गम्भीरेण च कुम्भयोनिमुनिना शप्तः स्वसम्भावना-
वैमुख्यावशतस्तदैव गमितः सम्भ्रान्तधीः कुम्भिताम्* ॥३॥

---

१. 'विनयनयवि' क.   २. 'वितेपे' क.

---

* सोऽप्यग्रो निजदारदारकसुहृत्सङ्घैरसङ्ख्यैः समं
रूप्यायःकनकाभिरामशिखरे रेमे त्रिकूटे चिरम् ।
विष्वग्विस्फुरिताधिरूढकलशार्कौराशिवीथीशतै-
राधौतामलवप्रदीप्रनवरत्नद्योतिताशान्तरे ॥
इतः परं कैरलमार्गमियमिदं दृश्यते खपाठे।

मुनीन्द्रशापेन गजेन्द्रतामसा-
वावाप्य भूयोऽपि भृशं [illegible]:।
सहैव तस्मिन् विचरन् महागिरौ
निनाय कालं सुचिरं करेणुभिः ॥४॥

अथ कदाचिदतिबहलमदजलप्रक्षाल्यमानपृथुलगण्डस्थलाभ्यर्णपरिभ्रमद्भ्रमरनिकरझ-
ङ्कारमुखरितसकलदिङ्मण्डलो नितान्तनिशितदन्तकुन्तोच्चण्डविदलितगण्डशैलविस्फुरदु-
रविस्फुलिङ्गनिकरविद्योतितविकटकटकप्रदेशः अतिदुःसहमदगन्धमात्रोपलम्भभीतपलायित-
प्रतिगजहरिशरभशार्दूलादिवर्जितात्मसमीपः मदनशरविसरदविरलमदनदहनसदनायमान-
मानसो मदभरघूर्णमानलोचनमरीचिनिचयपरिहसितमधुवर्णोर्णोरुहकेसरसवर्णपूर्णपुष्करबिन्दु-
कर्णकटकरः परिमाणमिवौन्नत्यस्य, परिणाम इवाञ्जनशैलस्य, प्रत्यक्षस्वरूपमिव
मदावलेपस्य, अनुपमकटोऽप्यत्यन्तविकटः, अनेकवशानुयातोऽपि स्ववशः, अनुत्तमप्रतिमानोऽपि
अप्रतिमानः, कासार इव उल्लसत्पुष्करविभूषणः, वदान्य इव अनवरतप्रवृत्तदानो,
रावणराक्षसगण इव प्रहस्तकुम्भकर्णमहापार्श्वातिकायभयङ्करो, वामन इव करकलितदान-
सलिलो, विश्वविहितविक्रमो धनञ्जय इव कर्णताडनरतः, सदारकोऽपि तरूणां विदारकः,
सदावनरतोऽपि गणानाम् अवनरतः, क्वचिच्च लकुचलवङ्गनिचयसल्लकीपनसतालतमालादि-
खाद्यपदार्थवल्लभाभिः समं सञ्चरन्निभमहामहमनुबोभुवन्, क्वचिच्च निशिततरनिजदन्तकुन्त-
सन्ताडितहिन्तालतालनागपूगपुन्नागप्रमुखबहुस्थिरतरास्थिरारुहनिवहप्रस्तरगण्डशैलखण्ड-
नरवानुयायिबृंहितकन्दरीकसरिभमसरभेतरेभहरिमृगकुलावलोकनभीतनिजकलभकरेणुगण-
पर्यवनसमासक्तचित्ततया गणसमीप एव सञ्चरन् स करिवरः शशिकरविशदकलशजलधि-
कल्लोलललितसमास्फालनसञ्जायमानफेनजालपरिवेष्टितकटकप्रदेशतया अमृतमथनसमुद्यत-
सुरासुरनिकरमन्थपरिकल्पितमहोरगपाशपरिणद्धमन्दरमहाचलतुलावलम्बे यक्षगन्धर्वविद्या-
धरकिन्नरचारणाप्सरोगणाधिष्ठितविविधकन्दरोज्जृम्भमाणगम्भीरसङ्गीतानन्दसेवनकुपित-
कण्ठीरवकण्ठारवमुखरितकटप्रदेशे [illegible]नानारण्यमृग-
सकुलानतद्रोण्यालङ्कृते [illegible]बकुलतमालवञ्जुलादिवि-
विधतरुनिकरपरिवृतामरारामसरःसरित्कासारमनोहरे [illegible]
विविधमणिमयबहुशिखरभास्वराभामुखे [illegible]रिव दिग्भिः
सौधैरेकत्र सङ्कृतैरिव महामेरुकैलासाञ्जन[illegible] [illegible] [illegible]रिव

त्रिमूर्तिभिः, सकलसुरसेव्यमानैः [illegible]मयैरभ्रंलिहाग्रैः त्रिभिः शिखरैः त्रिकूट इति यथार्थनामधेये गिरौ करिकलभकरेणुगणपरिवृतः चरणनिपातचलाचलाचलं सञ्चरन् घोरतरनिदाघातपसन्तप्तः तत्रैव क्वचिद् भगवतो वरुणस्य उद्यानमृतुमदभिधान-मभिजगाम ।

यस्मिन् सर्वर्तुयोगात् सकलविटपिनः सर्वदा सर्वपुष्पै-
र्नम्राः कम्रैः फलौघैर्ललितकिसलयैः सन्ति सन्तापशान्त्यै ।
तस्मिन्नप्युन्नतोऽसावनभिहिततनुः छायया पादपाना-
माच्छिन्मूर्च्छां निदाघातपगरिमकृतम्लानिरम्लानदानः ॥५॥

उद्याने तत्र हेमाम्बुरुहपरिमलं सान्द्रमादाय वान्तं
वातं जिघ्रन् विदूरान्मदभरकलुषाघूर्णिताक्षः क्षणेन ।
उद्यत्तृष्णैः सतृष्णैः सह करिकलभैर्धेनुकाभिश्च दैवे-
नाकृष्टो दक्षिणेन स्वयमिव तरसा प्राद्रवद्यूथनाथः ॥६॥

यद् रेजे पारिजाताद्यमरतरुगणैस्तीरजैर्नालिकेर-
द्राक्षेक्षुप्लक्षरम्भाक्रमुककुरवकैः सल्लकीभिस्तथान्यैः ।
नित्यर्तुत्वादवाप्ताखिलनिजविभवैः स्वर्णसौगन्धिकाब्जा-
मोदावासितं यद् विलुलितसलिलं यादसां विभ्रमेण ॥७॥

वेगेनैव विगाह्य तत्र करिणीवृन्दैः सहापीय च
स्वच्छं वारि यथेच्छमाप्लुततनुर्यूथं तथाप्लाव्य च ।
कुम्भोद्गृहीतनीरनिकरैर्जिघ्रन् मजोत्पलका-
स्तस्थौ हन्त गतव्यथो गजपतिर्दीर्घं निशश्वास च ॥८॥

तत्काले अगृहे हठाद् दृढतरं ग्राहेण घोरेण स
श्येनस्फीतशिताग्रदन्तनिकरक्षुण्णाग्रपादं बली ।
आकृष्योत्तरितुं तमाशु यतते स्वोत्पन्नतीव्रव्यथः
फीत्कारध्वनिपूरिताण्डकुहरं गन्तुं न चालं ततः ॥९॥

नक्रोऽप्युग्रपराक्रमो ह्यतिबलं व्याकृष्य नागाधिपं
तोयाभ्यन्तरमानिनीषुरमुचन्नास्याग्रगावं बली ।
विक्रन्दन्तमलं गजेन्द्रमुदके वीक्ष्याकुलं व्याकुला
भीतास्तत्रसुरात्तवत्सकलभा दीनाः करिण्यश्चिरम् ॥१०॥

अपरे बलिनो महागजास्तमथोत्तारयितुं कृतोद्यमाः ।
अपि न प्रबभूवुरीश्वरे विपरीते विफलाः सुहृच्छ्रमाः ॥११॥

तोयस्यान्तर्बहिरथ तयोः कर्षतोर्नेतुमेवं
भूयोभूयः पृथुलबलयोर्नक्रमातङ्गपत्योः ।
दिव्याब्दानां परिणतमभूद् दैवगत्या सहस्रं
दृष्ट्वा देवा विधिविलसितं मेनिरे तद् विचित्रम् ॥१२॥

अहीयत गजेन्द्रस्य बलं काननचारिणः ।
जले जलौकसस्तस्य व्यवर्धंत दिने दिने ॥१३॥

ततः प्रतिक्षणं प्रक्षीणमनोबलौजसस्तु मातङ्गपतेरात्मविमोक्षोपायविषयबहुविध-चिन्तासन्तानेन वा पूर्वजन्माभ्यासेन वा भक्तजनोद्धारणनिपुणचरणारविन्दस्य करुणाकरस्य श्रीनारायणस्यानुग्रहेण वा हृदयोदयगिरौ ज्ञानदिवाकरे समुदिते विनष्टः सपदि मोहान्धकारः ब्रह्मरुद्रादिविबुधज्योतींषि अविपृथक्त्वेन सम्यङ् न प्रचकाशिरे व्यरंसीत् संसृतिरात्रिर्व्य-रोचत मोक्षदिवसावतारः विकसितं च मानससरोरुहम् । ततश्चराचरात्मकमिदं जगद् भगवत्स्वरूपमेवेत्यवधारयतः संसारस्यासारतां निश्चिन्वानस्य जिजीविषारहितस्य मुमुक्षोः पूर्वजन्मा(भ्य)स्तमेव जप्यं जपतो ब्रह्मादिस्तम्बान्तं जगदखिलमपि परब्रह्मतया निर्विशेषमुप (कल्प)यतस्तुवतस्तस्य तथाविधार्तिमुपलभ्यार्ताभ्युपपत्तिदीक्षितो हरिः सत्वरं पुरत आविरासीत् ।

मत्स्यरूप कमठाकृते वरवराहदेह नरसिंह हे
   शस्यवामनतनो भृगूद्वह रघुप्रवीर बल कंसहन् ।
दस्युभूतजननिग्रहाय धृतकल्किवेष भगवन् कृती-
   रस्य सर्वमपि संकटं त्वमिह पद्मनाभ विरलीकुरु ॥१४॥

आक्रन्दं नक्रभीतद्विरदवरमुखोद्गीर्णमाकर्ण्य तूर्णं
   सौपर्णे स्वर्णवर्णे गरुति कृतपदः पूर्णकारुण्यराशिः ।
कल्पान्तार्काभचक्राद्यभिलसितभुजश्चारुभूषाप्तशोभो
   भास्वत्पीताम्बरोऽथाम्बुदसदृशरुचिः प्रादुरासीत् स देवः ॥१५॥

दृष्ट्वा तस्य तथाविधं स भगवान् दुःखं दयावारिधि-
   स्तार्क्ष्यात् क्षिप्रमथावतीर्य सरसः सग्राहमुद्धृत्य तम् ।
पश्यत्यम्बरसीम्नि दिव्यनिवहे चक्रेण नक्राननं
   भित्त्वाऽमोचयदीडितः सुमनसो वर्षद्भिरिन्द्रादिभिः ॥१६॥

विष्णोश्चक्रविपाटितः स झटिति त्यक्त्वाऽऽत्मनो नक्रतां
   क्रूरां देवलशापजामथ भिदां तन्मा(न्ध? न)द्भिन्नां तनुम् ।
हूहूः पूर्ववदिन्द्रपार्श्वमगमत् गायन् हरेर्विक्रमं
   होहोत्यम्बरचारिभिः सकुतुकं दृष्टः स गन्धर्वराट् ॥१७॥

इति स भगवानुग्राहक्रमाद् गजेन्द्रमकल्मषं
   सपदि विरहय्यास्मै दत्वा तदात्मसरूपताम् ।
गरुडमधिरुह्यावेनाम्भा विमानततिभिर्वृतः
   स्वपदमगमद् वैकुण्ठाख्यं विभुः परमाद्भुतम् ॥१८॥

द्विपेन्द्रमोक्षनामाढ्यं [illegible] विनिर्मितम् ।
प्रबन्धमर्थि[illegible] [illegible] ॥१९॥

इति [illegible] समाप्तम् ।

II VERSION

[illegible]

उत्तुङ्गमस्तकविराजितराजबालं
मत्तद्विपेन्द्रकरपूरणशीर्षमूर्ति ।
[illegible]
चित्ते [illegible] मम [illegible] ॥१॥

चतुर्भुजं शङ्ख[illegible]शोभितम् ।
[illegible] बालं मुकुन्दं शरणं व्रजे ॥२॥

अस्ति श्रीमान् [illegible]त्रिकूटा[illegible]
[illegible] ।
औन्नत्यं योजनानामयुत[illegible]
[illegible]: स[illegible]ऽस्ति[illegible] ॥३॥

योऽयं पादतलालसन्[illegible]
जालैः [illegible] नितरां [illegible]: [illegible] ।
यस्मिन् दिव्यजनेन्दुसुन्दरमु[illegible]
[illegible] ॥४॥

अस्ति हि समस्तगुणालयस्य महीतलैकभूषणस्य महीधरस्यास्य कुत्रचन सानुसीमनि भगवतो वरुणस्य सर्वकालसञ्जायमानसरमसविकसदखिलवसुमनोजालप्रसृमरबहलपरिमलकन्दलीसमाकृष्यमाणैः [illegible] विवशीकृताशयैः मुहुर्मुहुरनुभूयमानमधुरिमाधरीकृतामृतमकरन्दसपीतिमेदुरसम्मदाकुलनिजकुटुम्बिनीजनाश्रितसमझङ्कारसञ्चारमाधरद्भिः [illegible] रतिविलसलङ्कृतैः, इतस्ततो वलमानपवमान[illegible] [illegible]रितकोमलमुकुलजालकं निबिरीसरोमहर्षमिवाबिभ्रतीभिः तुङ्गतरतरुविटपकोटिसन्ताडितसञ्चरदम्बुदकदम्बनिष्यन्दितशीकरनिकरैरुल्लसितघर्मजलबिन्दुभिरिव समलङ्कृताभिः स्मरतरशर्करालताभिर्वनिताभिरिव लताभिरशिथिलकु[illegible], परि[illegible] [illegible]सस्वत्वनेकप्रसुप्तहृदयैरशेषविशामण्डलेभ्यः समागतैः सरसतरकलकलरवमुखरितहरिदन्तरैः तित्तिरिशुकपिकप्रमुखैरसंख्यैर्विष्किरनिकरैरुपशोभितशिखरदेशैः, मन्दारपारिजातपाटलाशोकचम्पकचूतप्रियालपनसा[illegible]कर्पूर[illegible]वकुल[illegible]कुटजपक्षवृक्षशिंशपचन्दनपिचुमन्दकोविदारसरलदेवदारुद्राक्षेक्षुरम्भाजम्बूबदर्यंशामलकबिल्वकपित्थजम्बीरभल्लातकप्रमुखैरनेकैरनोकहैः सर्वतः संवीभूयमानभूरिशोभं, कीर(न?)निकरतुण्डकोटिपरिखण्डितपरिणतडाडिमवल्लरीफलरसार्द्रीकृतान्तरभागैः निरन्तरनिर्गलदनल्पतरपुष्परेणुसुरभिलैः विरहिजनविरचितविविधकुसुमपल्लवपर्यङ्कसङ्कपरिभासुरैः ताम्बूलवल्लरीसमारूढपूगसन्दोहसन्देदीप्यमानपर्यन्तैः लक्ष्मीविहारमन्दिरैरिव मनोहरैर्लतामण्डपैर्भास्यमानं, प्रणयभाराकुलाभिः प्रणयिनीभिः सह संक्रीडमानैः सिद्धविद्याधरमुखैरशेषैरपि देवविशेषैराकीर्णसकलभागं, क्वचिदिन्द्रमन्दिरमिवाशोकसुमनोगणाश्रितं, कुत्रचित् पातालमिव विराजमाननागसङ्गं, कुहचन दशकण्ठपुरमिव पलाशगणसङ्कुलं, क्वचन युधिष्ठिरनगरमिवार्जुनवीक्षणीयं, क्वचि[illegible]मिव तरुणहरिणपरिभासुरं, कुत्रचिद् दाशरथिकराम्बुजमिव बाणासनदर्शनीयं, क्वचित् समरभूतलमिव शिलीमुखसमावृतं, कुत्रचिदनङ्गजयलावण्यमिव माधवीमनोहरं, कुहचन कामिनीवदनमिव तिलकोल्लासितं, कुत्रचन नारायणशरीर[illegible]सुन्दरं, [illegible] [illegible]मिव नीलकण्ठनिवासभूतं, निरतिशयानन्दसन्दायि[illegible] निखिलजनमनोभिरामम् आरामवरं [illegible]नाम ।

उद्यानेऽस्मिन् मृदुगमजगत्प्राणवेल्लत्प्रफुल्ल-
स्वर्णाम्भोजप्रकरविसरद्भूरिसौरभ्यभारि ।
सम्भ्राम्यद्भिर्मधुरतरझङ्कारिभिश्चञ्चलीकै-
रञ्चच्छोभं विलसति सरः किञ्चनाऽलं विशालम् ॥ ५ ॥

कूजद्भिः कलनिस्वनं बिसलतामास्वाद्य हृष्टैः सदा
यस्मिन् सारसहंसमुख्यविहगद्वन्द्वैररं[1] रम्यते ।
कल्हारोत्पलपङ्कजाविरजसां जालैरलं भासुरं
यद्वार्यम्बुदवद् विभाति कमलाक्षीणां गणैश्चञ्चलम् ॥६॥

यद्भिन्तालतमालताम्रकुतमालाम्रातकाम्र विभि-
नित्योत्फुल्लनवप्रसूनफलजालोल्लासिभिस्तीरजैः ।
शोभां भूरितरां वहन्खगगणैरामोदिनीं यत्तटी-
मेत्य स्वीयवधूभिराप्त सुखं विश्रामसिद्धाश्रयः ॥७॥

तत्र च कदाचन तस्य शिलोच्चयस्य वनावनीनिकेतनः कश्चन वनवारणवरो महामहीधरप्रतिमोदग्रविग्रहः समग्रानपि मृगग्रामान् निजावलोकनमात्रेण वित्रासयन् अनवरतनिष्यन्दमानदानवारिपङ्किलगण्डमण्डलीकण्डूतिकृतिसञ्चूर्णितसालमण्डलः स्वकीयगन्धसमाघ्राणजातभीतिवशाद् दूरविद्रुतपुण्डरीकषण्डः स्वयं निदाघतापप्रतप्तः सलिलाशयं गवेषयन् करेणुभिः परिवृतः कलभानुद्रुतः पदविन्यासगरिमभरेण तं गिरिवरं परितः प्रकम्पयन् मदगन्धलुब्धमधुरझङ्कारसञ्चारिभ्रमरपटलोपडीनोड्डीनविराजमानकटप्रदेशो मन्दमन्दमस्य सरोवरस्योपकण्ठमुपाढौकत ।

तस्मिन् विगाह्य सरसे सरसि प्रमोदात्
तोयं सुधामधुरमागलमापिपाय ।
आसि(ञ्च्य? च्य) कायमपि पुष्करसंभृताद्भिः
सन्तापशान्तिमयमाप महागजेन्द्रः ॥८॥

कलभान् करिणीश्च पाययन् निजशुण्डापयसा च सेचयन् ।
स्वयमप्यधिकं पयः पिबन् चिरमस्मिन् विजहार स द्विपः ॥९॥

१ 'द्वन्द्वैः परिक्रीडितम्' इत्यादर्शे ग्रन्थे पाठान्तरम् ।

करिवरमिति तं विहारलोलं नियतिवशात् सरसीपयस्सु मग्नम् ।
प्रतिपदमचिराद् गृहीतवान् कोऽप्यमितबलोग्रपराक्रमोऽथ नक्रः ॥१०॥

ग्राहेण कृष्यमाणोऽसौ बलीयानपि वारणः ।
न शशाक तटं गन्तुं तदा वैवश्यमाप्तवान् ॥११॥

करेणवश्चुक्रुशुरित्थमुच्चैः
स्वयूथनाथं प्रसमीक्ष्य खिन्नम् ।
पार्ष्णिग्रहास्तैः कलभैः सहैता-
स्तीरं समारोपयितुं न शेकुः ॥१२॥

अनन्तरमित्थमेव बद्धरोषं युध्यतोरन्योन्यं यथाबलं विकर्षतोः परमरोषपरुषान्तरङ्ग-योर्नियुद्धविस्मापितसिद्धविद्याधरमुख्यदेवविशेषयोरक्षीणयोरनयोर्दन्तिनक्रयोर्वत्सरसाहस्रकेऽतिक्रान्ते कालबलात् प्रक्षीणसकलकरणबलस्य तस्य करिवरस्य पूर्वजन्मसमार्जितमहितपुण्य-पूरपरिपाकात् "कथमहमात्मप्रभावेनामुतो विधातृपाशरूपाद् ग्राहादात्मानं मोचयितुं पारयेयं, कथं वा इमाः करिण्यः कलभाश्च मां विमोचयितुं समर्था भवेयुः, यद्भयेन पङ्कजासनसङ्क्रन्दनप्रमुखाः समस्तदिगीशा अप्यन्ये च सर्वे यदाज्ञारूपां निजनिजधुरमुद्वहन्ति तमशेषलोकैकनाथमीश्वरमृतेऽन्यः कश्चन मदीयामिमां पीडामुन्मूलयितुं न प्रभुः, अतोऽहममुमेव भक्तवत्सलं भगवन्तं शरणं भजामी"ति मतिरुत्पनीपद्यते स्म ।

निश्चित्य बुद्ध्येवमसौ महात्मा करी परं भक्तिभरावनम्रः ।
त्रैलोक्यनाथस्य महत्त्वमन्तः समाकलय्येत्थममुं समस्तौत् ॥१३॥

यद्रूपानवबोधतो जगदिदं विश्वं हि सञ्जायते
यज्ज्ञानाच्च विलीयते सकरणं रज्ज्वामिवाशीविषः ।
यस्माज्जातमिदं यदेव सकलं चैतद् यदस्मात् परं
तस्मै सत्यसुखात्मकाय महसे कुर्वे नमस्यामहम् ॥१४॥

यो व्याश्नुवानो वसुधादि सर्वं विक्रम्यतिक्रम्य वशोत्तरं पदम् ।
सहस्रमूर्ध्ने पुरुषाय भूयसे तस्मै नमोऽनन्तदृगङ्घ्रिबाहवे ॥१५॥

स्रष्टुं विश्वमशेषमेतदवितुं संहर्तुमात्मीयया
शक्त्या यश्च गुणत्रयीमयमुपादत्ते शरीरत्रयम् ।
तस्मै निर्गुणरूपिणे त्रिजगतामीशाय निर्विक्रिय-
व्यापाराय निरीश्वराय करुणाधाम्ने नमस्कुर्महे ॥१६॥

अतिक्रान्ते काले लयमुपगते विश्वभुवने-
प्यविद्यां भूतेषु क्रमश उपयातेष्वथ निजे ।
प्रलीनायामस्यामविलयि महो यच्च परमं
प्रपद्ये सत्यं तच्छरणमहमाद्यन्तरहितम् ॥१७॥

नित्यानित्यविवेकिनः शमरता मुक्ता विमुक्तिं परा-
मिच्छन्तो मुनयः समेत्य विपिनं भीमं तपः कुर्वते ।
यद्बोधाय यमादिपूतहृदयाः सोऽयं त्रयीदुर्गमो
देवः सम्प्रति सम्भवेन्मम गतिः सर्वैकहेतुः परः ॥१८॥

ततश्चैवं केवलात्मन्यात्मनि परमपुरुषे भक्तिभाराद् बहुप्रकारमुदीरितैः स्तुतिरवैरा-क्रन्दति तस्मिन् महागजे करुणाकरनामा स भगवान् भक्तसन्तापसन्दर्शनदयालुहृदयः सहसैव तत्परित्राणमादधातुं भक्तिभारनमत्कन्धरं धराधरप्रतिमाकृतिं प्रभानिन्दितकाञ्चनं महाहिभूषणं महानुभावं भगवदाज्ञैकप्रतीक्षं छन्दोमयं तं पक्षिराजं गरुडमधिरुह्य सिद्धविद्याधरकिन्नरादिदिव्यजनैरनवरतमनेकविधप्रस्तुतस्तुतिकोलाहलैरखिला अपि दिशा बधिरिताः कुर्वाणैः सनन्दादिभक्तवृन्दैरन्यैरपि धन्यैः शतमन्युप्रमुखैरखिलदिशाधीश्वरैरशेषैश्च पार्षदैः परीतः तत्सरःपरिसरमुपसरन् मकुटकटककुण्डलवलयकौस्तुभवनमालादिनानाभूषणै-रतितरां परिभासुरशरीरमरीचिसमुज्ज्वलः तस्य पतत्रिराजस्य कण्ठतलमतिसुन्दरमलङ्कुर्वाणः शरणाश्रितजनेषु निरन्तरनिरित्वरकरुणामयामृतझरीनिष्यन्दनिर्भरसमार्द्रितदृगन्तदेशः सकलसज्जनोपद्रवगर्वितदुर्जनविगर्वीकरणालंकर्मीणम् अविरतप्रसृमरमहःप्रसरदुर्दर्शं सुदर्श-नाभिधानं निजायुधवरं करतलेनोद्वहन् मन्दहासकन्दलीचिक्कणीकृतमुखारविन्दोऽस्य पुरतः प्रादुरासीत् ।

दृष्ट्वा देवं तदैवं गरुडगलगतं पुष्करे पुष्कराक्षं
  मोदादुत्क्षिप्य सोऽयं सपदि करिवरः पुष्करं पुष्कराद्यम् ।
विष्णो विश्वैकबन्धो जय जय करुणावास तुभ्यं नमस्ते
  दीनं त्वत्पादपाथोरुहशरणमिमं पाहि मामित्यवादीत् ।।१९।।

एवं वीक्ष्य तदा तमुद्यदनुकम्पार्द्रेक्षणः स प्रभुः
  पक्षीन्द्रादवतीर्य मङ्क्षु सरसः सग्राहमुत्तारयन् ।
चक्रेणार्कसमप्रभेण दलयन् नक्रास्यमभ्रान्ति(तः? दः)
  कुम्भीन्द्रं तममूमुचद् व्यसनतः पश्यत्सु देवादिषु ।।२०।।

तदा ब्रह्मेशाद्या ववृषुरमराः पुष्पविसरं
  प्रशंसन्तश्चित्रं चरितमजितस्यैतदनिशम् ।
निनादो वाद्यानामजनि दिवि देवेषु कतिचि-
  ज्जगुः केचिन्मोदान्ननृतुरपरे तत्र नुनुवुः ।।२१।।

मुक्तो नक्रः सपदि स तदा देवलाख्यस्य शापा-
  द्धूहूसंज्ञः समजनि च गन्धर्वराडद्भुताङ्गः ।
स्तुत्वा देवं तमथ नितरां भक्तिभारावनम्रो
  नत्वा भूयस्तदनुमतिमन्वासदत् स्वीयलोकम् ।।२२।।

इन्द्रद्युम्न इतीरितो नरपतिः पूर्वं पुनस्तादृशं
  नागेन्द्रत्वमगस्त्यशापबलतः संप्राप्य यो जातवान् ।
चित्रं चित्रमयं तदा त्रिजगतां नाथस्य कारुण्यत-
  स्तत्सारूप्यमवाप पीतवसनश्रीवत्सकाद्यङ्कितः ।।२३।।

संप्राप्तमाह भगवानिति पार्षदत्वं
  मां त्वां चरित्रमिदमप्यपि मद्विभूतीः ।
तथ्याश्च यः स्मरति पूतमनाः प्रभाते
  मुक्तो भविष्यति दृढं निखिलाघमोघात् ।।२४।।

लोकानुग्रहरूपिणीं गिरमिमामुच्चार्य तस्मिन् क्षणे
प्रध्माय स्वदरं गभीरममरानानन्दयन् स प्रभुः ।
आरूढो गरुडस्य कण्ठममुना सारूप्यभाजा समं
प्रायात् स्वं पदमिन्द्रमुख्यदिविजैरुद्गीतसत्कर्मकः ॥२५॥

इत्थं भक्तिवधूधूतमानसेन मया प्रभो ।
प्रणीतं चरितं देव तावकं तत् प्रसीद मे ॥२६॥

III VERSION

इन्द्रद्युम्न इति त्रिलोकविदितः पाण्ड्याधिराजः पुरा
पुत्रे राज्यभरं निधाय मलये तन्वंस्तपो दुश्चरम् ।
आतिथ्याकरणादगस्त्यमुनिना शप्तः समाधिस्थितो
दुग्धाम्भोनिधिमध्यभाजि गजतामापत् त्रिकूटाचले ॥१॥

तदनु चायम् अतनुमदमदनानुरोधवीतबाधचेताः वासनानुगत्या नित्यानुबद्धहरिध्यानशक्तिः अनुरक्तानेकहस्तिनीपरिवारितः दूरतोनिरस्तसमस्तसत्त्वजातः यूथमापालयन् देवालयदन्तिनामपि स्पृहणीयचरितः परितस्त्रिकूटाचलम् अतिपेशलदळबहळपरिमळतालतमालहिन्तालरसालनाळिकेरपूगषण्डपुंड्रेक्षुरम्भाकळमफुल्लसल्लकीपनससरळैलादिविपिनविहरण विनोदाविदितगळितबहुकालः कदाचिद् ऊष्मळग्रीष्मतापासहिष्णून् गणान् प्राचेतसं सरोवरं प्रणीय पानीयपानविहरणमृणाळाहरणाभ्यवहारादिभिः वीतखेदान् विधाय अतिचिरं स्वैरलीलामाकलय देवलोकगाथकेन हूहूनामकेन देवलमुनिशापप्राहितग्राहाकृतिना गृहीतचरणो विमोचनासमर्थेषु विहितभयबृंहितसंहिताकाण्डप्रळयघनघटास्तनितशङ्कातङ्कितशेषजन्तुजातेषु यूथेषु तूर्णोत्तीर्णेषु देशदशाविशेषवशात् विशालबलविक्रमोपक्रमोदग्रेण समं ग्राहपतिना संग्रामकेलिभिः कमपि समयं गमयन् भ्रमयन्नभिमतानुवर्तीनि निर्धूतकुहरपाथांसि इतरयावांसि, रमयन् अनामयपिशुनैरपि समाश्वासनजजंनैसविलासनयन्वलनौ अवशं वशायूथं क्रमेण वत्सरसहस्रावसाने मत्सरिणां मदं शमयितुं दमयितुं च मनः विहिताध्यवसितैर्नियतैः प्रभावात् इभाधिराजः परा*

---

* इतःपरं न दृश्यते

उडुजातकोदयः

मिश्रप्रकरणम् ।

गणेशवाणीविधिविष्णुशङ्करा-[1]
दिनेन्दुभौमज्ञगुरूशनश्शनीन् ।
प्रणम्य पाताच्चग्रहांश्च सद्गणा-
नुदाहरिष्याम्युडुजातकोदयम् ॥१॥

विज्ञाय जन्मनि खगस्थितिमृक्षहोरा-
द्रेक्काणभांशभसमांशकविंशत्रयांशान् ।
जन्मायुषोरधिपयोस्तु [illegible]
संपद्विपत् सतत[illegible] [illegible] ॥२॥

विचिन्त्य[2] पक्षादितिथित्रिके[3] बलं
दिने[4] समोत्कृष्टलघूडुजं वदेत् ।
दिनेशजन्मेशसुहृत्समारिभिः
सुदीर्घमध्याल्पकजीवितं नृणाम् ॥३॥

संपूर्णपूर्णचरणोनदलांशपाद-
पादार्धमन्दपरिहीनमितोवपुः[illegible]म् ।
अत्युच्चतुङ्गनिजमित्रसमारिनीच-
क्षेत्रादिमौढ्यसहितैः फलमत्र[5] खेटैः ॥४॥

---

१ बालेन्दुतवि ख । २ [illegible] क च ३ दिने क, ङ ४ बलं च
४ फलं ग ङ ५ ङ पादे: ॥ क च

तनु नय सिनि[1] आया स्तुत्य धन्या सेढा[2] सो[3]

नर[4] इति विदुरब्दान् बह्निपूर्वोडुपानाम् ।

रविशशिकुजनागस्वर्गसंपूजितार्क-

प्रमव[5]विधुकेतूक्षाधिपानां ग्रहाणाम् ॥१३॥

उडूर्ध्वनाडीभिरुडुप्रभोर्वशां

निहत्य नीतेन हृताः समाः [illegible]ः ।

पुनः प्रियेणापि[6] नगेन [illegible]

भवन्ति मासा दिवसा यथाक्रमम् ॥१४॥

[7]

इष्टर्क्षाब्दगणादहस्कृततनोरूर्ध्वोडुसंवत्सरै-

रभ्यस्ताद् दिवसीकृतैरथ हरेभागैरि[illegible]ः ।

लब्धास्ते दिवसाः [illegible]

नीताः[8] स्युर्घटिका भवन्ति [illegible]

[illegible] ॥१५॥

---

१. सनु—क; सनि—ङ, च. २. स्सीका—ग. ३. सुनर—ग.

४. ति च समाः स्युर्वह्नि—ग. ५. [illegible] ॥ च.

६. प्रियानेन न क, ग. ७. One sloka extra appears in च.

स्वदशत्रिगुणं विद्यात् स्ववशात्परिवर्तके ।

त्रिशद् भाजिते मासे मासाद् ब्रवसवत्सरे ॥ च.

८. ता का घ—ग.

स्वसमहृतनिजायुःपिण्डतो [illegible]
फलमथ निजमायुस्तद् भवेत् [illegible] ।
विशति खगवरो यस्तस्य संवत्सरघ्नात्
पुनरपि निरयाप्तं यत्तदस्यान्तरायुः ॥१६॥

[१]इति मिश्रप्रकरणम् ।

रविदशाप्रकरणम्

अथ तरणिदशायां क्रौर्यभूपाग्निवृद्धे-
र्धनमनलचतुष्पात्पीडनं नेत्रतापः ।
ज्वरदशनरोगः पुत्रदारार्तिरुच्चै-
र्गुरुजनविरहः स्याद् भृत्यनाशोऽर्थहानिः ॥१॥

रिपुक्षयो[२] गदशमनो[३] धनागमः
[४]कृषिक्रिया गृहकरणं सुहृद्युतिः ।
क्षयानिलप्रतिहृतिरर्कदायकं
शशी यदा विशति भवेद्वपुष्मताम् ॥२॥

[५]महीभृतो भवति भयं धनच्युती
रुगागमः पदविरहोऽरिपीडनम् ।
व्रणोद्भवो विविधजनैर्विरोधिता
कुजो[६] यदापहरति सूर्यदायकम् ॥३॥

---

१. This line is dropped in ख. Ms. च ends here. २. यो व्याधिशमो ध-ग, घ, ङ. ३. गमो—ग, घ. ४. गृहक्रिया कृषिक—ग, घ. ५. भृतां च-ख. ६. दा हरति च सू—ख.

रिपूक्षयो धनहृतिरांगुङ्गनि
विषाद्भयं विषयविमूढता पुनः ।
शिरोदृशोरधिकरुगेव देहिना-
महौ भवे[1]दहिमकरायुराहृते ॥४॥

रिपुक्षयो विविधधनाप्तिरन्वहं
सुरार्चनं द्विजगुरुबन्धुपूजनम् ।
श्रवश्रमो भवति च कमरोगता
गिरांपतौ प्रविशति गोपतेर्दशाम् ॥५॥

धनाहृ[2]तिः सुतविरहः स्त्रियो रुजा
रिपु[3]व्यथा भवति परिच्छदच्युतिः ।
म[4]लिष्ठ[5]ता पवनकफप्रपीडनं
शनैश्चरे सवितृदशान्तरं गते ॥६॥

विर्चाचिका पिटकसकुष्ठकामिला
वि[6]कत्थनं कटिजठरप्रपीडनम् ।
महीक्षयस्त्रिगदभवो भवेत्तदा
विधोः सुत[7]श्चरति यदार्कवत्सरम् ॥७॥

---

1. राहरेत् ॥ क. 2. नाहृतिः क, घ. 3. गुरुव्य-घ. 4. लिवता-क, घ, ङ.
5. ता भवति क-घ. 6. कतंनं-क. 7. सुते हरति धीरताद्यकम् ॥ घ.

सुहृद्वधः स्वजनकुटुम्बविग्रहो
रिपोर्भयं धनहरणं पदच्युतिः ।
गुरोर्गवरुवरुजशिरोरुगुच्चकं:[1]
शिखी यदा विशति दशां विवस्वतः ।।८।।
शिरोरुजा[2] जठरगलाक्षिपीडनं[3]
कृषिक्रियागृहधनधान्यविच्युतिः ।[4]
सुतस्त्रियोरसुखमतीव देहिनां
भृगोः सुते हरति रवेरथाब्दकम् ।।९।।

इति रविदशाप्रकरणम्[5]

चन्द्रदशाप्रकरणम्

शिशिरकरदशायां मन्त्रदेवद्विजोर्वी-
पतिजनितविभूतिः स्त्रीधनक्षेत्रसिद्धिः ।
कुसुमवसनभूषा गन्धनानारसाप्ति-
र्भवति बलविरोधोऽर्थक्षयो वातरोगः[6] ।।१।।
पित्तवह्निरुधिरोद्भवा रुजा[7]
क्लेशदुःखरिपुचोरपीडनम् ।

---

१. जरुगुच्चकंस्तदा—ग. २. रगुदाक्षि—क. ३. गदार्तिपी—ख. ४. कृष-क्रियापशु ध—क. ५. This line is dropped in ख. ६. रोगः स्वजन—क.

७. रविभवात्पितरुसौगुरुक्रमो
मुमुदेत्तमतमापमो भवेत् ।
मातुरिष्टफलमंगनासुखं
स्वां दशां विशति शीतदीधितौ ।। This sloka appears extra in घ:

ष

[1]वित्तदानविहृतिर्भवेत् कुजे
शीतदीधितिदशान्तरं गते ॥२॥

तीव्ररोषरिपुबुद्धिबन्धुरुक्-
[2]मारुताशनिकफार्तिजं भयम् ।
अन्नपानजनित[3]ज्वरावय-
श्चन्द्रवत्सरविहारकेऽप्यहौ ॥३॥

दानधर्मनिरतिः सुखोदयो
वस्त्रभूषणसुहृत्सुतागमः ।
राजसत्कृतिरतीव जायते
कैरवप्रियवयोहरे गुरौ ॥४॥

नैकरोगविहृतिः [4]सुहृद्धन-
स्त्रीरुजा व्यसनसंभवो महान् ।
प्राणहानिरथवा भ[5]वेच्छनौ
[6]मारबन्धुवयसोऽन्तरं गते ॥५॥

---

१. समान—ख, ग. २. निर्भयं च विग्रहः । ग; निर्भयार्तिरुग्भवेत् । ख; निर्भयार्तिरुग्भवेत् । घ. ३. ज्वरोद—ग. ४. हृत्सुत—घ. ५. वेन्मृदौ—ख, ग, घ. ६. तार—घ.

सर्व[1]तो धन[2]रथाश्व[3]गोकुल–
प्राप्तिराभरणसौख्यसम्भवः[4]
[5]चित्तबोध इति जायते विधो-
रा[6]युषि प्रविशते यदा [7]बुधः ॥६॥

चित्तचञ्चलमथा[8]र्थविच्युति–
ब[9]न्धुहानिरपि तोयजं भयम् ।
दासभृत्यहृतिरस्ति देहिनां
केतुके हरति चन्द्र[10]दायकम् ॥७॥

तोययानवसुभूषणाङ्गना–
विक्रयक्रयकृषिक्रियादयः ।
पुत्र[11]मित्रपशुधान्यसंयुति–
श्चन्द्रदायहरणोन्मुखे भृगौ ॥८॥

राजमाननमतीव शूरता
रोगशान्तिररिपक्षविच्युतिः ।
पित्तवातरुगिने गते तदा
स्याच्छशाङ्कपरिवत्सरान्तरम् ॥९॥

[12]इति चन्द्रदशाप्रकरणम् ।

---

१. दा–घ. २. गजाश्व–घ. ३. सं–ग. ४. म्पदः–ग, घ. ५. पित्तबाध–क, ख. ६. युरन्तरगते–घ. ७. धे–घ. ८. मनर्थ–क, ख, ग. ९. न्धुनाशमथ तो–क, १०. ति चान्द्रमब्दकम् ॥ ग, घ. ११. वधनधा–घ. १२. This line is dropped in ख.

लोकानुग्रहरूपिणीं गिरमिमामुच्चार्य तस्मिन् क्षणे
प्रध्माय स्वदरं गभीरममरानानन्दयन् स प्रभुः ।
आरूढो गरुडस्य कण्ठममुना सारूप्यभाजा समं
प्रायात् स्वं पदमिन्द्रमुख्यदिविजैरुद्गीतसत्कर्मकः ॥२५॥

इत्थं भक्तिवधूधूतमानसेन मया प्रभो ।
प्रणीतं चरितं देव तावकं तत् प्रसीद मे ॥२६॥

III VERSION

इन्द्रद्युम्न इति त्रिलोकविदितः पाण्ड्याधिराजः पुरा
पुत्रे राज्यभरं निधाय मलये तन्वंस्तपो दुश्चरम् ।
आतिथ्याकरणादगस्त्यमुनिना शप्तः समाधिस्थितो
दुग्धाम्भोनिधिमध्यभाजि गजतामापत् त्रिकूटाचले ॥१॥

तदनु चायम् अतनुमदमदनानुरोधवीतबाधचेताः वासनानुगत्या नित्यानुबद्धहरिध्यानशक्तिः अनुरक्तानेकहस्तिनीपरिवारितः दूरतोनिरस्तसमस्तसत्त्वजातः यूथमापालयन् देवालयदन्तिनामपि स्पृहणीयचरितः परितस्त्रिकूटाचलम् अतिपेशलदळबहळपरिमळतालतमालहिन्तालरसालनाळिकेरपूगषण्डपुंड्रेक्षुरम्भाकळमफुल्लसल्लकीपनससरळैलादि-विपिनविहरण विनोदाविदितगळितबहुकालः कदाचिद् ऊष्मळग्रीष्मतापासहिष्णून् गणान् प्राचेतसं सरोवरं प्रणीय पानीयपानविहरणमृणाळाहरणाभ्यवहारादिभिः वीतखेदान् विधाय अतिचिरं स्वैरलीलामाकलय देवलोकगाथकेन हूहूनामकेन देवलमुनिशापग्राहितग्राहाकृतिना गृहीतचरणो विमोचनासमर्थेषु विहितभयबृंहितसंहिताकाण्डप्रळयघनघटास्तनितशङ्कातङ्कितशेषजन्तुजातेषु यूथेषु तूर्णोत्तीर्णेषु देशदशाविशेषवशात् विशालबलविक्रमोपक्रमोदग्रेण समं ग्राहपतिना संग्रामकेलिभिः कमपि समयं गमयन् भ्रमयन्नभिमतानुवर्तीनि निर्धूतकुहरपाथांसि इतरयावांसि, रमयन् अनामयपिशुनैरपि समाश्वासनजनैःसविलासनयन्वलनौ अवशं वशायूथं क्रमेण वत्सरसहस्रावसाने मत्सरिणां मदं शमयितुं दमयितुं च मनः विहिताध्यवसितेर्नियतेः प्रभावात् इभाधिराजः परा*

---

* इतःपरं न दृश्यते

उडुजातकोदयः

मिश्रप्रकरणम् ।

गणेशवाणीविधिविष्णुशङ्करा-
निनेन्दुभौमज्ञगुरूशनश्शनीन् ।
प्रणम्य पाताच्चग्रहांश्च सद्गणा-
नुदाहरिष्याम्युडुजातकोदयम् ॥१॥

विज्ञाय जन्मनि खगस्थितिमूर्तिहोरा-
द्रेक्काणभांशभसमांशकविक्रयांशान् ।
जन्मायुषोरधिपयोस्तु [illegible]
संपद्विपत् सततमेव [illegible] ॥२॥

विचिन्त्य पक्षादितिथित्रिके बलं
दिने समोत्कृष्टलघूडुजं वदेत् ।
दिनेशजन्मेशसुहृत्समारिभिः
सुदीर्घमध्याल्पकजीवितं नृणाम् ॥३॥

संपूर्णपूर्णचरणोनदलांशपाद-
पादार्धमन्दपरिहीनमितीदमायुः ।
अत्युच्चतुङ्गनिजमित्रसमारिनीच-
क्षेत्रादिमौढ्यसहितैः फलमत्र खेटैः ॥४॥

1 [illegible] क । 2 [illegible] क च 3 दिने क, ज 4 बलं च
4 फलं ग क 5 [illegible] ॥ क च

आत्मचित्तधृतिवाक्सुखश्रिया-

कामदुःखपरिमोहमूर्च्छनाः ।

[1]भास्करादिखगसद्[2]बलाबलै-

[3]स्तच्छुभाशुभयुतिं समादिशेत् ॥५॥

पितृजन[4]नितनूजसोदराख्य-

[5]प्रियतरु[6]णीपतिभृत्यदासनाथाः ।

रवि[7]शशिगुरुभूजसौम्यकाव्य-

द्युमणितनूजभुजङ्गकेतवोऽमी ॥६॥

वदतु मरणयोगं स्वामिनः पाककाले

गुलिकभवनपत्युर्वा दशायां विनाशम् ।

जननिधनपत्योः क्रूरयोः क्रूरदृष्टि-

[8]यदि भवति [9]युतिर्यद्यष्टषष्ठस्थयोर्वा ॥७॥

उद्यद्‌दृगाणपतिराशिगते सुदेहपे

तस्य त्रिकोणमपि गच्छति वा विनाशम् ।

[10]रन्ध्रत्रिभागपति[11]मन्दिरगेऽथ मन्दे

प्राप्ते त्रिकोणमथ[12]वास्य वदेद्विनाशम् ॥८॥

---

१. भास्वदादि—ग, च; भास्वरादि—ङ. २. बला—क बलं त—ग, च; बलात् त—ङ. ३. स्तैःशुभा-क. ४. सोसहोदराख्यवाणी—ङ. ५. सुतत—ङ. ६. णोधरभृ—ङ; णीपरिभृ—ग, च. ७. शिकुजसौम्यजीवकाव्य: ङ. ८. ग्रंजति युतिगतिर्य—क, ख, ङ. ९. ति तयोर्व-ग. १०. The lines beginning with रन्ध्र and प्राप्ते are dropped in ख. ११. गे च म—ग. १२. वदन्ति मृत्युम् ॥ क.

शशाङ्कसंयुक्तवृगाणपूर्वतः
[१]खरत्रिभागेशगृहं गतेऽथवा ।
त्रिकोणगे वा मरणं शरीरिणां
[२]शशिन्यथ स्यात् तनुरन्ध्ररिःफगे ॥९॥

अष्टमाधिपतियुङ्नवांशक-
[३]प्राणनाथभवनाश्रिते रवौ ।
प्राणहानिरथवा त्रिकोणगे
तस्य [४]जन्मभवरिःफगेऽथवा ॥१०॥

[५]रन्ध्रत्रिभागपतिधातुकृतोऽत्र रोग-
स्तस्याधिपत्युरथवा प्रवदन्ति केचित् ।
अग्न्यम्बुशस्त्र[६]कृततस्कर[७]मथामयक्षुत्-
तृड्व्याधि[८]तापजनितोऽर्कमुखग्रहाणाम् ॥११॥

यदा [९]शुभः क्रूरदशान्तरं [१०]गत-
स्तदा भवेत् क्लेशमरातिपीडनम् ।
मृतिस्तु जन्माष्टमरिःफ[११]गेऽशुभे
[१२]तदायुरन्तश्चरितेऽखिले ग्रहे ॥१२॥

---

१. ते शनौ । च. २. नुरिःफरन्ध्रगे ॥ ङ. ३. स्यानना—च. ४. दरन्ध्ररिःफगे ॥ च. ५. This sloka is missing in च. ६. तकज्वरकामपानक्षुत्—ग, च. ७. महाम—च, ङ. ८. धिरित्यपि दिनेश्वरपूर्वकाणाम् ॥ ग, च; धिमोहज—ङ. ९. शुभे क्रू—च. १०. गते—च. ११. गेऽशुभ—ग, ङ. १२. ग्रहायु ग, ङ.

तनु[1] नय सिनि आया स्तुत्य धन्या[2] सेंडा[3] सौ

नर[4] इति विदुरब्दान् बह्निपूर्वोडुपानाम् ।

रविशशिकुजनागस्वर्गसंपूजितार्क-

प्रभवविधु[5]केतूक्षाधिपानां ग्रहाणाम् ॥१३॥

उडूर्ध्वनाडीभिरडुप्रभोर्दशां

निहत्य नीतेन हृताः समाः [illegible] ।

पुनः[6] प्रियेणापि नगेन वर्धित

भवन्ति मासा दिवसा यथाक्रमम् ॥१४॥

[7] इष्टर्क्षाब्दगणादहस्कृततनोरूर्ध्वोडुसंवत्सरै-

रभ्यस्ताद् दिवसीकृतेरथ हरेद्भागारिप[illegible]ते: ।

लब्धास्ते दिवसाः [illegible]

नीताः[8] स्युर्घटिका भवन्ति [illegible]

[illegible] ॥१५॥

---

१. सनु—क; सनि—ङ, च. २. न्सीका—ग. ३. सुनंर-ग.

४. ति च समाः स्युर्वह्नि-ग. ५. [illegible] ॥ च.

६. प्रियानेन न क, ग. ७. One sloka extra appears in च.

स्वदशत्रिगुणं विद्यात् स्वदशात्परिवर्तके ।

त्रिंशद् भाजिते मासे मासाद् द्वादसंवत्सरे ॥ च.

८. ता बा घ-ग.

स्वसमहृतनिजायुःपिण्डतो [illegible]
फलमथ निजमायुस्तद् भवेत् [illegible] ।
विशति खगवरो यस्तस्य संवत्सरघ्नात्
पुनरपि निरयाप्तं यत्तदस्यान्तरायुः ॥१६॥

इति मिश्रप्रकरणम्[1] ।

रविदशाप्रकरणम्

अथ तरणिदशायां क्षोणिभूपालबुद्धे-
र्धनमनलचतुष्पात्पीडनं नेत्रतापः ।
उदरदशनरोगः पुत्रदारार्तिरुच्चै-
र्गुरुजनविरहः स्याद् भृत्यनाशोऽर्थहानिः ॥१॥

रिपुक्षयो[2] गदशमनो[3] धनागमः
कृषिक्रिया[4] गृहकरणं सुहृद्युतिः ।
क्षयानिलप्रतिहृतिरर्कदायकं
शशी यदा विशति भवेद्वपुष्मताम् ॥२॥

महीभृतो[5] भवति भयं धनच्युती
रुजागमः पदविरहोऽरिपीडनम् ।
व्रणोद्भवो विविधजनैर्विरोधिता
कुजो यदापहरति[6] सूर्यदायकम् ॥३॥

---

1. This line is dropped in ख. Ms. ख ends here. २. यो व्याधिशमो ख–ग, घ, ङ. ३. गमो–ग, घ. ४. गृहक्रिया कृषिक–ग, घ. ५. भृतां ख–ख. ६. वा हरति च सू–ख.

रिपूद्भयो धनहृतिरङ्गकृच्छ्रता
विषाद्भयं विबुधविभूतता पुनः ।
शिरोवृशोरधिकरुगेव देहिना-
महौ [1]भवेद्धिमकरायुराहृते ॥४॥

रिपुक्षयो विविधधनाप्तिरन्वहं
सुरार्चनं द्विजगुरुबन्धुपूजनम् ।
श्रवश्रमो भवति च कामरोगता
गिरांपतौ प्रविशति गोपतिर्दशाम् ॥५॥

[2]धनाहृतिः सुतविपदः स्त्रियो रुजा
[3]रिपुव्यथा भवति परिच्छदक्षतिः ।
[4]मलिष्ठता [5]पवनकफप्रपीडनं
शनैश्चरे सवितृदशान्तरं गते ॥६॥

विचर्चिका पिटकसकुष्ठकामिला
[6]विकत्थनं कटिजठरप्रपीडनम् ।
महीक्षयस्त्रिगदभवो भवेत्तदा
विधोः [7]सुतश्चरति यदार्कवत्सरम् ॥७॥

---

१. राहरेत् ॥ क. २. नाहृतिः क, घ. ३. गुरुव्य—ग. ४. लिष्ठता—क, ख, ङ.
५. ता भवति क—घ. ६. कर्तनं—क. ७. सुते हरति वेरवत्सरकम् ॥ घ.

सुहृद्वधः स्वजनकुटुम्बविग्रहो
रिपोर्भयं धनहरणं पदच्युतिः ।
गुरोर्ग[1]वद्यचरणशिरोरुगुल्मकैः
शिखी यदा विशति दशां विवस्वतः ॥८॥
शिरोरुजा[2] जठर[3]गलाक्षिपीडनं
कृ[4]षिक्रियागृहधनधान्यविच्युतिः ।
सुतस्त्रियोरसुखमतीव देहिनां
भृगोः सुते हरति रवेरथाब्दकम् ॥९॥

इ[5]ति रविदशाप्रकरणम्

चन्द्रदशाप्रकरणम्

शिशिरकरदशायां मन्त्रदेवद्विजोर्वी-
पतिजनितविभूतिः स्त्रीधनक्षेत्रसिद्धिः ।
कुसुमवसनभूषा गन्धनानारसाप्ति-
र्भवति बलविरोधोऽर्थक्षयो वातरो[6]षः ॥१॥
[7]पित्तवह्निरुधिरोद्भवा रुजा
क्लेशदुःखरिपुचोरपीडनम् ।

---

१. नरुगुल्मकैस्तदा—ग. २. रगुदाक्षि—क. ३. गवार्तिपी—घ. ४. गृह-क्रियापशु ध—क. ५. This line is dropped in ख. ६. रोषः स्वस—क.

७. स्वशिवकाप्तिरसांशुकप्रणमो
भूसुरोत्तमसमागमो भवेत् ।
मातुरिष्टफलमंगनासुखं
स्वां दशां विशति शीतदीधितौ ॥ This sloka appears extra in घ:

८

वित्तदान[1]विहृतिर्भवेत् कुजे
शीतदीधितिदशान्तरं गते ॥२॥

तीव्ररोषरिपुवृद्धिबन्धुरुग्-
मारुताश[2]निकार्तिजं भयम् ।
अन्नपानजनितज्वराद[3]य-
श्चन्द्रवत्सरविहारकेऽप्यहो ॥३॥

दानधर्मनिरतिः सुखोदयो
वस्त्रभूषणसुहृत्सुतागमः ।
राजसत्कृतिरतीव जायते
कैरवप्रियवयोहरे गुरौ ॥४॥

नैकरोगविहृतिः सुहृद्ध[4]न-
स्त्रीरुजा व्यसनसंभवो महान् ।
प्राणहानिरथवा भवे[5]च्छनौ
मार[6]बन्धुवयसोऽन्तरं गते ॥५॥

१. समान—ख, ग. २. निर्भयं च विग्रहः । ग; निर्भयार्तिरुग्भवेत् । ख; निर्भयार्तिरुग्भवेत् । घ. ३. ज्वरोद—ग. ४. हृत्सुत—घ. ५. वेन्मृती—ख, ग, घ. ६. तार—घ.

सर्व[1]तो ध[2]न[3]रथाश्वगोकुल–
प्राप्तिराभरणसौख्यसम्भव[4]:
चित्त[5]बोध इति जायते विधो-
रायु[6]षि प्रविशते यदा बु[7]धः ॥६॥

चित्तचञ्चलमथार्थ[8]विच्युति–
बं[9]न्धुहानिरपि तोयजं भयम् ।
दासभृत्यहृतिरस्ति देहिनां
केतुके हृरति[10] चन्द्रदायकम् ॥७॥

तोययानवसुभूषणाङ्गना–
विक्रयक्रयकृषिक्रियादयः ।
पुत्र[11]मित्रपशुधान्यसंयुति–
श्चन्द्रदायहरणोन्मुखे भृगौ ॥८॥

राजमाननमतीव शूरता
रोगशान्तिररिपक्षविच्युतिः ।
पित्तवातरुगिने गते तदा
स्याच्छशाङ्कपरिवत्सरान्तरम् ॥९॥

[12] इति चन्द्रदशाप्रकरणम् ।

---

१. दा–घ. २. गजाश्व–घ. ३. सं–ग. ४. म्पदः–ग, घ.
५. पित्तबाध–क, ख. ६. युरन्तरगते–घ. ७. धे–घ. ८. मनर्थं–क, ख, ग. ९. न्धुनाशमथ तो–क, १०. ति चान्द्रमब्दकम् ॥ ग, घ.
११. त्रधनधा–घ. १२. This line is dropped in ख.

कुजदशाप्रकरणम् ।

क्षितितनयदशायां क्षत्रवैरि[1]प्रमर्द-
प्रतिजनितविभूतिः स्यात् पशुक्षेत्रलाभः[2] ।
सहजतनयवैरं दुर्जनस्त्रीषु सक्ति-
र्दहनरुधिरपित्तव्याधिरर्थोपहानिः ॥१॥

[3] शस्त्राग्निचोररिपुभूपभयं विषार्तिः
कुक्ष्यक्षिशीर्ष[4]जगदो गुरुबन्धुहानिः ।
प्राणव्ययोऽथ यदि वा विपुलापदो वा
वक्रायुरन्तरगते भुजगाधिनाथे ॥२॥

द्विजविबुधसमर्चा तीर्थपुण्यानुसेवा
सततमतिथिपूजा पुत्रमित्राभिवृद्धिः ।
श्रवणरुगतिमात्रं श्लेष्मरोग[5]प्रपीडा
भवति कुजदशान्तःसंगते वागधीशे ॥३॥

---

१. वैरीन्द्रम–ख. २. त्रनाशः । ख.
३. पित्तोष्णरुग्व्रणभयं सहजैक्यियोर्न
क्षत्रप्रमोदजनितार्थविभूतिसिद्धिः ।
जात्यग्निशस्त्रनृपचोरजनैर्विरोधो
धात्रीसुतो हरति चेच्छरदं स्वकीयम् ॥
This sloka appears extra in ms घ. ४. ंकग–घ. ५. रोगोद्भवो
वा–घ.

उपर्युपरि विनाशः स्वात्मजस्त्रीगुरूणा-

मगणितविपदन्तर्दुःखमर्थोपहानिः ।

वसुहरणमरिभ्यो[1] भीतिरुग्णानिलार्तिः

कुजजनितदशायामर्कजे[2]ऽन्तःप्रयाते[3] ॥४॥

अरिभयमुरुचोरोपद्रवो वार्थहानिः[4]

पशुतुरगगजानां विप्लवो भ्रातृरोगः ।

नृपकृतपरिपीडा[5] शूद्रवैरोद्भवो वा

विशति विधुतनूजे विश्वधात्रीसुतायुः ॥५॥

अशनिभयमकस्मादग्निशस्त्रप्रपीडा[6]

विगमनमथ देशाद् वित्तनाशोऽथवा स्यात् ।

अपगमनमसुभ्यो योषितो वा विनाशं

प्रविशति[7] यदि केतौ क्रूरनेत्रायुरन्तः ॥६॥

युवतिजनविनाशो[8] विप्रवासः स्वदेशा-

द्वसुहृतिरपि चोरैर्वामनेत्रोपरोधः ।

परिजनपरिहानिर्जायते मानवाना-

मपहरति यदायुर्भौमजं[9] भार्गवेन्द्रः ॥७॥

---

१. परह–ग; असु–क. २. मवनि कुञवशा–घ. ३. जे संप्र घ.
४, वास्वभाव: ग, घ. ५. परिजनप–ग. ६. मपस्माराग्नि–ग, घ.
७. विशति यदिह के–ग. ८. युधिजनितविमार्द वि - क, ख. ९. युर्भूभुवो भा–ग. घ.

नृपकृतपरिपूजा युद्धलब्धप्रभावः
परिजनधनधान्यश्रीमदन्तःपुरं च ।
अतिविलसितवृत्तिः साहसावाप्तलक्ष्मी-
स्तिमिरभिदि कुजायुर्दायसंहारिणीति ॥८॥

विविधधनसुताप्तिर्विप्रयोगोऽरिवर्ग-
र्वसनशयनभूषारत्नसम्पत्प्रसूतिः ।
भवति गुरुजनार्तिर्गुल्मपित्तप्रपीडा
धरणिसुतदशान्तः[1] संगते[2] शीतरश्मौ ॥९॥

इति[3] कुजदशाप्रकरणम् ।

राहुदशाप्रकरणम् ।

असुरवरदशायामस्वभावोऽथवा स्या-
दतिगहनगदार्तिः सूनुनार्योर्विनाशः ।
विषभयमरिपीडा वीक्षणोऽर्धाङ्गरोगः
सुहृदुदितविरोधो भूपतेर्द्रव्यलाभः ॥१॥

विषाम्बुरुग्दुष्टभुजङ्गदंशनं
[4] पराबलासंयुतिरिष्टविच्युतिः ।
अरिष्टवाग्दुष्टजनप्रपीडा
विधुन्तुदेनापहृते स्ववत्सरे ॥२॥

---

१. णितनयवर्षं शीतगौ संप्रयाते ॥ ख; णिजवर्षान्तः सञ्चरत्येव चन्द्रे ॥ घ.
२. ते रात्रिनाथे ॥ ग. ३. This line is dropped in ख.
४. This sloka appears only in घ.

सुखोपनीतिः[1] सुरविप्रपूजनं

विरोगता[2] वामदृशां समागमः ।

सुपुण्यशास्त्रार्थविचारसम्भवः

सुरारिदायान्तरगे बृहस्पतौ ॥३॥

समीरपित्तप्रभवः क्षतिस्तनौ

तनूजयोषित्सहजस्य विग्रहः ।

सुभृत्यनाशश्च पदच्युतिर्भवेत्

फणीन्द्रजायुः[3] प्रविशत्यथार्कजे ॥४॥

सुतस्वलब्धिः[4] स्वसुहृत्समागमो[5]

मनोविनिद्रात्वमतीव जायते ।

पटुक्रियाभाषणकौशलोदयो[6]

भुजङ्गसंवत्सरहारिणीन्दुजे ॥५॥

ज्वराग्निशस्त्रारिभयं[7] शिरोरुजा

शरीरकम्पश्च मुहुर्गुरुक्लमः[8] ।

---

१. समोर्जित–ख. २. गकायः सुहृदां स–ख. ३. विनिप्रजा–ग, घ.
४. सुतलब्धिः सुहृत् समागमो
...निर्वाणिका तीव्र... मोक्षं ख. ५. तस्य सिद्धिः ... ६. शतं
तूर्णा–ग, घ. ७. रिकृतासुमोचनं–ग, घ. ८. म्यः स्वसु–नौ

[1] विषव्रणार्तिः कलहं सुहृज्जनै-

[2] रहीन्द्रदायान्तरगे शिखाभृते ॥६॥

[3] सुतस्य लब्धिः सुदृशां समागम-

[4] स्तुरंगमातंगमहासमुद्भवः ।

कफानिलार्तिः स्वजनैर्विरोधिता

भवेद् भुजङ्गायुरपाहृते भृगौ ॥७॥

अरिव्यथा स्यादतिपीडनं दृशो-

र्विषारिनशस्त्राहतिरापदुद्गमः ।

[5] जायासुतार्तिर्नृपतेर्महद्भयं

विलेशयायुष्यहिमांशुना हृते ॥८॥

वधूविनाशः कलहो मनोरुजा

कृषिक्रियावित्तपशुप्रजाक्षयः ।

[6] सुहृद्विपत्तिः सलिलाद् भयं भवे-

द्विधौ दशां हर्तरि देवविद्विषः ॥९॥

---

१. [illegible] विमूढता दृशो च, घ. २. दायं [illegible] -ख ग. ३. सुरस्खल—ग; कलत्रलब्धिः शयनोप[illegible]-ग. ४. [illegible]-ग. ५. भार्यासु—ग, घ; नृपाद् भयं च [illegible]-ग. [illegible] [illegible]—ग, घ.

नृपाग्निचोरास्त्रभयं शरीरिणां
शरीरनाशो यदि वा महारुजा ।
पदभ्रमो हृन्नयनप्रपीडनं
यदास्ति सर्पायुषि सञ्चरेत् कुजे ॥१०॥

[1]
इति राहुदशाप्रकरणम् ।

गुरुदशाप्रकरणम् ।

[2]
अमरगुरुदशायामम्बराश्वार्थसिद्धिः
परिजनपरिवारप्रौढिरत्यर्थमानः ।
[3]
सुखसुतसुहृदाप्तिः साधुवादाप्तपूजा
[4] [5]
भवति गुरुवियोगः कर्णरोगः कफार्तिः ॥११॥

[6] [7]
वेश्याङ्गनामदकृतासवदोषसङ्गः
सद्धर्मसौख्य[illegible] ।

---

१. This line is dropped in ख. २. म्बरेणार्थं—ग, घ. ३. तसुहृताप्तिः—ग, घ. ४. ति [illegible]: क—ग, घ. ५. [illegible] वा—ग, घ.

६. The following sloka appears extra in ग. before this sloka.

सौभाग्यकान्तिमतिमानगुणाभयः स्यात्
सत्पुत्रसिद्धिरवनीपतिपूजनं च ।
[illegible]
संचारं [illegible] स्वकीयम् ॥ ७. [illegible]

अर्थव्ययोऽरिभयमक्षिजरुक् सुतार्तिः
जैवीं दशां विशति दिनकरे नराणाम् ॥२॥

स्त्रीद्यूतमद्यमृगयाव्यसनं विरोधः
केचिद्वदन्त्यपि च केवलमङ्गनाप्तिः ।
देवद्विजार्चनसुतार्थसुखप्रयोगो
गीर्वाणपूजितदशाहृति चन्द्रसूनौ ॥३॥

शस्त्रव्रणं भवति भृत्यजनैर्विरोध-
श्चित्तव्यथा तनययोषितुपद्रवश्च ।
प्राणच्युतिर्गुरुसुहृज्जनविप्रमोक्षः
केतौ यदा विशति जीवदशां भवेद्वा ॥४॥

नानाविधार्थपशुधान्यपरिच्छदस्त्री-
पुत्रान्नपानशयनाम्बरभूषणाप्तिः ।
देवद्विजार्चनमुपासनतत्परत्व-
मायुर्यदा विशति जैवमथासुरेड्यः ॥५॥

शत्रोर्जयं क्षितिपमाननकीर्तिलाभः
स्वबन्धुता नरतुरङ्गमवाहनाप्तिः ।
ऐश्वर्यग्रहारपुरराष्ट्रसमुत्थमन्य-
दुच्चैस्तथ्यसहजायुरपाहृतेऽर्के ॥६॥

---

१. क्षिभयं मु-ग, घ.   २. केचन [illegible] ... सतोर्भवं मु-ध.
४. सौरिर्दशामायुरपहृत्य ददाति केतुः ॥ ध. ... [illegible]

योषिद्ब[1]हुत्वमरिनाशनमर्थलाभः
[2]कृष्यर्थवस्तु[3]परमोन्नतकीर्तिलाभः ।
मन्त्रद्विजार्चनपरत्वमतीव पुंसां
सञ्जायते गुरुदशाहृति शर्वरीशे ॥७॥

बन्धूपतोषणमरिव्रजतोऽर्थलाभः
[4]सुक्षेत्रसत्कृतिरिह प्रथितप्रभावः ।
[5]ईषद्गुरूपहृतिरीक्षणसुक्षतिर्वा
क्षित्यात्मजे हरति वत्सरमार्यजातम् ॥८॥

बन्धूपतप्तिररुमानसरुग्गदार्ति-
श्चोराद्भयं गरगदो जठरोद्भवो वा ।
राजेन्द्रपीडनमरिव्यसनं स्वनाशं
संपत्स्यते हरति सूरिदशां सुरारौ ॥९॥

[6]इति गुरुदशाप्रकरणम् ।

मन्ददशाप्रकरणम् ।

रवितनयदशायां राष्ट्रवाटाग्रहार-
प्रतिजनितविभूतिः प्रेष्यवृद्धाङ्गनाप्तिः ।

---

१. शमनर्थ—ख; शमनर्थनाशः—घ. २. This line is missing in ख; कृष्युत्थ-ग. ३. प्रतिको—क. ४. सुक्षत्र—ख. ५. द्गुरुप्रह—घ.
६. This line is dropped in ख.

[1]पशुमहिषवृषाप्तिः पुत्रदारप्रपीडा
पवनकफगदार्तिः पादहस्ताङ्ग[2]तापः ।।१।।

[3]सुभगत्वमस्ति सुखिता वनिता
नृपलालनं विजयमित्रयुतिः ।
त्रिगदोद्भवः सहजपुत्ररुजा
शनिदायहारिणि शशाङ्कसुते ।।२।।

[4]मरुदग्निपीडनमरिव्यसनं
सुतदारविग्रह[5]युतिस्त्वथवा ।
अशुभावलोकनमहेश्च भयं
मृदुवत्सरापहृति केतुपतौ ।।३।।

सुहृदङ्गनातनयसौख्ययुतिः
कृषितोययानजनितार्थचयः ।
शुभकीर्तिरुद्भवति देहभृतां
[6]यमदायहारिणि भृगोस्तनये ।।४।।

---

१. षधनाप्तिः ग, घ. २. ङ्गपातः ।। ख, ग. ३. The following sloka appears extra in ms. घ.

कृषिवृद्धिभृत्यमहिषाभ्युदय-
पवनामयो वृषळजातिधनम् ।
स्थविराङ्गनाप्तिरलसत्वमखो
निजवत्सरान्तरगते रविजे ।। सुभ–घ. ४. The sloka is dropped in ख. It is given in बुधदशाप्रकरणं by mistake. ५. तिः सततम् ।–घ. ६. शनिदा–घ.

मरणं तु वा रिपुभयं सततं
गुरुवर्गरुम् जठरनेत्ररुजा।
घनदार[1]विच्युतिरिह प्रभवेद्
रविजायुराविशति तीव्रकरे ॥५॥

[2]वनिताहृतिर्मरणमेव नृणां
सुहृदां विपत्ति[3]रतिरोगभयम् ।
जलवातजं भयमतीव भवेद्
रविजायुराविशति रात्रिकरे ॥६॥

स्वपदच्युतिः स्वजनविग्रहरुग्
ज्वरवह्निशस्त्रविषभीरथवा ।
अरिवृद्धिरन्तररुगक्षिभयं
त्विनजायुराविशति भूमिसुते ॥७॥

अपमार्गयानमसुभिर्विरहं
त्वथवा प्रमेहगुरुगुलमभयम् ।
[4]ज्वरसुक्षतिः सततमेव नृणा-
म[5]सितान्तराविशति [6]भोगिपतौ ॥८॥

१. नधान्यवि–घ. २. ताहूर्ति–ग, घ. ३. ररिरो–घ. ४. रविक्ष–घ.
५. न्तरं वि–क. ६. देवगुरौ ॥–ग, घ.

अमरार्चनं द्विजगणाभिरुचि-
र्गृहपुत्रदारविहृतिस्तु भवेत् ।
धनधान्यवृद्धिरधिका हि नृणां
गतवत्यथार्किवयसीन्दुगुरौ ॥९॥

[१] इति [२] मन्ददशाप्रकरणम् ।

बुधदशाप्रकरणम् ।

शशितनयदशायां शश्वदाचार्यबन्धु-
[३] द्विजजनित [४] धनाप्तिः क्षेत्रगोवाजिलाभः ।
[५] मनुभवसुरपूजा [६] वित्तसंघातसिद्धिः
निपतति मरुदुष्णश्लेष्मरोग [७] प्रपीडा ॥१॥

[८] दुःखशोककलहाकुलत्वता
गात्रकम्पनमभित्रसंयुतिः ।

---

१. This line is dropped in ख. २. शनिद-ग, घ, ३. प्रियज-ग; प्रतिज-घ. ४. तविभूतिः क्षे-ग, घ. ५. नुवरसु-ख. ६. संघोऽथवा-ग, घ. ७. रोगोद्भवो वा ॥ ८. The following sloka appears extra in घ.

धर्ममार्गनिरतिर्विपश्चितां
सङ्गमो विमलधीर्धनं द्विजात् ।
विद्यया बहुयशस्सुखं सदा
चन्द्रजे हरति वत्सरं स्वकम् ॥ दुःख-घ.

क्षेत्र[१]धान्य[२]वियुतिर्यदा भवे-
च्चन्द्र[३]जन्मशरदागतः शिखी ॥२॥

देवविप्रगुरुपूजनक्रिया-
दान[४]धर्मपरतासमागमः ।
वस्त्रभूषणसुहृद्युतिर्भवेद्
बोधनाद्युषि सिताहृते[५] सति ॥३॥

हेमविद्रु[६]मतुरङ्गवारण-
प्राभृतं भवनमन्नपानयुक् ।
भूपतेरपि च पूजनं भवेद्
भानुमालिनि बुधाब्दकं[७] गते ॥४॥

मस्तकव्यसनमक्षिपीडनं
कुष्ठदद्रु[८]बहुकण्डु[९]पीडनम् ।
प्राणसंशययुतिर्नृणां भवेत्
[१०]ज्ञायुराविशति शीतदीधितौ ॥५॥

---

१. क्षेमधा–घ. २. विच्युति–घ. ३. Four lines beginning with this are dropped in ख. ४. मान–घ. ५. समाहृते सिते–ख. ६. द्रुतनु–घ. ७. ब्दमाहृते ॥ घ. ८. ण्डुदूषणम् । ग; र्णपी-घ. ९. The sloka which is missing in मन्ददशाप्रकरणम् is given here by mistake in ख. १०. मुखं व्रजति–ख.

नृपकृतपरिपूजा युद्धलब्धप्रभावः
परिजनधनधान्यश्रीमदन्तःपुरं च ।
अतिविलसितवृत्तिः साहसावाप्तलक्ष्मी-
स्तिमिरभिदि कुजायुर्दायसंहारिणीति ।।८।।

विविधधनसुताप्तिर्विप्रयोगोऽरिवर्ग-
वसनशयनभूषारत्नसम्पत्प्रसूतिः ।
भवति गुरुजनार्तिर्गुल्मपित्तप्रपीडा
धरणिसुतदशान्तः[1] संगते शीतरश्मौ[2] ।।९।।

[3]इति कुजदशाप्रकरणम् ।

राहुदशाप्रकरणम् ।

असुरवरदशायामस्वभावोऽथवा स्या-
दतिगहनगदार्तिः सूनुनार्योर्विनाशः ।
विषभयमरिपीडा वीक्षणोऽर्धाङ्गरोगः
सुहृदुदितविरोधो भूपतेर्द्रव्यलाभः ।।१।।

[4]विषाम्बुरुग्दुष्टभुजङ्गदंशनं
परावलासंयुतिरिष्टविच्युतिः ।
अरिष्टवाग्दुष्टजनप्रपीडा
विधुन्तुदेनापहृते स्ववत्सरे ।।२।।

---

१. णितनयवर्षं शीतगौ संप्रयाते ।। ख; णिजवर्षान्तः सञ्चरत्येव चन्द्रे ।। घ.
२. ते रात्रिनाथे ।। ग. ३. This line is dropped in ख.
४. This sloka appears only in घ.

सुखोपनीतिः[1] सुरविप्रपूजनं

विरोगता[2] वामदृशां समागमः ।

सुपुण्यशास्त्रार्थविचारसम्भवः

सुरारिदायान्तरगे बृहस्पतौ ॥३॥

समीरपित्तप्रगदः क्षतिस्तनौ

तनूजयोषित्सहजैश्च विग्रहः ।

सुभृत्यनाशश्च पदच्युतिर्भवेत्

फणीन्द्रजायुः[3] प्रविशत्यथार्कजे ॥४॥

सुतस्वलब्धिः[4] स्वसुहृत्समागमो[5]

मनोविनिद्रात्वमतीव जायते ।

पटुक्रियाभाषणकौशलोदयो[6]

भुजङ्गसंवत्सरहारिणीन्दुजे ॥५॥

ज्वराग्निशस्त्रारिभयं[7] शिरोरुजा

शरीरकम्पश्च सुहृद्[8]गुरुव्यथा ।

---

१. [illegible]–ख. २. गकायः सुहृदां स–ख. ३. वितिरुजा–ग, घ.
४. [illegible] सुखं समागमो
[illegible] तीव्र[illegible] ख. ५. तस्य [illegible] ६. [illegible]
नूर्णा–ग, घ. ७. रिकृतासुमोचनं–ग, घ. ८. स्यः स्वसु–[illegible]

१ विषव्रणार्तिः कलहं सुहृज्जनै-

२ रहीन्द्रदायान्तरगे शिखाग्रे ॥६॥

३ सुतस्य लब्धिः सुदृशां समागम-

४ स्तुरंगमातगंमहत्समुद्भवः ।

कफानिलार्तिः स्वजनैर्विरोधिता

भवेद् भुजङ्गायुरपाहृते भृगौ ॥७॥

अरिव्यथा स्यादतिपीडनं दृशो-

र्विषारिनशस्त्राहतिरापदुद्गमः ।

५ जायासुतार्तिर्नृपतेर्महद्भयं

विलेशयायुष्यहिमांशुना हृते ॥८॥

वधूविनाशः कलहो मनोरुजा

कृषिक्रियावित्तपशुप्रजाक्षयः ।

६ सुहृद्विपत्तिः सलिलाद् भयं भवे-

द्विधौ दशां हर्तरि देवविद्विषः ॥९॥

---

१. भयं नास्ति विमूढता दृशो क, ख. २. दायं [illegible] ख.

३. सुरस्थल—ग; कलत्रलब्धिः शयनोप[illegible] ख. ४. [illegible]गमः—ख.

५. भार्यासु—ग, ख; नृपाद् भयं च [illegible] [illegible] महद्भयं

पि—ग, ख.

नृपाग्निचोरास्त्रभयं शरीरिणां
शरीरनाशो यदि वा महारुजा ।
पदभ्रमो हृन्नयनप्रपीडनं
यदास्ति सर्पायुषि सञ्चरेत् कुजे ॥१०॥

[1] इति राहुदशाप्रकरणम् ।

गुरुदशाप्रकरणम् ।

अमरगुरुदशायामम्बरा[2]ऽर्थसिद्धिः
परिजनपरिवारप्रौढिरत्यर्थमानः ।
सुखसुत[3]सुहृदाप्तिः साधुवादाप्तपूजा[4]
भवति गुरुवियोगः[5] कर्णरोगः कफार्तिः ॥११॥

[6] वेश्याङ्गना[7]मदकृतासवदोषसङ्गः
सद्धर्मसौख्यसुखदुःखभवप्रकोपः ।

---

१. This line is dropped in ङ. २. म्बरेणार्थ–ग, घ. ३. तसुहृताप्ति:–ग, घ. ४. ति बलविरोधः क–ग, घ. ५. शैलेन्द्रपुत्री वा–ग, घ.
६. The following sloka appears extra in ङ. before this sloka.
सौभाग्यकान्तिमतिमानगुणाभयः स्यात्
सत्पुत्रसिद्धिरवनीपतिपूजनं च ।
[illegible]
संचारं[illegible] स्वकीयम् ॥ ७. [illegible]

अर्थव्ययोऽरिभयमक्षिजरुक् सुतार्तिः[1]
जैवीं दशां विशति दैनकरे नराणाम् ॥२॥

स्त्रीद्यूतमद्यमृगयाव्यसनं विरोधः[2]
केचिद्वदन्त्यपि च केवलमङ्गनाप्तिः ।
देवद्विजार्चनसुतार्थसुखप्रयोगो
गीर्वाणपूजितदशाहृति चन्द्रसूनौ ॥३॥

शस्त्रव्रणं भवति भृत्यजनैर्विरोध-
श्चित्तव्यथा तनययोर्विधुपद्रवश्च ।
प्राणच्युतिर्गुरुसुहृज्जनविप्रयोगः[3]
केतौ यदा विशति जीवदशां भवेद्वा ॥४॥[4]

नानाविधार्थपशुधान्यपरिच्छदस्त्री-
पुत्रान्नपानशयनाम्बरभूषणाप्तिः ।
देवद्विजार्चनमुपासनतत्परत्व-
मायुर्यदा विशति जैवमथासुरेज्यः ॥५॥[5]

शत्रोर्जयं क्षितिपमाननकीर्तिलाभः
स्वच्छन्दता नरतुरङ्गमवाहनाप्तिः ।
श्रेण्यग्रहारपुरराष्ट्रसमुत्थमान्य-
मुच्चैरुतव्ययसहजायुरपाहृतेऽर्के ॥६॥

---

१. क्षिमयं सु-ग, घ. २. केचन [illegible] ३. [illegible] सु-[illegible]
४. सौरे[illegible]युरपहृत्य वदन्ति केतुः ॥ [illegible]

योषिद्बहुत्वमरि[1]नाशनमर्थलाभः
[2]कृष्यर्थवस्तुपरस्मो[3]न्नतकीर्तिलाभः ।
मन्त्रद्विजार्चनपरत्वमतीव पुंसां
सञ्जायते गुरुदशाहृति शर्वरीशे ॥७॥

बन्धूपतोषणमरिव्रजतोऽर्थलाभः
[4]सुक्षेत्रसत्कृतिरिह प्रथितप्रभावः ।
ई[5]षद्गुरूपहृतिरीक्षणसुक्षतिर्वा
क्षित्यात्मजे हरति वत्सरमार्यजातम् ॥८॥

बन्धूपतप्तिरुरुमानसरुग्गदार्ति-
श्चोराद्भयं गरगदो जठरोद्भवो वा ।
राजेन्द्रपीडनमरिव्यसनं स्वनाशं
संपत्स्यते हरति सूरिदशां सुरारौ ॥९॥

[6]इति गुरुदशाप्रकरणम् ।

मन्ददशाप्रकरणम् ।

रवितनयदशायां राष्ट्रवाटाग्रहार-
प्रतिजनितविभूतिः प्रेष्यवृद्धाङ्गनाप्तिः ।

---

१. शमनर्थ—ख; शमनर्थनाशः—घ. २. This line is missing in ख; कृष्युत्पन्न-ग. ३. भतिकी—क. ४. सुक्षत्र—ख. ५. दगुरुप्रह—घ.
६. This line is dropped in ख.

नगरयूथपुरोद्भवपूजनं[1]
प्रवरयोषिदवाप्तिरथास्ति च ।
विविधवित्तपरिच्छदसंयुति-
वितिजपूजितदायगते[2] शनौ ॥७॥

तनयसौख्यधनागमसम्पदो[3]
निचयलब्धिरतिप्रभूता[4] यशः ।
पवनपित्तकफार्तिरथास्ति[5] चे-
दसुरमन्त्रिदशाहृति[6] चन्द्रजे ॥८॥

तनयसौख्यबहिष्कृतिररिनजं
भयमतीव विनाशनमन्तरुक् ।
भवति वारवधूजनसंयुतिः
शिखिनि यात्यलमौशनसीं दशाम् ॥९॥

इति भृगुदशाप्रकरणम्

---

१. वपीडनं–ग. २. तवत्सरगे श–घ. ३. नाशनस–ख, ग, घ. ४. [illegible]निर–ख, घ. ५. [illegible]रसु–घ. ६. [illegible] Ms. ends here.

[1]
दशापहारेषु फलं यदुक्तं
वर्णाधिकारानुगुणं वदन्तु ।
छिद्रासु सूक्ष्मेष्वपि तत्फलाप्तिः
छायाङ्कुवार्ताश्रवणानि वा स्युः ॥

इति कथितमुडूनामायुरग्न्यादिकानां
फलमपि सदसद्यन्मिश्रितं च ग्रहाणाम् ।
युवतिषु फलमेतद्युक्तमप्यत्र वाच्यं
पतिषु वदति सर्वं जातिदेशानुरूपम् ॥

[2]
द्विजेन केनाप्युडुजातकोदयं
कृतं च वेणाटिकदेशजन्मना
त्रयाधिकश्लोकशतेन निर्मितं
हिताय तज्जातकसारवेदिनाम् ॥

सर्वोक्तं नृपतिविशो-
स्तदर्धफलमाह विप्रमुख्येषु ।
अन्येषु जन्तुषु गुणाः
पुरुषविशेषात् प्रबोद्धव्याः ॥

उडुजातकम् समाप्तम् ।

---

१. This sloka is dropped in—क. २. यम् । Ms.,—क and ख end here.

कृत्यरत्नावली

रामचन्द्रविरचिता

नमस्कृत्य रमानाथं भट्टविठ्ठलसूनुना ।
कृत्यरत्नावली रम्या रामचन्द्रेण [1]रच्यते ॥

तत्र "[2]तिथिकृत्ये तु कृष्णादिं व्रते शुक्लादिमेव च" इति वचनात् [a][3]चैत्रकृष्णप्रतिपदमारभ्य तिथिकृत्यान्युच्यन्ते । तत्र चैत्रकृष्णप्रतिपदि कृत्यविशेषः पद्मपुराणे—

चैत्रे मासि महाबाहो! पुण्या प्रतिपदा परा ।
तस्यां यः श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः ॥

न तस्य दुरितं किञ्चिन्नाधयो व्याधयो नृप! ।
भवन्ति [4]कुरुशार्दूल! तस्मात् स्नानं समाचरेत् ॥

Mss. utilised for this publication:— (1) Reg: no. 7448—क.
(2) „ 7264—ख.
(3) „ 6974—ग.
(4) „ 1716—घ.

First two folios of Ms. ग are missing and the work begins only from (नमो न)"मस्ते काष्ठायै कलायै" etc. in page No. 4. line 11.

1. तन्यते—ख. 2 चु—ख. 3. शुक्ल—क. 4. नृपशा—ख.

a. In Ms. घ the portion from "चैत्र" (Page No. 1) to "सर्वसिद्धिप्रवर्तकः" (Page No. 8) is found missing. It has only the following line:- तत्र चैत्रशुक्लप्रतिपदि संवत्सरारम्भविधिस्तत्र.

दिव्यनीराजनं तद्धि सर्वरोगविनाशनम् ।
गोमहिष्यादि यत्किञ्चित्तत्सर्वं भूषयेन्नृप ! ॥

तैलवस्त्रादिभिः सर्वास्तोरणाधस्ततो नयेत् ।
ब्राह्मणानां ततो भोज्यं कुर्यात् कुरुकुलोद्वह ! ॥

इति । अत्र प्रतिपदौदयिकी ग्राह्या "प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ" इति भविष्योत्तरादिति केचित् । होलिकादीपनाव्यवहितोत्तरदिनं[1] ग्राह्यमिति युक्तम् । अत एव वृद्धवसिष्ठेन पूर्वापि विहिता—

वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
पूर्वविद्धैव कर्त्तव्या प्रतिपत्सर्वदा बुधैः ॥

इति । अत्र तैलाभ्यंगो नित्यः ।

वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते ।

इति वृद्धवसिष्ठवचनात् ।

चैत्रकृष्णद्वादशी वैराजकल्पादिः ।

चैत्रकृष्णत्रयोदशी शतभिषायुता वारुणी । तत्र गङ्गास्नानं महाफलम् । तदुक्तं स्कान्दे—

वारुणेन समायुक्ता मधौ कृष्णत्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ॥

इति । इयमेव शनिवारयोगे[2] महावारुणी । शुभयोगयोगे महामहावारुणी महाफला च । तथा च तत्रैव,

शनिवारसमायुक्ता[3] सा महावारुणी मता ।
गंगायां यदि लभ्येत कोटिसूर्यग्रहैः समा ॥

---

1. कोद्दीप-ख. 2. शयोगे-ख. 3. समू ख.

शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥

[1]
इति । चैत्रकृष्णचतुर्दश्यां कृत्यविशेषः पुराणसमुच्चये—

चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसान्निधौ ।
गंगायां च विशेषेण स न प्रेतोऽभिजायते ॥

चैत्रकृष्णचतुर्दश्यामङ्गारकदिनं यदि ।
पिशाचत्वं पुनर्न स्यात् गङ्गायां स्नानभोजनात् ॥

भोजनं जलपानम् । चैत्रामावास्या मन्वादिः । "फाल्गुनस्य त्वमावास्ये"ति मात्स्यात् । अत्र फाल्गुनशब्दोऽमान्तमासाभिप्रायेण । स च श्राद्धे अपराह्णिकी ग्राह्या, कृष्णपक्षगतत्वात्[2] इति । तत्र चैत्रशुक्लप्रतिपदि संवत्सरारम्भविधिः । तथा च कल्पतरौ ब्रह्मपुराणे—

चैत्रे मासि जगद् ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥

ततः प्रवृत्तो यो धर्मः पुत्रैः पूर्वतरैः कृतः ।
अद्यापि गूढः सुतरां कर्तव्योऽसौ प्रयत्नतः ।

तत्र कार्या महाशान्तिः सर्वकल्मषनाशिनी ।
सर्वोत्पातप्रशमनी कलिदुःखप्रणाशिनी ॥

आयुःप्रदा पुष्टिकरी धनसौभाग्यवर्धिनी ।
मङ्गल्या च पवित्रा च लोकद्वयसुखावहा ॥

यस्यामादौ च संपूज्यो ब्रह्मा लोकपितामहः ।
पाद्यार्घपुष्पधूपैश्च वस्त्रालङ्कारभोजनैः ॥

---

1. Omitted in ख. 2. त्वात् । पंत्र-ख

होमैर्बल्युपचारैश्च तथा ब्राह्मणतर्पणैः ।
तथा क्रमेण देवेभ्यः पूजा कार्या पृथक् पृथक् ।।

देवेभ्यो वक्ष्यमाणेभ्यः कालादिभ्यः ।

कृत्वोङ्कारं नमस्कारैः[1] कुशोदकतिलाक्षतैः ।
पुष्पधूपप्रदीपैश्च भोजनैश्च यथाक्रमम् ।।

[a] नमस्कारैः कृत्वा ॐ ब्रह्मणे नमः इत्यादि,

मन्त्रैश्च पूजनार्थं तु चरुरूपं पचेत्ततः ।
ॐ नमो ब्रह्मणे तुभ्यं कालाय च महात्मने ।

नमस्तेऽस्तु निमेषाय त्रुटये च नमोऽस्तु ते[2] ।
लवाय न नमस्तुभ्यं नमस्तेऽस्तु क्षणाय च ।।

नमो नमस्ते काष्ठायै कलायै चाथ सर्वदा ।
नाडिकायै सुषुम्नायै मुहूर्ताय नमो नमः ।।

नमो निशाभ्यः पुण्येभ्यो दिवसेभ्यश्च नित्यशः ।
पक्षाभ्यां चाथ मासेभ्य ऋतुभ्यः षड्भ्य एव च ।।

अयनाभ्यां च पञ्चभ्यो वत्सरेभ्यश्च सर्वदा ।

पञ्चभ्यो वत्सरेभ्यः—संवत्सरपरिवत्सरेदावत्सरेद्वत्सरवत्सरेभ्यः ।

नमः कृतयुगादिभ्यो ग्रहेभ्यश्च तथैव च ।।

अष्टाविंशतिसंख्येभ्यो नक्षत्रेभ्यो नमो नमः ।

अभिजिता सहाष्टाविंशतिसंख्यात्वम्[3] ।

राशिभ्यः करणेभ्यश्च व्यतीपातेभ्य एव च ।।

---

1. स्तेभ्यः—ख. a. The line is omitted in ख. 2. नमो नमः—ख.
3. ह्य—ग.

प्रतिवर्षाधिपेभ्यश्च विज्ञानेभ्यो नमः सदा ।
नमोऽस्तु कुलनागेभ्यः सानुयात्रिभ्य एव च ॥

[1] सानुयात्रिभ्यः—सारथिवरेभ्यः ।

नमश्चतुर्दशभ्यस्तु मनुभ्यश्च पुनः पुनः ।
नमः पुरन्दरेभ्यश्च तत्संख्येभ्यो नमो नमः ॥

[a] तत्संख्येभ्यश्चतुर्दशसंख्येभ्यः ।

पञ्चाशते नमो नित्यं[2] दशकन्याभ्य एव च ।
नमोऽदित्यै सुव्रतायै जयायै चापि सर्वदा ॥

कुशाग्राय नमस्तुभ्यं सर्वलोकजनकाय च ।
[b] नमोऽस्तु बहुपुत्राय पत्नीभिः सहिताय च ॥

[c] नमो वृद्ध्यै तथा ऋद्ध्यै निद्रायै धनदाय च ।
नलकूबरयक्षाय गुह्यकस्वामिने नमः ॥

नमोऽस्तु शंखपद्माभ्यां निधिभ्यामपि नित्यशः ।
भद्रकाल्यै नमो नित्यं [illegible] नमो नमः ॥

वेदवेदान्तवेदाङ्गविद्यास्थानेभ्य एव च ।
नागयक्षसुपर्णेभ्यो नमोऽस्तु गरुडाय च ॥

अरुणाय नमस्तुभ्यं सप्तद्वीपेभ्य एव च ।
सप्तभ्यश्च समुद्रेभ्यः सागरेभ्यश्च सर्वदा ॥

---

1 तु-च   a. This line is omitted in Ms. च.   2. [illegible]

b These lines areomited in Ms. च.

उत्तरेभ्यः कुरुभ्यश्च नमो हैरम्बनाय च ।
भद्राश्वकेतुमालाभ्यां नमः सर्वत्र सर्वदा ॥

इलावृताय च नमो हरिवर्षाय चैव हि ।
नमः किंपुरुषेभ्यश्च भारताय नमो नमः ॥

नमो भारतदेवेभ्यो नागेभ्यश्चाथ सर्वदा ।
पातालेभ्यश्च सप्तभ्यो नरकेभ्यो नमो नमः ॥

कालाग्निरुद्रशेषाभ्यां हरये क्रोडरूपिणे ।
सप्तभ्यस्त्वथ लोकेभ्यो महाभूतेभ्य एव च ॥

तमसे रजसे चैव नमः प्रकृतये[1] तथा ।
पुरुषायाभिमानाय नमोऽस्त्वव्यक्तमूर्त्तये ॥

हिमवत्पुरुषेभ्यश्च पर्वतेभ्यो नमः सदा ।
पुराणीभ्यश्च[2] गंगाभ्यः सप्तभ्यश्च नमो नमः[3] ॥

नमोऽस्त्वद्यतनीभ्यश्च सप्तभ्यश्चाथ सर्वदा ।
नमोऽस्तु पुष्करादिभ्यस्तीर्थेभ्यश्च पुनः पुनः ॥

निम्नगाभ्यो नमो नित्यं [illegible] एव च ।
चतुर्दशभ्यो देवेभ्यो वीरणेभ्यो[4] नमो नमः[5] ॥

नमो धात्रे विधात्रे च नमो भूयो नमो नमः[6] ।
नमोऽस्तु धन्वन्तरये शस्त्रास्त्राभ्यां नमः सदा ॥

---

1. तथा म. 2. भ्ये ख. 3. नः सदा–म. 4. [illegible] 5. नः [illegible] 6. नः सदा–म.

विनायककुमाराभ्यां[1] विघ्नेभ्यश्च नमः सदा ।
[2]शिखाय च विशाखाय नैगमेयाय च वै नमः ॥

नमः स्कन्दग्रहेभ्यश्च स्कन्दमातृभ्य एव च ।
ज्वराय रोगपतये भस्मप्रहरणाय च ॥

ऋषिभ्यो बालखिल्येभ्यः काश्यपाय नमः सदा ।
अगस्तये नारदाय व्यासादिभ्यो नमो[3] नमः ॥

अप्सरोभ्यः सोमपेभ्यो देवेभ्यश्च तथा नमः ।
असोमपेभ्यश्च नमस्तुषितेभ्यो नमः सदा ॥

आदित्येभ्यो नमो नित्यं द्वादशभ्यश्च सर्वशः ।
एकादशभ्यो रुद्रेभ्यः सगणेभ्यो नमो नमः ॥

दशभ्यो विश्वदेवेभ्यः पुण्येभ्यश्च नमः सदा ।
नमो वसुभ्यस्त्वष्टभ्यो नमो योगिभ्य एव च ॥

द्वादशभ्यो भृगुभ्यश्च नमः सर्वत्र सर्वदा ।
दशभ्यस्त्वङ्गिरेभ्यश्च तपस्विभ्यो नमो[4] नमः ॥

नमो नासत्यदस्राभ्यामश्विभ्यां नित्यमेव हि ।
साध्येभ्यो द्वादशभ्यश्च पुराणेभ्यो नमः सदा ॥

एकोनपञ्चाशद्भ्योऽथ मरुद्भ्यश्च नमः[5] सदा ।
शिल्पाचार्याय देवाय नमस्ते विश्वकर्मणे ॥

---

1. [illegible]–ख, ग. 2. शिवाय च विशेषाय–ग. 3. मः सदा–ग. 4. मः सदा–ग. 5. [illegible]–क.

अष्टभ्यो लोकपालेभ्यः सायुधेभ्यश्च सर्वदा ।
[1] आयुधेभ्यो वाहनेभ्यो धर्मेभ्यश्च नमः सदा ॥

[2] आसनेभ्यो दुंदुभिभ्यो देवीभ्यश्च नमः सदा ।
दैत्यराक्षसगन्धर्वपिशाचेभ्यश्च नित्यशः ॥

[3] पितृभ्यः सप्तभेदेभ्यः प्रेतेभ्यश्च नमः सदा ।
सुसूक्ष्मेभ्यश्च देवेभ्यो भागवतेभ्य एव च ॥

नमस्ते बहुरूपाय विष्णवे परमात्मने ।
अथ किं बहुनोक्तेन; मन्त्रेणानेन चार्चयेत् ॥

प्राङ्मुखोदङ्मुखो वापि [4] देवानुद्दिश्य पूर्ववत् ।
अर्घैः पुष्पैश्च [5] दीपैश्च वस्त्रैर्माल्यैश्च धूपनैः ॥

धनधान्यान्नविभवैर्दक्षिणाभिश्च सर्वदा ।

[a] अथवा किं विस्तरेण, विप्रानेव दैवतोद्देशेन पूजयेदित्यर्थः ।

इतिहासपुराणाभ्यां [6] प्रवक्तॄंश्च द्विजोत्तमान् ॥

[b] इतिहासपुराणाभ्यां तत्पुस्तकदातेत्यर्थः ।

कालज्ञान् देवदेवज्ञान् भृत्यान् सम्बन्धिबान्धवान् ।
अनेनैव तु मन्त्रेण स्वाहान्तेन पृथक् पृथक् ॥

---

1. इ–ख. 2. दुंदुभि–क, ख. 3. वेष्वश्च–क. 4. देवं दृष्टि ख.
5. धू–ख. a. This line is omitted in Mss. क and ख. 6. श्रुत्वा पुरतश्च–क; श्रावान् पुरतश्च–ग. b. This line is found only in ख.

यविष्ठायाग्नये होमः[1] कर्त्तव्यः सर्वतृप्तये ।
वेदवच्चाहुतिं दत्त्वा स्थाने प्राधानिके सति ॥

[a] प्राधानिके स्थाने – प्रधानहोमारम्भे ।
वेदवत् – वेदेतिकर्त्तव्यतायुक्ताम् ।

आत्मशोभा ततः कार्या मङ्गलालंभनं तथा ।
भोजयित्वा द्विजान् सर्वान् मुनीन् सम्बन्धिबान्धवान् ।

विशेषण तु भोक्तव्यं, कार्यश्चापि महोत्सवः ।
नवसंवत्सरारंभे सर्वसिद्धिप्रवर्त्तकः ॥

इति ।[2] तत्र प्रतिपदौदयिकी ग्राह्या ।

चैत्रमासे[3] जगद् ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥

इति ब्रह्मपुराणात् । दिनद्वये तद्व्याप्तौ तदस्पर्शे वा पूर्वैव,

वत्सरादौ वसन्तादौ[4] बलिराज्ये तथैव च ।
तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यते ॥

इति वृद्धवसिष्ठोक्तेः । अस्य मलमासत्वे[5] तत्रैव संवत्सरारंभः ।[b] तस्या एव संवत्सराद्यतिथित्वात् । अत्र तैलाभ्यंगो नित्यः, "वत्सरादौ वसन्तादा"विति वृद्धवसिष्ठवचनात् । अत्रैव नवरात्रारंभः ।[c] अत्र मलमासपाते तु उत्कर्षः ।

---

1. हुत्वा-ग. a. This line is found only in ग. 2 अ–ग.
3. वे मासि–ख. 4 न्तादाविति वसि–क, ग; न्तादाविति वृद्धवसि–ख.
5, वृद्धवसिष्ठ.–ग. b. तस्या........नवरात्रारंभ :– omitted in ख.
c, Omitted in क, ख and ग.

अत्र प्रपादानमुक्तं[1] भविष्यपुराणे—

अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे ।
पुण्येऽह्नि[2] विप्रकथिते प्रपादानं समारभेत् ।।

इति । तत्र मन्त्रः—

प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ।
अस्याः प्रदानात् पितरस्तृप्यन्तु हि पितामहाः ।।

इति । तत्रैव,

अविचार्य ततो देयं जलं मासचतुष्टयम् ।
तथा, प्रपां दातुमशक्तेन विशेषात् धर्मलिप्सुना ।

प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः ।
ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः ।

तत्र मन्त्रः,

एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः ।।

[a]अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति ।
प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः ।।

इति । इयं श्वेतकल्यादिः । अत्र श्राद्धादि महाफलम् ।

[b]इति त्रिंशदमी कल्पा स्थितयः परमेष्ठिनः ।
आरंभतिथयस्तासु शुक्लाः पुण्यतमा मताः ।।

---

1. विष्णुपु—ख. 2. [illegible]—क. a. अनेन......[illegible] (P. 211) Omitted in घ. b. This line is omitted in ङ.

तासु श्राद्धे कृते पुण्यमाकल्पस्थायि कल्पते ।

इति पूर्वोदाहृतनागरखण्डात्[1] ।

चैत्रशुक्लतृतीयायामीश्वरयुतां गौरीमान्दोलयेत् संपूज्य[2] । तथा च देवीपुराणे—

तृतीयायां यजेद् देवीं शङ्करेण समन्विताम् ।
कुंकुमागरुकर्पूरमणिवस्त्रसुगन्धकैः ॥

स्रग्गन्धधूपदीपैश्च दमनेन* विशेषतः ।
आन्दोलयेत्ततो वत्स ! शिवोमातुष्टये[3] सदा ॥

रात्रौ जगरणं कार्यं प्रातर्देया च दक्षिणा ।
हेमवस्त्रान्नपानादि ताम्बूलानि स्रजस्तथा ॥

इति । मूर्त्तिस्वरूपमुक्तं[4] देवीपुराणे—

सौवर्णी[5] तु उमा कार्या राजतः शङ्करस्तथा[6] ।
चतुर्भुजस्तु देवेशोः द्विभुजा तु उमा भवेत् ॥

इति । इयं मुहूर्त्तमात्रापि परा कार्या गौरीदैवत्यत्वात् । इयं च मन्वादिः । शुक्लपक्षगतत्वात्[a] कुतपपूर्वाह्णव्यापिनी[7] ग्राह्या । हेमाद्रिस्तु,

पूर्वाह्णे तु सदा ग्राह्या शुक्ला मनुयुगादयः ।
दैवकर्मणि पित्र्ये च कृष्णो चैवापराह्णिकः ॥

---

1. इति नागर–क, ख. 2. यां कृत्यं देवीपुराणे–ग. 3. मे–ग.
4. यं दे–ख. 5. र्णे–क, घ. 6. वस्तु हरस्तथा–ख. a. शुक्लपक्षगत्वात्......ग्राह्येत्यन्त–omitted in Mss क and ग. 7. त्वात् पूर्वाह्ण–घ.
* a kind of flower.

इति गालववचनात् पौर्वाह्णिकी ग्राह्येत्याह । [a] सा च श्राद्धे अपराह्णव्यापिनी ग्राह्या, स्नानदानादावुत्तरा । अत्र श्राद्धमुक्तं मात्स्ये—

कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु ।
हायनानां द्विसाहस्रं पितॄणां तृप्तिदं भवेत् ॥

इति । [1] अधिकमासेऽपीदं कर्त्तव्यम् "मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि च" इति स्मृतिचन्द्रिकोक्तेः । [2] अत्र पिण्डदानं नास्ति । [b] तथा कालादर्शे,

विषुवायनसंक्रान्तिमन्वादिषु युगादिषु ।
विहाय पिण्डनिर्वापं सर्वं श्राद्धं समाचरेत् ॥

इति । एतदकरणे प्रायश्चित्तमुक्तं ऋग्विधाने—

त्वं भुवः प्रतिमन्त्रं [3] च शतवारं जले जपेत् ।
मन्वादयो यदा न्यूनाः कुरुते नैव वा यदि ॥

इति । एवं षण्णवतिश्राद्धान्यपि नित्यानि । तेषामयं संग्रहः—

१२ १४ ४ १२ १२ १६
अमामनुयुगक्रान्तिव्यतिपातमहालयाः
[4] ४ ४ १४
अन्वष्टक्यं च पूर्वेद्युः षण्णवत्योऽष्टकास्तथा ।

इयि । [5] इयमेव [6] चैत्रशुक्लतृतीया मत्स्यजयन्ती । चैत्रशुक्लपञ्चमीत्यन्ये । आषाढ-शुक्लैकादशीत्यपरे । इयं च मध्याह्नव्यापिनी ग्राह्या । तदुपासकानां च नित्या । अन्येषां काम्या ।

---

a सा च ..... नादावुत्तरा omited in Mss. ख and घ. 1. मलेऽपीदं–ख.' 2. इदं चापिण्डकम्–ग. 3. तु–घ. b. तथा ... समाचरेत् omitted in Ms ख. 4. Numbers are found only in Mss. क. 5. "[illegible]' is omitted in Mss ख and घ. 6. च तृती क, ग.

चैत्रशुक्लपञ्चमी[1] कल्पादि:। अत्र स्नानादि महाफालम् । अस्यामेव श्रीपूजोक्ता[2] हेमाद्रौ—

> चैत्रशुक्लस्य पञ्चम्यां पूजायित्वा तथा श्रियम् ।
> सकृदेवाप्नुयादेतत्फलं संवत्सरोद्भवम् ॥

इति। चैत्रशुक्लाष्टम्यां भवान्या उत्पत्तिः । तत्र भवानीयात्रोक्ता काशी-खण्डे—

> भवानीं यस्तु पश्येत शुक्लाष्टम्यां[3] मधौ नरः ।
> न जातु शोकं[4] लभते सदानन्तमयो भवेत् ॥

इति । अत्रैवाशोककलिकाप्राशनमुक्तं लैङ्गे—

> अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ ।
> चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ॥

पुनर्वसुयोगो नावश्यकः, किन्तु प्राशस्त्यातिशयार्थः ।

> तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितम् ।
> तस्मात् तिथिं प्रशंसन्ति न नक्षत्रं तिथिं विना ॥

इति ज्योतिःशास्त्रात् । [a] तथा तिथितत्त्वे स्कान्दे-

> मीने मधौ शुक्लपक्षे[5] अशोकाख्या[6] तथाष्टमी ।
> पिबेदशोककलिकाः[7] स्नायाल्लौहित्यवारिणि ॥

---

1 म्यां श्रीपूजोक्ता–क, ग. 2. जा हे–ख, घ. 3. ष्टोमं–द. 4. युतो–ख.
a. तथा तिथितत्त्वे............लौहित्यम्—omitted in Mss. ग and घ.
5. क्ष्यां–क. 6. मीं–क. 7. कां–ख.

इति मन्त्रेण व्रतं निवेद्याचम्य[1] प्राणानायम्य संकल्पं कुर्यात् । तत्र[2] संकल्पमन्त्रः—

उपोष्ये नवमीं त्वद्य यामेष्वष्टसु राघव ! ।
तेन प्रीतो भव त्वं भोः संसारात् त्राहि मां हरे ! ॥

इति । ततः

कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम् ।
दक्षिणाङ्के दशरथं पुत्रावेक्षणतत्परम् ॥

पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम् ।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ ॥

अग्रे व्यग्रं हनूमन्तं रामानुग्रहकांक्षिणम् ।

इति ध्यात्वा रामप्रतिमासमीपे[3] षट्कोणमध्ये कौसल्यां दशरथं च पूजयेत् । षट्कोणेषु "शं हृदयाय नमः" इत्यादिरूपेण हृदयानि षट् । षट्कोण-बाह्याष्टदलकमलदलमूलेषु हनूमन्तं सुग्रीवं भरतं विभीषणं लक्ष्मणं अङ्गदं शत्रुघ्नं जाम्बवन्तं च, दलमध्येषु धृष्टि, जयन्तं, विजयं सुराष्ट्रं, राष्ट्रवर्धनं, अकोपं, धर्मपालं, सुमन्त्रं च पूजयेत्[4] । दलाग्रेषु पूर्वादिक्रमेण अष्टौ लोकपालान्, तदग्रे वज्रं शक्तिं दण्डं खड्गं पाशमङ्कुशं गदां, शूलं चेति तेषां आयुधानि च पूजयेत् । रामपूजायां मूलमन्त्रः, इदं विष्णुरिति वा, ॐ रामाय नमः इति नाममन्त्रो वा ।

इन्द्रोऽग्निश्च यमश्चैव नैर्ऋतो वरुणोऽनिलः ।
कुबेर ईशो ब्रह्मादिदिक्पालाः स्नापयन्तु ते ॥

---

1. च संकल्पं–ग. 2. तत्र मन्त्रः–ग. 3. मां सन्निवेश्य क–ख.
4. प्रपू–ख.

इति स्नाने मन्त्रः[1] ।

रामस्य जननी चासि रामात्मकमिदं जगत् ।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते ॥

इति कौसल्यापूजायाम्[2] । ॐ नमो दशरथाय इति दशरथपूजायाम् । अन्येषां नाममन्त्राः ।

उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुयुते[3] मेषं गते पूषणि ।
निर्दग्धुं निखिलाः पलाशसमिधो मध्यादयोध्यारणे-
राविर्भूतमभूतपूर्वविभवं यत्किञ्चिदेकं महः ॥

इति । मध्याह्ने जन्मभावना वाद्यादिवादनं च । पुष्पाञ्जलेः पूर्वं फलपुष्पाम्बु अशोकरत्न[4]तुलसीदलयुक्तं[5] शंखं गृहीत्वार्घ्यं[6] दद्यात् । तत्र मन्त्रः–

दशाननवधार्थाय धर्मसंस्थापनाय[7] च ।
राक्षसानां विनाशाय दैत्यानां निधनाय च ॥
परित्राणाय साधूनां जातो रामः स्वयं हरिः ।
गृह्णात्वर्घ्यं[8] मया दत्तं भ्रातृभिः सहितोऽनघः[9] ॥

इति । ततः[a] पुष्पाञ्जलिं दद्यात् । रात्रौ जागरणं कृत्वा परदिने होमं कृत्वा प्रतिमादानं[10] कुर्यात् । प्रतिमादानमन्त्रस्तु[11],

---

1. मन्त्रेण स्नानम्–ख; स्नानमन्त्रः–ग. 2. पूजनम्–ख. 3. दिने–क. 4 क्रतु–ख. 5. क्तेन शंखेनार्घ्यं–ग. 6. र्घं–ख. 7. रक्षणाय–घ. 8. गृहाणार्घ्यं–ख. 9. तो मम–क, ग. a. ततः....कुर्यात्–Omitted in घ. 10. मां दद्यात्–ग. 11. तत्र मन्त्रस्तु–क, ग; तत्र मन्त्रः–ख.

इमां स्वर्णमयीं रामप्रतिमां समलङ्कृताम् ।
चित्रवस्त्रयुगच्छन्नां रामाहं राघवाय ते ॥

श्रीरामप्रीतये दास्ये[1] तुष्टो भवतु राघवः, । इति ।

ततो भूमिं दक्षिणां दद्यात् ।

इति दत्त्वा विधानेन दद्याद्वै दक्षिणां भुवम् ।
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ॥

इति[2] वचनात् ।

चैत्रशुक्लैकादश्यां[3] दोलोत्सव उक्तो ब्राह्मे—

चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः ।
आन्दोलनीयो देवेशः सलक्ष्मीको महोत्सवैः[4] ॥

इति । चैत्रशुक्लद्वादश्यां[5] दमनोत्सवः—

द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः ।
बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरम् ॥

इति रामार्चनचन्द्रिकोक्तेः । अत्र पारणाहर्विवक्षितम् ।

पारणाहेन लभ्येत द्वादशी कलयापि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे ॥

इति तत्रैवोक्तेः[6] । नित्यम् चेदम् ।

ऊर्जे व्रतं मधौ दोलां श्रावणे तन्तुपूजनम् ।
चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः[7] ॥

1. तुष्यते दास्ये प्रीतो भ-घ. 2. इति । चै-क, ख, घ. 3. [illegible] ब्रा-घ. 4. वः-ख. 5. वक्तव्यं रामार्चनचन्द्रिकायाम्-घ. 6. त्रोक्तेः-घ. 7. पतत्य-ख.

इति पद्मपुराणात्[1] । इदं[2] शुक्रास्तादावपि कार्यम् ।

उपाकर्मोत्सर्जनं च पवित्रं[3] दमनार्पणम् ।
ईशानस्य बलिं विष्णोः शयनं परिवर्त्तनम् ॥

कुर्याच्छुक्रस्य च गुरोर्मौढ्येऽपीति[4] विनिश्चयः ।
इति वृद्धगार्ग्यवचनात् ।

[a]चैत्रशुक्लत्रयोदश्यामनंगव्रतम् । तत्र पूर्वा ग्राह्या । अस्यामेव मदनपूजोक्ता कूर्मपुराणे—

चैत्रशुक्लत्रयोदश्यां मदनं[5] चन्दनात्मकम् ।
कृत्वा संपूज्य यत्नेन वीजयेद् व्यजनेन च ॥

ततः संधुक्षितः कामः पुत्रपौत्रसमृद्धिदः ।

इति । इयमुदानकल्पादिः । चैत्रशुक्लचतुर्दशी[6] दमनकारोपणे रात्रियोगिनी पूर्वा ग्राह्या ।

"मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी ।
सा रात्रिव्यापिनी ग्राह्या[7] परा पूर्वाह्णगामिनी" ॥

इति बौधायनोक्तेः चैत्री[8] पौर्णमासी सामान्यनिर्णयात्परैव । पौर्णमास्यां कृत्यविशेषो[9] विष्णुस्मृतौ-"चैत्री चित्रायुता चेत् स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति" इति । तथा ब्राह्मे—

मन्दे चार्के गुरौ वापि वारेष्वेतेषु चैत्रकी ।
तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्भवेत्[10] ॥

---

1. पाद्मात्–म. 2. तथा शु–ग. 3. त्र द–क, ग, घ. 4. पि च–ख.
a. चैत्र...... कूर्मपुराणे–omitted in Mss. क and म. 5. कमर्न–ख, ग.
6. शी रात्रि–घ. 7. ग्राह्या इति बौधायनवचनात्–क, ख, घ. 8. चैत्रपौर्णमास्यां कृत्यविशेषो विष्णु–क; चैत्रीकृत्यं तु विष्णु–ग. 9. अत्र वि–घ.
10. दानादि–म.

वायवीये—

संवत्सरकृतार्चायाः साफल्यायाखिलान् सुरान् ।
दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवम् ॥

अत्र परा ग्राह्या । "सावित्रीव्रतमन्तरेण भवतोऽमापूर्णमास्ये परे" इति दीपिकोक्तेः । इयं मन्वादिः । चैत्रकृष्णचतुर्दश्यां विशेषमाह पुलस्त्यः—

चैत्रे कृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ ।
न प्रेतत्वमवाप्नोति गयायां तु विशेषतः ॥

इति । अत्र पूर्वा ग्राह्या कृष्णपक्षगतत्वात् ।

इति[1] कृत्यरत्नावल्यां चैत्रकृत्यानि ॥

अथ वैशाखकृत्यम् ।

[2]पाद्मे—

तीर्थे चानुदिनं स्नानं तिलैश्च पितृतर्पणम् ।
दानं धर्मघटादीनां मधुसूदनपूजनम् ॥
माधवे मासि कुर्वीत[3] मधुसूदनतुष्टिदम् ।

अथ वैशाखस्नानं विष्णुस्मृतिपाद्मयोः—

तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ॥

इति । अत्र सौरमास उक्तः । अन्यदपि[4] पक्षद्वयमुक्तं पाद्मे—

मधुमासस्य शुक्लायामेकादश्या[5]मुपोषितः ।
पञ्चदश्यां च भो वीर! मेषसंक्रमणेऽपि वा ॥

---

1. चैत्रकृत्यानि—क, ग; चैत्रकृत्यम्—ख. 2. Omitted in Ms. ख. 3. कुर्वन्ति म. 4. पक्षान्तरं पाद्मे—ग. 5. श्यां विशेषतः—ख.

वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ।
मधुसूदनमभ्यर्च्य कुर्यात् संकल्पपूर्वकम् ॥

इति । तत्र मन्त्रः—

वैशाखं सकलं मासं मेषसंक्रमणे रवेः ।
प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥

मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात् ।
निर्विघ्नमस्तु मे पुण्यं[1] वैशाखस्नानमन्वहम् ॥

माधवे मेषगे भानौ मुरारे! मधुसूदन! ।
प्रातः स्नानेन मे नाथ फलदो भव पापहन्! ॥

इति । तीर्थानामपरिज्ञाने तत्रैव—

यदा न ज्ञायते नाम तस्य तीर्थस्य भो द्विजाः! ।
तत्रेत्युच्चारणं कार्यं[2] विष्णुतीर्थमिदं त्विति ॥

अत्र त्रिकालं विष्णुपूजा[3] कार्या अश्वत्थमूले जलदानं च इत्यादि तत्रैवोक्तम् ।

अशक्तस्य[4] त्र्यहं[5] स्नानमुक्तं पाद्मे—

त्रयोदश्यां चतुर्दश्यां वैशाख्यां च दिनत्रयम् ।
अपि सम्यग्विधानेन नारी वा पुरुषोऽपि वा ॥

प्रातःस्नातः सुनियतः सर्वपापैः प्रमुच्यते ।

इति । यदा[6] तु[7] वैशाखो मलमासस्तदा समाप्तिः शुद्धमासे[8] पूर्णमायां[9] कार्या ।

---

1. कार्यं—ख. 2. कुर्यात्—क. 3. च अ—ग. 4. वतं प्रति पाद्मे—ग. 5. स्थं स्ना—क. 6. अस्य मलत्वे समाप्तिः—ग. 7. यदा वै—क. 8 मासे—ग. 9. कर्तव्या—ग.

तथा—[a]

वैशाख्यां विधिवत् स्नात्वा भोजयेद् ब्राह्मणान् दश ।
कृसरं सर्वपापेभ्यो मुच्यते नात्र संशयः ।।

इति । [b] वैशाखकृष्णप्रतिपद् नारसिंहकल्पादिः । त्रयोदशी गौरीकल्पादिः । वैशाखशुक्लतृतीया अक्षयतृतीया । इयं गौरीव्रते उत्तरा[1] कार्या ।

रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ! ।
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते ।।

इति ब्रह्मवैवर्तात् । गणो गणेशस्तेन लक्षणया तद्देवत्या[2] चतुर्थी ।

द्वितीयया तु या विद्धा तृतीया न कदाचन ।
कर्त्तव्या व्रतिभिस्तात ! धर्मकामार्थतत्परैः ।।

इति स्कन्दपुराणे द्वितीयाविद्धानिषेधाच्च । निषेधप्रयोजकश्च[3] अत्र द्वितीयावेधो न त्रिमुहूर्त्तात्मकः, किन्तु कलाकाष्ठादिरूपोऽपि । अत एव तृतीयापि गौरीव्रते स्वल्पापि परा ग्राह्या[4] । व्रतान्तरेषु त्रिमुहूर्त्तद्वितीयावेधेन[5] त्याज्यत्वं, द्वितीयदिने[6] त्रिमुहूर्त्तीया एव ग्राह्यत्वमित्यादि अन्यत्र मत्कृतौ द्रष्टव्यम् । [7] यदा तु चतुर्थीयुता किञ्चिदपि न लभ्यते तदा गौरीव्रते त्रिमुहूर्त्तालाभे च इतरव्रतेष्वपि द्वितीयाविद्धापि ग्राह्या,

एकादशी तृतीया च षष्ठी चैव त्रयोदशी[8] ।
पूर्वविद्धापि कर्त्तव्या यदि न स्यात् परेऽहनि ।।

---

a. तथा, वैशाख्यां ... नात्र संशयः इति—Omitted in क. b. From "वैशाखकृष्ण" (P. 22) to "वत्वानन्तफलं लभेत्" (P. 25)—Omitted in Ms. घ.

1. परा–घ. 2. गणेशदेवत्या–ग. 3. कः कलाकाष्ठादिरूपोऽपि हेयः–घ. 4. द्वि प्रा–क. 5. संवेधेन–क, ख. 6. परदि–ग. 7. यदेतु: सर्वपक्षसत्त्वे गौरीव्रते त्रिमुहूर्त्तसत्त्वे च व्रतान्तरे द्वितीया–ग. 8. चतुर्दशी–ख.

इति वृद्धवसिष्ठवचनात्[1] । इयं च त्रेतायुगादिः[2] । तत्र श्राद्धं नित्यं काम्यं च । युगाद्यास्वित्युपक्रम्य,[3]

पानीयमप्यत्र तिलैर्विमिश्रं[4] दद्यात् पितृभ्यः प्रयतो मनुष्यः ।

इति विष्णुपुराणाच्च । "युगादयः स्मृताः[a] ह्येताः पितॄणां तृप्तिहेतवः" इति मत्स्यपुराणाच्च[5] । इयं श्राद्धे अपराह्णव्यापिनी ग्राह्या, तस्यापराह्णकालत्वात् । कालव्याप्तिशास्त्रस्य[b] च सर्वापेक्षया बलवत्त्वात् । अत एव अमावास्या-श्राद्धनिर्णयमुक्त्वोक्तं कालादर्शे—

एवं मन्वन्तरादीनां युगादीनां विनिर्णयः ।
महालयस्य पक्षस्य अष्टकानामपि स्मृतः ॥

इति । मनुः,

द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः ।
शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके ॥

इति वचनं[6] तद् द्वेधा विविक्तपूर्वास्तापराह्णान्तर्गतयोः कृतपपूर्वोत्तरार्धयोः शुक्लकृष्णभेदेनोपक्रमकालत्वव्यवस्थापकम् ।

शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षेऽपराह्णे तु रौहिणं तु न लंघयेत् ॥

---

1. [illegible]—ग. 2. म—ग. 3. यु.............स्य—omitted in ग.
4. [illegible]—क, ख. a. This line is omitted in ग. 5. [illegible]—ग.
b. This line is omitted in Ms. ग. 6. [illegible] [illegible]—क; तदपि उपक्रमपरम्—ख.

तथा[a]—

वैशाख्यां विधिवत् स्नात्वा भोजयेद् ब्राह्मणान् दश ।
कृसरं सर्वपापेभ्यो मुच्यते नात्र संशयः ॥

इति । वैशाखकृष्णप्रतिपद्[b] नारसिंहकल्पादिः । त्रयोदशी गौरीकल्पादिः । वैशाखशुक्लतृतीया अक्षयतृतीया । इयं गौरीव्रते उत्तरा[1] कार्या ।

रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ! ।
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते ॥

इति ब्रह्मवैवर्तात् । गणो गणेशस्तेन लक्षणया तद्देवत्या[2] चतुर्थी ।

द्वितीयया तु या विद्धा तृतीया न कदाचन ।
कर्त्तव्या व्रतिभिस्तात ! धर्मकामार्थतत्परैः ॥

इति स्कन्दपुराणे द्वितीयाविद्धानिषेधाच्च । निषेधप्रयोजकश्च[3] अत्र द्वितीयावेधो न त्रिमुहूर्त्तात्मकः, किन्तु कलाकाष्ठादिरूपोऽपि । अत एव तृतीयापि गौरीव्रते स्वल्पापि[4] परा ग्राह्या । व्रतान्तरेषु त्रिमुहूर्त्तद्वितीयावेधेन[5] त्याज्यत्वं, द्वितीयदिने[6] त्रिमुहूर्त्तीया एव ग्राह्यत्वमित्यादि अन्यत्र मत्कृतौ द्रष्टव्यम् । यदा[7] तु चतुर्थीयुता किञ्चिदपि न लभ्यते तदा गौरीव्रते त्रिमुहूर्त्तालाभे च इतरव्रतेष्वपि द्वितीयाविद्धापि ग्राह्या,

एकादशी तृतीया च षष्ठी चैव[8] त्रयोदशी ।
पूर्वविद्धापि कर्त्तव्या यदि न स्यात् परेऽहनि ॥

---

a. तथा, वैशाख्यां .. ..नात्र संशयः इति—Omitted in क. b. From "वैशाखकृष्ण" (P. 22) to "तत्वानन्तफलं लभेत्" (P. 25)—Omitted in Ms. ख.
1. परा—घ. 2. गणेशदेवत्या—ग. 3. कः कलाकाष्ठादिरूपोऽपि हेयः—घ. 4. स्वि प्रा—क. 5. त्रिवेधेन—क, ख. 6. परदि—ग. 7. परेषु सर्वपर्वसत्त्वे गौरीव्रते त्रिमुहूर्त्तसत्त्वे च व्रतान्तरे द्वितीया—ग. 8. चतुर्दशी—ख.

इति वृद्धवसिष्ठवचनात्[1] । इयं च त्रेतायुगादिः[2] । तत्र श्राद्धं नित्यं काम्यं च ।
[3] युगाद्यास्वित्युपक्रम्य,

पानीयमप्यत्र तिलैर्विमिश्रं[4] दद्यात् पितृभ्यः प्रयतो मनुष्यः ।

इति विष्णुपुराणाच्च । [a] "युगादयः स्मृताः ह्येताः पितृणां तृप्तिहेतवः" इति
[5] मत्स्यपुराणाच्च । इयं श्राद्धे अपराह्णव्यापिनी ग्राह्या, तस्यापराह्णकालत्वात् ।
[b] कालव्याप्तिशास्त्रस्य च सर्वापेक्षया बलवत्त्वात् । अत एव अमावास्याश्राद्धनिर्णयमुक्त्वोक्तं कालादर्शे—

एवं मन्वन्तरादीनां युगादीनां विनिर्णयः ।
महालयस्य पक्षस्य अष्टकानामपि स्मृतः ॥

इति । यत्तु,

द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः ।
शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके ॥

इति वचनं[6] तद् द्वेधा विविक्तपूर्वास्तापराह्णान्तर्गतयोः कुतपपूर्वोत्तरार्द्धयोः शुक्लकृष्णभेदेनोपक्रमकालत्वव्यवस्थापकम् ।

शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षेऽपराह्णे तु रौहिणं तु न लंघयेत् ॥

---

1. [illegible]—ग. 2. म—ग. 3. यु……………स्य—omitted in ग.
4. [illegible]—ग, घ. a. This line is omitted in ग. 5. [illegible]—ग.
b. This line is omitted in Ms. क. 6. [illegible]—क;
तदपि उपक्रमपरम्—ख.

इति[1] वायवीयवचनात् । यद्वा यदा शुक्लपक्षगता युगादितिथिः पूर्वदिने कुतपोत्तारार्धमेवारभ्य प्रवृत्ता उत्तरदिने वृद्ध्यापराह्णेऽपि किञ्चिद्वर्तते तदा संपूर्णापराह्णव्यापित्वेन पूर्वदिनगताया[2] एव ग्राह्यत्वे प्राप्ते तदबाधत्वेन कुतपपूर्वार्धरूपपूर्वाह्णव्यापिनी अल्पापराह्णस्पर्शिन्यप्युत्तरा ग्राह्येति विधीयते । न च तदापराह्णशास्त्रस्याप्यत्यन्तबाधः[3] । अपराह्णेऽपि किञ्चित्तस्या विद्यमानत्वात् । हेमाद्रेस्तु मन्वादिष्वप्ययं[4] निर्णयः सम्मतः,

या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः ।
स्नात्वा हुत्वा च जप्त्वा च दत्त्वानन्तफलं लभेत् ॥

इति । भारतोक्तस्नानादौ[5] तूत्तरा । केचित्तु,

वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै ।
हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथा ॥ इति गोभिलवचनात्,

पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयः । इति नारदवचनाच्च श्राद्धेऽपि पूर्वाह्णव्यापिन्युत्तरा कार्येति वदन्ति, तत्कालादर्शादिविरुद्धमयुक्तं च "अपराह्णः पितृणाम्, अपराह्णे तु पैतृकम्, अपराह्णे पितृक्रिया" इति[6] वचनैः अपराह्णकालत्वाभिधानात्[7] ।

कर्मणो यस्य यः कालः[8][a] तत्कालव्यापिनी तिथिः ।
तया कर्माणि कुर्वन्ति ह्रासवृद्धी न कारणम् ॥

1. इति वचनात्–ख. 2. पूर्वस्या एव प्राप्तौ अल्पापराह्णव्यापिन्युत्तरा ग्राह्येति विधत्ताम्–ग. 3. स्यास्य–ग. 4. ष्वयं–क. 5. इति वदन्ति केचि–ग. 6. स्यादिव–ख. 7. त्वोक्तेः–ग. 8. सः इति वाक्यात्–ख; सः तत्कालव्यापिनी तिथिरिति वाक्यात्–ग. a. The portion from "तत्कालव्यापिनी" to "यमः" (Page 26) is omitted in Ms. ख.

इति वाक्यात् प्राप्तस्यापराह्णकालस्याबाधेनोपपत्तौ बाधायोगात् आद्यवचनं त्वनाकरं पित्र्यतर्पणादिविषयं वा । साकरत्वेऽपि पितृद्देशेन क्रियमाण-तर्पणादिविषयं[1] व्याख्येयम् । नारदवचनं तु "द्वे शुक्ले" इति वचनवदेव व्याख्येयम् । इदं च युगादिश्राद्धकृत्यं युगादितिथिमध्ये एव कर्त्तव्यम् ।

मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया ।।

इति स्कन्दपुराणात्[2] । भविष्ये—

वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च ।
गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ।।

तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् ।
यवान् दद्याद् द्विजातिभ्यः प्रयतः प्राशयेद् यवान् ।।

इति । अत्र दानविशेषो भविष्ये इमां प्रक्रम्य—

उदकुम्भान् सकनकान् सान्नान् सर्वरसैः सह ।
यवगोधूमचणकान् सक्तून् दध्योदनं तथा ।।

ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते ।

इति । देवीपुराणे—

तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रपूज्य च ।
उदकुम्भप्रदानेन शिवलोके महीयते ।। इति ।

मन्त्रस्तु, "एष धर्मघटो दत्तः" इति पूर्वमुक्तः । पितृद्देशेनोदकुंभदाने[3] तु,

---

1. यमित्यन्यत्र विस्तरः । भविष्ये—घ. 2. स्कान्दात्-ग. 3. पित्र्ये तु—ग.

इति मन्त्रेण व्रतं निवेद्याचम्य[1] प्राणानायम्य संकल्पं कुर्यात् । तत्र[2] संकल्पमन्त्रः—

उपोष्ये नवमीं त्वद्य यामेष्वष्टसु राघव ! ।
तेन प्रीतो भव त्वं भोः संसारात् त्राहि मां हरे ! ॥

इति । ततः

कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम् ।
दक्षिणाङ्के दशरथं पुत्रावेक्षणतत्परम् ॥

पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम् ।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ ॥

अग्रे व्यग्रं हनूमन्तं रामानुग्रहकांक्षिणम् ।

इति ध्यात्वा रामप्रतिमासमीपे[3] षट्कोणमध्ये कौसल्यां दशरथं च पूजयेत् । षट्कोणेषु "शं हृदयाय नमः" इत्यादिरूपेण हृदयानि षट् । षट्कोणबाह्याष्टदलकमलदलमूलेषु हनूमन्तं सुग्रीवं भरतं विभीषणं लक्ष्मणं अङ्गदं शत्रुघ्नं जाम्बवन्तं च, दलमध्येषु धृष्टिं, जयन्तं, विजयं सुराष्ट्रं, राष्ट्रवर्धनं, अकोपं, धर्मपालं, सुमन्त्रं च पूजयेत्[4] । दलाग्रेषु पूर्वादिक्रमेण अष्टौ लोकपालान्, तदग्रे वज्रं शक्तिं दण्डं खड्गं पाशमङ्कुशं गदां, शूलं चेति तेषां आयुधानि च पूजयेत् । रामपूजायां मूलमन्त्रः, इदं विष्णुरिति वा, ॐ रामाय नमः इति नाममन्त्रो वा ।

इन्द्रोऽग्निश्च यमश्चैव नैर्ऋतो वरुणोऽनिलः ।
कुबेर ईशो ब्रह्मादिदिक्पालाः स्नापयन्तु ते ॥

---

1. [illegible]   2. तत्र मन्त्रः—ग.   3. [illegible]
4. प्रपू—ख.

इति स्नाने मन्त्रः[1] ।

रामस्य जननी चासि रामात्मकमिदं जगत् ।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते ॥

इति कौसल्यापूजायाम्[2] । ॐ नमो दशरथाय इति दशरथपूजायाम् । अन्येषां नाममन्त्राः ।

उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुयुते[3] मेषं गते पूषणि ।
निर्दग्धुं निखिलाः पलाशसमिधो मध्यादयोध्यारणे-
राविर्भूतमभूतपूर्वविभवं यत्किञ्चिदेकं महः ॥

इति । मध्याह्ने जन्मभावना वाद्यादिवादनं च । पुष्पाञ्जलेः पूर्वं फलपुष्पाम्बु अशोक[4]रत्नतुलसीदलयुक्तं[5] शंखं गृहीत्वार्घ्यं[6] दद्यात् । तत्र मन्त्रः—

दशाननवधार्थाय धर्मसंस्थापनाय[7] च ।
राक्षसानां विनाशाय दैत्यानां निधनाय च ॥
परित्राणाय साधूनां जातो रामः स्वयं हरिः ।
गृह्णात्वर्घ्यं[8] मया दत्तं भ्रातृभिः सहितोऽनघः[9] ॥

इति । ततः[a] पुष्पाञ्जलिं दद्यात् । रात्रौ जागरणं कृत्वा परदिने होमं कृत्वा प्रतिमादानं[10] कुर्यात् । प्रतिमादानमन्त्रस्तु[11],

1. मन्त्रेण स्नानम्–ख; स्नानमन्त्रः–ग. 2. पूजनम्–ख. 3. दिने–क.
4 कतु–ख. 5. क्तेन शंखेनार्घ्यं–ग. 6. र्घं–ख. 7. रक्षणाय–घ.
8. गृहाणार्घ्यं–ख. 9. तो मम–क, ग. a. ततः....कुर्यात्–Omitted in घ.
10. मां दद्यात्–ग. 11. तत्र मन्त्रस्तु–क, ग; तत्र मन्त्रः–ख.

इमां स्वर्णमयीं रामप्रतिमां समलङ्कृताम् ।
चित्रवस्त्रयुगच्छन्नां रामाहं राघवाय ते ॥

श्रीरामप्रीतये दास्ये[1] तुष्टो भवतु राघवः, । इति ।

ततो भूमि दक्षिणां दद्यात् ।

इति दत्त्वा विधानेन दद्याद्वै दक्षिणां भुवम् ।
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ॥

इति[2] वचनात् ।

चैत्रशुक्लैकादश्यां[3] दोलोत्सव उक्तो ब्राह्मे—

चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः ।
आन्दोलनीयो देवेशः सलक्ष्मीको महोत्सवैः[4] ॥

इति । चैत्रशुक्लद्वादश्यां दमनोत्सवः[5]—

द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः ।
बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरम् ॥

इति रामार्चनचन्द्रिकोक्तेः । अत्र पारणाहर्विवक्षितम् ।

पारणाहेन लभ्येत द्वादशी कलयापि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे ॥

इति तत्रैवोक्तेः[6] । नित्यम् चेदम् ।

ऊर्जे व्रतं मधौ दोलां श्रावणे तन्तुपूजनम् ।
चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः[7] ॥

1. तुष्ट्ये दास्ये प्रीतो भ–घ. 2. इति । चै–क, ख, घ. 3. [illegible]कृत्यं ब्रा–घ. 4. वः–ख. 5. वकृत्यं रामार्चनचन्द्रिकायाम्–ग. 6. त्रोक्तेः–घ. 7. पतत्य–ख.

इति पद्मपुराणात्[1] । इदं[2] शुक्रास्तादावपि कार्यम् ।

उपाकर्मोत्सर्जनं च पवित्रं[3] दमनार्पणम् ।
ईशानस्य बलिं विष्णोः शयनं परिवर्त्तनम् ॥

कुर्याच्छुक्रस्य च गुरोर्मौढ्येऽपीति[4] विनिश्चयः ।

इति वृद्धगार्ग्यवचनात् ।

चैत्र[a]शुक्लत्रयोदश्यामनंगव्रतम् । तत्र पूर्वा ग्राह्या । अस्यामेव मदनपूजोक्ता कूर्मपुराणे—

चैत्रशुक्लत्रयोदश्यां मदनं[5] चन्दनात्मकम् ।
कृत्वा संपूज्य यत्नेन वीजयेद् व्यजनेन च ॥

ततः संधुक्षितः कामः पुत्रपौत्रसमृद्धिदः ।

इति । इयमुदानकल्पादिः । चैत्रशुक्लचतुर्दशी[6] दमनकारोपणे रात्रियोगिनी पूर्वा ग्राह्या ।

"मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी ।
सा रात्रिव्यापिनी ग्राह्या[7] परा पूर्वाह्णगामिनी" ॥

इति बौधायनोक्तेः चैत्री[8] पौर्णमासी सामान्यनिर्णयात्परैव । पौर्णमास्यां कृत्यविशेषो[9] विष्णुस्मृतौ-"चैत्री चित्रायुता चेत् स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति" इति । तथा ब्राह्मे—

मन्दे चार्के गुरौ वापि वारेष्वेतेषु चैत्रकी ।
तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्भवेत्[10] ॥

---

1. पाद्मात्-ख. 2. तथा शु-ग. 3. त्र द-क, ग, घ. 4. पि च-ख.
a. चैत्र...... कूर्मपुराणे-omitted in Mss. क and ख. 5. दमनं-ख, ग.
6. शी रात्रि-घ. 7. ग्राह्या इति बौधायनवचनात्-क, ख, घ. 8. चैत्रपौर्णमास्यां कृत्यविशेषो विष्णु-क; चैत्रीकृत्यं तु विष्णु-ग. 9. अत्र वि-घ.
10. दानादि-ख.

वायवीये—

संवत्सरकृतार्चायाः साफल्यायाखिलान् सुरान् ।
दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवम् ॥

अत्र परा ग्राह्या । "सावित्रीव्रतमन्तरेण भवतोऽमापूर्णमास्ये परे" इति दीपिकोक्तेः । इयं मन्वादिः । चैत्रकृष्णचतुर्दश्यां विशेषमाह पुलस्त्यः—

चैत्रे कृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ ।
न प्रेतत्वमवाप्नोति गयायां तु विशेषतः ॥

इति । अत्र पूर्वा ग्राह्या कृष्णपक्षगतत्वात् ।

इति[1] कृत्यरत्नावल्यां चैत्रकृत्यानि ॥

अथ वैशाखकृत्यम् ।

पाद्मे[2]—

तीर्थे चानुदिनं स्नानं तिलैश्च पितृतर्पणम् ।
दानं धर्मघटादीनां मधुसूदनपूजनम् ॥
माधवे मासि कुर्वीत[3] मधुसूदनतुष्टिदम् ।

अथ वैशाखस्नानं विष्णुस्मृतिपाद्मयोः—

तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ॥

इति । अत्र सौरमास उक्तः । अन्यदपि[4] पक्षद्वयमुक्तं पाद्मे—

मधुमासस्य शुक्लायामेकादश्यामुपोषितः[5] ।
पञ्चदश्यां च भो वीर ! मेषसंक्रमणेऽपि वा ॥

---

1. चैत्रकृत्यानि—क, ग; चैत्रकृत्यम्-ख. 2. Omitted in Ms. ख. 3. कुर्वन्ति ग. 4. पक्षान्तरं पाद्मे—ग. 5. श्यां विशेषतः-ख.

वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया ।
मधुसूदनमभ्यर्च्य कुर्यात् संकल्पपूर्वकम् ॥

इति । तत्र मन्त्रः—

वैशाखं सकलं मासं मेषसंक्रमणे रवेः ।
प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥

मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात् ।
निर्विघ्नमस्तु मे पुण्यं[1] वैशाखस्नानमन्वहम् ॥

माधवे मेषगे भानौ मुरारे! मधुसूदन! ।
प्रातः स्नानेन मे नाथ फलदो भव पापहन्! ॥

इति । तीर्थानामपरिज्ञाने तत्रैव—

यदा न ज्ञायते नाम तस्य तीर्थस्य भो द्विजाः! ।
तत्रेत्युच्चारणं कार्यं[2] विष्णुतीर्थमिदं त्विति ॥

अत्र त्रिकालं विष्णुपूजा[3] कार्या अश्वत्थमूले जलदानं च इत्यादि तत्रैवोक्तम् ।

अशक्तस्य[4] त्र्यहं[5] स्नानमुक्तं पाद्मे—

त्रयोदश्यां चतुर्दश्यां वैशाख्यां च दिनत्रयम् ।
अपि सम्यग्विधानेन नारी वा पुरुषोऽपि वा ॥
प्रातःस्नातः सुनियतः सर्वपापैः प्रमुच्यते ।

इति । यदा[6] तु[7] वैशाखो मलमासस्तदा समाप्तिः शुद्धमासे[8] पूर्णिमायां कार्या[9] ।

---

1. कार्य–ख. 2. कुर्यात्–क. 3. च अ–ग. 4. वर्ते प्रति पार्श्वे–ग.
5. स्व स्ना–क. 6. अस्य मलत्वे समाप्तिः–ख. 7. यदा वै–क.
8 मासे–ग. 9. कर्तव्या–ग.

[a] तथा—

वैशाख्यां विधिवत् स्नात्वा भोजयेद् ब्राह्मणान् दश ।
कृसरं सर्वपापेभ्यो मुच्यते नात्र संशयः ।।

इति । [b] वैशाखकृष्णप्रतिपद् नारसिंहकल्यादिः । त्रयोदशी गौरीकल्पादिः । वैशाखशुक्लतृतीया अक्षयतृतीया । इयं गौरीव्रते उत्तरा[1] कार्या ।

रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ! ।
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते ।।

इति ब्रह्मवैवर्तात् । गणो गणेशस्तेन लक्षणया तद्देवत्या[2] चतुर्थी ।

द्वितीयया तु या विद्धा तृतीया न कदाचन ।
कर्त्तव्या व्रतिभिस्तात ! धर्मकामार्थतत्परैः ।।

इति स्कन्दपुराणे द्वितीयाविद्धानिषेधाच्च । निषेधप्रयोजकश्च[3] अत्र द्वितीयावेधो न त्रिमुहूर्त्तात्मकः, किन्तु कलाकाष्ठादिरूपोऽपि । अत एव तृतीयापि गौरीव्रते स्वल्पापि[4] परा ग्राह्या । व्रतान्तरेषु त्रिमुहूर्त्तद्वितीयावेधेन[5] त्याज्यत्वं, [6]द्वितीयदिने त्रिमुहूर्त्तया एव ग्राह्यत्वमित्यादि अन्यत्र मत्कृतौ द्रष्टव्यम् । [7]यदा तु चतुर्थीयुता किञ्चिदपि न लभ्यते तदा गौरीव्रते त्रिमुहूर्त्तलाभे च इतरव्रतेष्वपि द्वितीयाविद्धापि ग्राह्या,

एकादशी तृतीया च षष्ठी चैव त्रयोदशी[8] ।
पूर्वविद्धापि कर्त्तव्या यदि न स्यात् परेऽहनि ।।

---

a तथा, वैशाख्यां . . . नात्र संशयः इति—Omitted in क. b. From "वैशाखकृष्ण" (P. 22) to "दत्वानन्तफलं लभेत्" (P. 25)—Omitted in Ms. ख.

1. परा—ग. 2. गणेशदैवत्या—ग. 3. ग्रः कलाकाष्ठाविरूपोऽपि हेयः—ग. 4. [illegible] प्रा—क. 5. [illegible]—क, ख. 6. परवि—ग. 7. परेद्युः [illegible] गौरीव्रते त्रिमुहूर्त्तसत्वे च व्रतान्तरे द्वितीया—ग. 8. चतुर्दशी—ख.

इति वृद्धवसिष्ठवचनात्[1] । इयं च त्रेतायुगादिः[2] । तच्च श्राद्धं नित्यं काम्यं च । [3]युगाद्यादित्युपक्रम्य,

पानीयमप्यत्र तिलैर्विमिश्रं[4] दद्यात् पितृभ्यः प्रयतो मनुष्यः ।

इति विष्णुपुराणाच्च । "[a]युगाद्यः स्मृताः ह्येताः पितॄणां तृप्तिहेतवः" इति [5]मत्स्यपुराणाच्च । इयं श्राद्धे अपराह्णव्यापिनी ग्राह्या, तस्यापराह्णकालत्वात् । [b]कालव्याप्तिशास्त्रस्य च सर्वापेक्षया बलवत्त्वात् । अत एव अमावास्याश्राद्धनिर्णयमुक्त्वोक्तं कालादर्शे—

एवं मन्वन्तरादीनां युगादीनां विनिर्णयः ।
महालयस्य पक्षस्य अष्टकानामपि स्मृतः ॥

इति । अत्र,

द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः ।
शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके ॥

इति वचनं[6] तद् द्वेधा विविक्तपूर्वास्तापराह्णान्तर्गतयोः कुतपपूर्वोत्तरार्द्धयोः शुक्लकृष्णभेदेनोपक्रमकालत्वव्यवस्थापकम् ।

शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षेऽपराह्णे तु रौहिणं तु न लंघयेत् ॥

---

1. [illegible]—ग. 2. च—ग. 3. यु............स्य—omitted in ग. 4. [illegible]—ख, ग. a. This line is omitted in ग. 5. [illegible]—ग. b. This line is omitted in Ms. ग. 6. [illegible]—क; तदपि उपक्रमपरम्—ख.

इति[1] वायवीयवचनात् । यद्वा यदा शुक्लपक्षगता युगादितिथिः पूर्वदिने कुतपोत्तरार्धमेवारभ्य प्रवृत्ता उत्तरदिने वृद्ध्यापराह्णेऽपि किञ्चिद्वर्तते तदा संपूर्णापराह्णव्यापित्वेन पूर्वदिनगतायाः[2] एव ग्राह्यत्वे प्राप्ते तदबाधत्वेन कुतपपूर्वार्धरूपपूर्वाह्णव्यापिनी अल्पापराह्णस्पर्शिन्यप्युत्तरा ग्राह्येति विधीयते । न च तदापराह्णशास्त्रस्या[3]प्यत्यन्तबाधः । अपराह्णेऽपि किञ्चित्तस्या विद्यमानत्वात् । हेमाद्रेस्तु मन्वादिष्वप्ययं[4] निर्णयः सम्मतः,

> या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः ।
> स्नात्वा हुत्वा च जप्त्वा च दत्त्वानन्तफलं लभेत् ॥

इति । भारतोक्तस्नानादौ तूत्तरा[5] । केचित्तु,

> वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै ।
> हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथा ॥ इति गोभिलवचनात्,
>
> पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयः । इति नारदवचनाच्च

श्राद्धेऽपि पूर्वाह्णव्यापिन्युत्तरा कार्येति वदन्ति, तत्कालादर्शादिविरुद्धमयुक्तं च "अपराह्णः पितृणाम्, अपराह्णे तु पैतृकम्, अपराह्णे पितृक्रिया" इति[6] वचनैः अपराह्ण[7]कालत्वाभिधानात् ।

> कर्मणो यस्य यः कालः[8] तत्काल[a]व्यापिनी तिथिः ।
> तया कर्माणि कुर्वन्ति ह्रासवृद्धी न कारणम् ॥

---

1. इति वचनात्–ख. 2. पूर्वस्या एव प्राप्तौ अल्पापराह्णव्यापिन्युत्तरा ग्राह्येति विधत्ताम्–ग. 3. स्यात्य–ग. 4. व्ययं–क. 5. इति वदन्ति केचि–ग. 6. स्यादिव–घ. 7. स्योक्तेः–ग. 8. सः इति वाक्यात्–घ; सः तत्कालव्यापिनी तिथिरिति वाक्यात्–ग. a. The portion from "तत्कालव्यापिनी" to "यमः" (Page 26) is omitted in Ms. ख.

इति वाक्यात् प्राप्तस्यापराह्णकालस्याबाधेनोपपत्तौ बाधायोगात् आद्यवचनं त्वनाकरं पित्र्यतर्पणादिविषयं वा । साकरत्वेऽपि पितृद्देशेन क्रियमाण-तर्पणादिविषयं[1] व्याख्येयम् । नारदवचनं तु "द्वे शुक्ले" इति वचनवदेव व्याख्येयम् । इदं च युगादिश्राद्धकृत्यं युगादितिथिमध्ये एव कर्त्तव्यम् ।

मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया ॥

इति स्कन्दपुराणात्[2] । भविष्ये—

वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च ।
गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥

तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् ।
यवान् दद्याद् द्विजातिभ्यः प्रयतः प्राशयेद् यवान् ॥

इति । अत्र दानविशेषो भविष्ये इमां प्रक्रम्य—

उदकुम्भान् सकनकान् सान्नान् सर्वरसैः सह ।
यवगोधूमचणकान् सक्तून् दध्योदनं तथा ॥

ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते ।

इति । देवीपुराणे—

तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रपूज्य च ।
उदकुम्भप्रदानेन शिवलोके महीयते ॥ इति ।

मन्त्रस्तु, "एष धर्मघटो दत्तः" इति पूर्वमुक्तः । पितृद्देशेनोदकुंभदाने[3] तु,

---

1. यमित्यन्यत्र विस्तरः । भविष्ये—घ. 2. स्कान्दात्-ग. 3. पित्र्ये तु—ग.

एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात् तृप्यन्तु पितरोऽपि पितामहाः ।

गन्धोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितम् ।
पितृभ्यः संप्रदास्यामि ह्यक्षय्य उपतिष्ठतु ॥

इति । युगादिषु रात्रिभोजने प्रायश्चित्तमुक्तं[1] ऋग्विधाने—

रात्रौ भुङ्क्ते [2]वत्सरे तु मन्वादिषु युगादिषु ।
अभिस्ववृष्टिमन्त्रं च जपेद्दश न पातकम् ॥

[3]दशवारमिति शेषः । यमः—

कृतोपवासाः सलिलं ये युगादिदिनेषु तु ।
दास्यन्त्यन्नादिसहितं तेषां लोका महोदयाः ॥

इति । उपवासे पूर्वा,

सवैधृतिव्यतीपातो युगमन्वादयस्तथा ।
सम्मुखा उपवासे स्युर्दानादावन्तिमाः स्मृताः ॥

इत्यनन्तभट्टोदाहृतवचनात् । मलमास[4]पाते[5] तु तत्रापि युगादिनिमित्तं श्राद्धं [6]कार्यम्, 'मन्वादौ च युगादौ च तन्मासोरुभयोरपि'—इति मरीचिवचनात् । [a]अत्र समुद्रस्नानं महाफलमुक्तं सौरपुराणे—

युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ ।
गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं च यत् ॥
तत् फलं लभते मर्त्यो भूमिदानस्य च ध्रुवम् ।

---

1. त्तमृग्वि–ग. 2. नरो यस्तु-घ. 3. नित्यर्थः 4. मलेऽपि–ग. 5. ते त–क, ख. 6. कर्त्तव्यम्–घ. a. अत्र ..... मुक्तं–Omitted in Ms. ग.

इति। इयमेव[1] तृतीया परशुरामजयन्ती[2]। सा च प्रदोषव्यापिनी ग्राह्या। तथा च भार्गवार्चनचन्द्रिकायां स्कान्दे—

वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ।
निशायाः[3] प्रथमे यामे रामाख्यः समये हरिः॥
रेणुकायास्तु यो गर्भादवतीर्णो भुवि स्वयम्।

इति।

दिनद्वये तदव्याप्तौ अंशतः समव्याप्तौ च परा। अन्यथा पूर्वैव। तदुक्तं तत्रैव भविष्ये—

शुक्ला तृतीया वैशाखे शुद्धोपोष्या दिनद्वये।
निशायां पूर्वभागे चेत्[4] सा परान्यत्र पूर्विका॥

वैशाखशुक्लसप्तम्यां गंगोत्पत्तिः। तदुक्तं पृथ्वीचन्द्रोदये ब्राह्मे—

वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा।
क्रोधात् पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात्॥
तां तत्र पूजयेद्देवीं गंगां गगनमेखलाम्।

इति। इयं च शिष्टाचारान्मध्याह्नव्यापिनी ग्राह्येति[5] वदन्ति। दिनद्वये तद्व्याप्तौ[6] तदव्याप्तावंशतः समव्याप्तौ च परा, "षण्मुन्यो"रिति युग्मवाक्यात्। वैशाखशुक्लद्वादश्यां योगविशेषो हेमाद्रौ—

पञ्चाननस्थौ गुरुभूमिपुत्रौ
मेषे रविः स्याद्यदि शुक्लपक्षे।
मासाभिधाना करभेण युक्ता
तिथिर्व्यतीपात इतीह योगः॥

---

1. व पर—ग. 2. न्ती प्रदो—ग. 3. यां—ग. 4. उत्तरान्य ख, ग.
5. ग्राह्या दिन -क, घ. 6. प्तावव्याप्तौ वा पूर्वा च—ग, घ; प्तौ वा पूर्वा च—ख.

अस्मिंस्तु गोभूमिहिरण्यवस्त्र-
दानेन सर्वं परिहाय पापम् ।
सुरत्वमिन्द्रत्वमनामयत्वं
मर्त्याधिपत्यं लभते मनुष्यः ॥

पञ्चाननः— सिंहः । मासाभिधाना[1] तिथिर्द्वादशी[2] । करभः—हस्तः ।
वैशाखशुक्लचतुर्दशी नृसिंहजयन्ती[3] । सा च प्रदोषव्यापिनी ग्राह्या,

[a] वैशाखशुक्लपक्षस्य चतुर्दश्यां विवस्वति ।
अस्तंगामिनि सर्वेषां पुरतस्तम्भमध्यतः ॥

प्रबभूव महाविष्णुर्नरसिंहाकृतिर्नृप ! ।
तस्यां व्रतं नरैः कार्यं महाविष्णोरतिप्रियम् ॥

इति नृसिंहप्रसादोदाहृतनृसिंहपुराणेऽस्तमयस्य जन्मकालत्वोक्तेः । जयन्तीषु च जन्मकालस्यैव पूजारूपकर्मकालत्वात् । दिनद्वये तद्व्याप्तावव्याप्तौ वा परा संकल्परूपव्रतोपक्रमकालत्वात् । "चतुर्दश्यां च पूर्णिमे"ति युग्मवाक्याच्च । अस्यां प्रातःकृत्यं विधाय सूर्यादिदेवताभ्यो व्रतं निवेद्याचम्य प्राणानायम्य उदङ्मुखो वारिपूर्णताम्रपात्रं गृहीत्वा संकल्पं कुर्यात् । [b] तदुक्तं हेमाद्र्युदाहृते नृसिंहपुराणे—"नियमं च प्रकुर्वीत दन्तधावनपूर्वकम्" ॥ नियमः—संकल्पः । दन्तधावनग्रहणं प्रातःकृत्योपलक्षणार्थम्[4] । दन्तधावनं च तृणपर्णादिना द्वादशगण्डूषैर्वा कार्यम् । उपवासदिने काष्ठस्य निषेधात् । संकल्पमन्त्रस्तत्रैव[5]—

श्रीनृसिंह ! महोग्रस्त्वं दयां कृत्वा ममोपरि ।
अद्याहं च विधास्यामि व्रतं निर्विघ्नतां नय ॥

1. पाशाभि—घ. 2. द्वादशीतिथिः—ख. 3. नरसिंह—घ. a. From "वैशाखशुक्ल" to "प्रतिमां संस्थाप्य" (Page 29) many lines are dropped in घ. b. "तदुक्तं ......काष्ठस्य निषेधात्" omitted in Ms. ख. 4. र्थम्—क. 5. मन्त्रस्तु—ग.

इति । ततः[a] "व्रतस्थेन न कर्त्तव्या संगतिः पापिभिः सह" इत्यादिवचनात् मिथ्यालापपाषण्डादिसंभाषणवर्जनं कुर्यात् । ततो मध्याह्नवेलायां नद्यादौ मृद्गोमयतिलामलकैः स्नात्वा[1] मध्याह्नसाध्यादिनित्यकर्म कृत्वा[2] गृहं गच्छेत् । अस्य[3] व्रतस्य संकल्पो मध्याह्ने एव कर्त्तव्य इत्युक्त्वा[4] तत्र प्रमाणत्वेन "ततो मध्याह्नवेलायां नद्यादौ विमले जले" इत्युपक्रम्य "परिधाय शुचिर्वासो व्रतकर्म समारभेत्" इति नृहिपुराणे[5] लिखितं तदयुक्तम्, तत्र "नियमं च प्रकुर्वीत[6]" इत्यादिना संकल्पमभिधाय व्रतस्थेनेत्यादिना मिथ्यालापादिवर्जनप्रदर्शनपूर्वकं "ततो मध्याह्न" इत्यादिना स्नानमभिधाय "परिधाय शुचिर्वासो नित्यकर्म समारभे[7]"दित्यभिधानात् । नित्यं मध्याह्नसान्ध्यादि । ततो गोमयोपलिप्तेऽष्टदलं कृत्वा तत्र कलशं संस्थाप्य हैमीं पलतदर्धार्धमितां प्रतिमां संस्थाप्य[8] प्राणप्रतिष्ठां कृत्वा मूलमन्त्रेण वैदिकेन नाम्ना[9] आवहनादि कृत्वा स्नानसमये पञ्चामृतैः स्नापयित्वा यज्ञोपवीतवस्त्रे[b] दत्वा गन्धादिभिः पूजयेत्[10] । तत्र मन्त्राः—

> चन्दनं[11] शीतलं दिव्यं चन्द्रकुंकुममिश्रितम् ।
> ददामि तव तुष्टयर्थं नृसिंह परमेश्वर ! ॥

इति चन्दनमन्त्रः ।

> कालोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो ! ।
> पूजयामि नृसिंह ! त्वां लक्ष्म्या सह नमोऽस्तु ते ॥

---

a. This sentence is omitted in Ms ग. 1. त्वा नित्य—क, ख. 2. कुर्यात्-ग. 3. स्य सं—ख. 4. क्तम्-ख. 5. णादित्युक्तं त—ग. 6. प्रकुर्वन्ति दन्तधावनपूर्वक' मिति प्रातः कल्पानन्तरमेव नियमाख्यसंकल्पोक्तेः, परिधाय-ग. 7. दित्येव पाठात् ग. 8. प्राणप्रतिष्ठापूर्वकं मूल—ग; संस्थाप्य प्राणप्रतिष्ठां कृत्वा ना—ख. 9. नाम्ना वा पूजयेत्—ग. b. यज्ञो दत्वा—omitted in Ms. घ. 10. गन्धाद्यो तु मन्त्राः-ग. 11. कुंकुमं मि-ग.

इति पुष्पमन्त्रः[1] ।

कालागरुमयं धूपं सर्वदेवसुवल्लभम् ।
करोमि ते[2] महाविष्णो ! सर्वकामसमृद्धये ।।

इति धूपमन्त्रः[3] ।

दीपः पापहरः प्रोक्तः तमोराशिविनाशनः ।
दीपेन लभ्यते तेजः तस्माद्दीपं ददामि ते ।।

इति दीपमन्त्रः[4] ।

नैवेद्यं सुखदं चारु भक्ष्यभोज्यसमन्वितम् ।
ददामि ते रमाकान्त ! सर्वपापक्षयं कुरु ।।

इति नैवेद्यमन्त्रः[5] । [a] ततः[6] फलताम्बूलदक्षिणाः दत्त्वा अर्घ्यं दद्यात् । तत्र मन्त्रः–

नृसिंहाच्युत ! देवेश ! लक्ष्मीकान्त ! जगत्पते ! ।
अनेनार्घ्यप्रदानेन सफला स्युर्मनोरथाः[7] ।।

इति । ततो नीराज्य पुष्पाञ्जलिं दत्त्वा[8] स्तोत्रादिना स्तुत्वा प्रार्थयेत् । तत्र मन्त्रः–

पीताम्बर! महाबाहो! प्रह्लादभयनाशकृत्[9] ।
[10] यथा भूतेनार्चनेन यथोक्तफलदो भव ।।

---

1. ष्पम्–क, ख. 2. ष–घ. 3. पम्–क, ख. 4. पम्–ख.
5 द्यम्–क, ख. a. This sentence is omitted in Ms. घ. 6. ततो दक्षिणान्तेऽर्घ्यं दद्यान्मन्त्रेण नृ–ग. 7. थाः । ततो–क, ख; था इत्यर्घ्यमन्त्रः ततो–घ.
8 त्वा स्तु–ग. 9. शन !–ख. 10. त–घ.

इति । ततो[a] रात्रौ[1] गीतवाद्यपुराणश्रवणादिभिर्जागरणं कृत्वा प्रभाते पुनः पूजयित्वा[2] विष्णूद्देशेन ब्राह्मणान् भोजयित्वा स्वर्णमयं सिंहं गोभू[3] हिरण्यतिलशय्यादि दत्त्वा प्रार्थयेत्—

मद्वंशे ये नरा जाताः ये जनिष्यन्ति त्वत्पराः ।
तान् समुद्धर देवेश! दुस्तराद्भवसागरात् ॥

पातकार्णवमग्नस्य व्याधिदुःखाम्बुचारिभिः ।
जीवैस्तु परिभूतस्य महादुःखगतस्य मे ॥

करावलम्बनं देहि शेषशायिन्! जगत्पते! ।
श्रीनृसिंह! रमाकान्त! भक्तानां भवनाशन! ॥

क्षीराम्बुधिनिवासस्तु चक्रपाणिर्जनार्दनः ।
व्रतेनानेन देवेश! भुक्तिमुक्तिप्रदो भव ॥

इति । एवं प्रार्थ्य ततो देवं विसृज्य च यथाविधि उपहारादिकं सर्वमाचार्याय निवेदयेत् ।

[b]दक्षिणाभिः सुसन्तोष्य ब्राह्मणांस्तु[4] विसर्जयेत् ।
मध्याह्ने तु समायुक्तो भुञ्जीत बन्धुभिर्नरः ॥

इति । [c]अस्या एव योगविशेषप्राशस्त्यं तत्रैवोक्तम्—

स्वातीनक्षत्रयोगे[5] च शनिवारे महद्व्रतम् ।
सिद्धियोगस्य संयोगे वणिजे करणे तथा ॥

---

a. Portion from "ततो रात्रौ" to "पापनाशनम्" (Page 32) is omitted in Ms. ख. 1. रात्रौ जाग–ग. 2. त्वा ब्राह्म–ग. 3. भूतिलहिरण्य–ङ.
b. This line is omitted in Ms. ग. 4. श्च–ख. c. अस्या......वोक्तम्– omitted in Ms. घ. 5. गेन–ख.

पुंसां सौभाग्ययोगेन लभ्यते दैवयोमतः ।
[a]सर्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनम् ।।
[1]एतदन्यतरे योगे मद्दिनं पापानाशनम् ।

इति । तथा,

सर्वेषामपि वर्णानामधिकारोऽस्ति मद्व्रते ।। इति[2] । इदं[3] च नित्यम् ।
[b]वैशाखशुक्लपक्षे च चतुर्दश्यां समाचरेत् ।
मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनम् ।।
वर्षे वर्षे च कर्त्तव्यं मम संतुष्टिकारकम् ।

इति वीप्साश्रवणात्, "अन्यथा नरकं याति यावच्चन्द्रदिवाकरा" विति अकरणे दोषश्रवणाच्च[4] । काम्यं च, "अपुत्रो लभते पुत्रान्" इत्यादि फलश्रवणात्[5] । इयमेव गारुडकल्पादिः ।

[6]वैशाखशुक्लपौर्णमास्यां विशेषो भविष्ये—

वैशाखी कार्त्तिकी माघी तिथयोऽतीव पूजिताः ।
स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन ! ।।

[c]इति । पाद्मे—

वैशाख्यां विधिवत् स्नात्वा भोजयेद् ब्राह्मणान् दश ।
कृशरं सर्वपापेभ्यो मुच्यते नात्र संशयः ।।

---

a. This line is omitted in Ms घ, 1. एतैर्योगैर्विनापि स्यात् म-घ, 2. ते ।। इदं—ग. 3. इति । नित्यं चेदम्—ग. b. This and the line following it are omitted in Ms. ग. 4. च्च । अपुत्री-ग. 5. [illegible] । काम्यमपि । इय-ग. c. From "इति" to "मुच्यते, इति" (Page 33)—omitted in Ms. घ.

इति । विष्णुधर्मोत्तरे—

वैशाख्यां पूर्णमास्यां तु ब्राह्मणान् सप्त पञ्च वा ।
क्षौद्रमुक्तैस्तिलैः कृष्णैर्वाचयेद्यदि चेन्नरः ॥
प्रीयतां धर्मराजेति यद्वा मनसि वर्त्तते ।
यावज्जीवकृतात् पापात् तत्क्षणादेव मुच्यते ॥ इति ।

तिलैर्दत्तैरिति शेषः । वाचयेत्—स्वस्ति वाचयेदित्यर्थः । यद्वा मनसि वर्त्तते यत्फलकामः स्यादित्यर्थः ।

इति वैशाखकृत्यानि ॥

अथ ज्येष्ठकृत्यानि ।

ज्येष्ठकृष्णद्वितीया समानकल्पादिः । ज्येष्ठकृष्णचतुर्दशी माहेश्वर-कल्पादिः । ज्येष्ठशुक्लतृतीयायां रंभाव्रतम् । तथा च भविष्ये[1]—

भद्रे ! कुरुष्व यत्नेन रम्भाख्यं व्रतमुत्तमम् ।
ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परा ॥

इति । इयं पूर्वविद्धा ग्राह्या ।

बृहत्तपा तथा रम्भा सावित्री वटपैतृकी ।
कृष्णाष्टमी च भूता च कर्त्तव्या संमुखी तिथिः ॥

इति स्कान्दोक्तेः[a] । इयमेव वामनदेव[2]कल्पादिः[3] ।

ज्येष्ठशुक्लचतुर्थ्यां गौरीव्रतं ब्रह्मपुराणे[4]—

ज्येष्ठशुक्लचतुर्थ्यां तु जाता पूर्वमुमा सती ।
तस्मात् सा तत्र संपूज्या स्त्रीभिः सौभाग्यवृद्धये ॥
उपहारैश्च विविधैर्गीतनृत्योत्सवादिभिः ।
होमैः पत्रैर्निर्वस्त्रैश्च फलपुष्पैः सुगन्धिभिः ॥

1. भ, भविष्ये—ग. a. This line is omitted in Ms. ग. 2. नकल्पा—ग.
3. दिः । चतु—ग, घ. 4. ब्राह्मे-क, ग.

इति । ज्येष्ठशुक्लदशमी दशहरा । तदुक्तं[1] हेमाद्रौ भविष्ये—

ज्येष्ठे[2] मासि सिते पक्षे दशमी हस्तसंयुता ।
हरते दश पापानि तस्माद्दशहरा स्मृता ॥

इति । वाराहे तु गंगायां दशहरात्वमुक्तम्—

दशम्यां शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि ।
अवतीर्णा[3] ह्यधः स्वर्गाद्धस्तर्क्षे च सरिद्वरा ॥
हरते दश पापानि तस्माद्दशहरा स्मृता ।
[a] तस्मात् स्नानं प्रकुर्वीत दानं चैव विशेषतः ॥

स्कान्दे[4] तु दश योगा उक्ताः—

ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
गरानन्दे व्यतीपाते कन्या चन्द्रे वृषे रवौ ॥
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते ।

इति । इह बुधसोमयोः[5] कल्पभेदेन व्यवस्था । इयं[6] च खण्डत्वे यत्र बाहुल्यं सा ग्राह्या, योगाधिक्ये[b] फलाधिक्यात्[c] । अस्यां "ॐ नमः शिवायै नारायण्यै दशपापहरायै गंगायै नमो नमः" इति मन्त्रेण गंगां पूजयित्वा[7] "नारायणं महेशं च ब्रह्माणं[8] भास्करं तथा । भगीरथं हिमवन्तं" गन्धपुष्पादिभिः पूजयित्वा दश फलानि दश दीपान् दशप्रसृतितिलान् "गायत्र्यै[9] नमः" इति मन्त्रेण[10] दत्वा

---

1. क्तं श्र–ग. 2. ष्ठमासे–क, ख; ष्ठे मासे–घ. 3. तः–क, ग.
a. This line is omitted in Ms. क. 4. न्दे दश–क, ग. 5. मौ–ग.
6. इयं च योगबाहुल्यवती ग्राह्या–ग. b. योग ... ... फलाधिक्यात् omitted in क and ग. c. Portion from "फलाधिक्यात्" to "संशयः, इति" (Page 35) is omitted in Ms. घ. 7. संपूज्य–ग. 8. भागीरथी–ख. 9. गंगायै–ग.
10. न दश–क, ग.

दश सक्तुपिण्डान् गुडपिण्डान् जले क्षिप्त्वा[1] मत्स्यकच्छपमण्डूकादीन् स्वर्ण[2]
रजतमयान् पिष्टमयान् वा [illegible] जले क्षिपेत् । ततो दश[illegible]तिलान्
यवान् दश गाश्च दशसंख्येभ्यो[3] ब्राह्मणेभ्यो दद्यात् इति ।

एवं कृत्वा विधानेन वित्तशाठ्यविवर्जितः ।
दशजन्मार्जितैः पापैर्मुच्यते नात्र संशयः ॥

इति । गंगाया अभावे अन्यस्यां सरिति कार्यम् । तथा च स्कान्दे—

यां काञ्चित्सरितं प्राप्य दद्यादर्घ्यं तिलोदकम् ।
मुच्यते दशभिः पापैः स महापातकैरपि ॥

दशपापान्युक्तानि[4] स्कान्दे—

अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥

पारुष्यमनृतं चैव पैशून्यं वापि[5] सर्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥

परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम् ॥

इति[6] । अत्र विशेषः काशीखण्डे—

ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् ।
दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः ॥

एवं [illegible] [illegible] क्रमस्नायी नरोत्तमः ।
[illegible] प्रति[illegible]

---

1. [illegible]—[illegible]. 2. [illegible]विम—[illegible]. 3. [illegible]—[illegible]. 4. [illegible] स्का—ग.
5. वापि—[illegible]. 6. इति । काशी—[illegible].

इति । तथा,

लिंगं[1] दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ ।
दशजन्मार्जितैः[2] पापैस्त्यज्यते नात्र संशयः ॥

इति । मलमासपाते[3] तु तत्रापि दशहराकृत्यं कर्त्तव्यम् । पुनः शुद्धे तु[4] भवत्येवेत्यन्यत्र विस्तरः– अन्यत्र मत्कृतौ द्रष्टव्यम् ।

ज्येष्ठशुक्लैकादश्यां निर्जलैकादशीव्रतम् । मदनरत्ने स्कान्दे–

ज्येष्ठे मासि नृपश्रेष्ठ ! या शुक्लैकादशी शुभा ।
निर्जलं समुपोष्यात्र जलकुंभान् सशर्करान् ॥

प्रदाय विप्रमुख्येभ्यः तापत्रयविवर्जितः ।
विष्णुलोकमवाप्येह मोदते विष्णुसन्निधौ ॥

इति । ज्येष्ठपौर्णमास्यां[a][5] वटसावित्रीव्रतं स्कन्दपुराणे–

ज्येष्ठमासे[6] तु संप्राप्ते पौर्णमास्यां पतिव्रता ।
स्नात्वा चैव शुचिर्भूत्वा वटं सिच्य बहूदकैः ॥

सूत्रेण वेष्टयेद् भक्त्या गन्धपुष्पाक्षतैः शुभैः ।
नमो वैवस्वतायेति भ्रमयन्ती प्रदक्षिणम् ॥

---

1. घाल्यं–ग. 2. [illegible]–घ, 3. मासे तु–[illegible]; [illegible] दश–ग.
4. शुद्धेपीत्यन्यत्र ग; शुद्धे तु भवत्येवेत्[illegible]–घ. a. The portion from "ज्येष्ठपौर्णमास्यां (Page 36) to "विस्तरभयान्न लिखितम्" (Page 37) in घ is as follows:- "ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखम्" इत्युपक्रम्य "व्रतं त्रिरात्रमुद्दिश्य [illegible] [illegible] [illegible]" इत्युक्त्[illegible] उपसंहृतम्–"ज्येष्ठे मासि सिते पक्षे पूर्णिमायां [illegible] [illegible] पुरा [illegible] [illegible] [illegible]।" इति ।
5. ज्येष्ठपूर्णमास्यां–[illegible]; ज्यैष्ठशुक्लपौर्णमास्यां सावित्रीव्रतं स्कन्द[illegible]योः–घ; ज्येष्ठायां–ग. 6. ज्येष्ठे मासि–[illegible].

रात्रौ कुर्वीत भक्तं च अब्दमेकं समाहिता ।
तथैव वटवृक्षं च पक्षे[1] पक्षे च पूजयेत् ॥
संप्राप्ते तु पुनर्ज्येष्ठे लघुभुग् द्वादशीं नयेत् ।
दन्तानां धावनं कृत्वा नियमं कारयेत्ततः ॥

[2] नियममन्त्रः—

त्रिरात्रं लंघयित्वा च चतुर्थे[3] दिवसे ह्यहम् ।
चन्द्रायार्घ्यं प्रदत्त्वा च पूजयित्वा च तां सतीम् ॥
मिष्टान्नानि यथा शक्त्या भोजयित्वा द्विजोत्तमान् ।
भोक्ष्येऽहं च जगद्धात्रि ! निर्विघ्नं कुरु मे शुभे ! ॥ इति ।

ततो वंशमये पात्रे वालुकाप्रस्थं गृहीत्वा सप्तधान्यमृतं च वंशपात्रं च वस्त्रद्वयोपरि स्थापयित्वा[4] हैमीं ब्रह्मणा सह सावित्रीप्रतिमां च[5] तत्र पूजयित्वा न्यग्रोधतले विनतयमुपवासिनी[6] तिष्ठेत् । पौर्णमास्यां मृत्सर्षपैः स्नात्वा सत्यवन्तं सावित्रीं[7] स्वर्णमयीं रौप्यपर्यङ्कमारोप्य रथोपरि[8] निवेशयेत् ।
[a] ततो गोमयकृतमण्डले[9] पञ्चामृतेन सर्वाः स्नापयित्वा गन्धादिभिः पूजयेत् ।

ॐकारपूर्विके देवि! वीणापुस्तकधारिणि! ।
वेदमातर्नमस्तुभ्यमवैधव्यं प्रयच्छ मे ॥

1. प्रपू–ग. 2. तत्र म–ख. 3. तु–ख. 4. संस्थाप्य–ख. 5. तु–ख
6. मुपोषिता – ग. 7. स्त्रीं रौप्य–ख. 8 रथे स्थापयेत्–ग.
a. The following lines only are found in the portion from "ततो" to "निर्वापयेत् सुखिन्ये (Page 38)" in the Mss क and ख – 'ततो वर्तुलमण्डले पंचामृतेन सर्वाः स्नापयित्वा गन्धादिभिः पूजयेत् । अंगपूजादिकमुद्यापनञ्च व्रतकाण्डे द्रष्टव्यम् । [illegible] लिखितम् । दाक्षिणात्यास्त्रिरात्रमेव कुर्वन्ति । [illegible] । उक्तं चरित्रं । [illegible] निर्वापयेत् सुखिन्ये"
9. वर्तुलम–क, ख.

इति । अर्घ्यं चैवानेनैव मन्त्रेण दत्वा सुवासिनीभिः पूजयेत् । रात्रौ जागरणं कुर्यात् । ततश्चतुर्थेऽहनि वटसमीपे गृहे वा गत्वाऽग्नौ घृतेन पायसेन च व्याहृतिभिस्तिलव्रीहियवैश्च होमं कारयित्वा मिथुनानि चतुर्विंशतिः षोडशद्वादशाष्टौ वा वस्त्रादिभिः पूजयेत् । अशक्त्या वाचार्यमेव सपत्नीकं संपूज्य शक्तौ सोपस्कारां शय्यां दद्याद्यथाशक्ति गोदक्षिणामेव वा । ततः प्रतिमां दत्त्वा नक्तं भुञ्जीतेत्युद्यापनसंक्षेपः । मन्त्रपूजादिविस्तरस्तु व्रतकाण्डे द्रष्टव्यः । अयं दाक्षिणात्यपरिगृहीतः पक्षः । पक्षान्तरं निर्णयामृते भविष्ये—

अमायां च तथा ज्येष्ठे वटमूले महासती ।
त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत् ॥

अशक्तौ तु त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रिया ।
अयाचितं चतुर्दश्याममायां समुपोषणम् ॥

[a]अयं पक्षः पाश्चात्यादिपरिगृहीतः । [b]हेमाद्रिभिस्तु भाद्रपदपूर्णिमायामित्युक्तम् । अत्र पूर्णिमामावास्ये पूर्वविद्धे ग्राह्ये ।

[c]बृहत्तपा तथा रम्भा सावित्री वटपैतृकी ।
कृष्णाष्टमी च भूता च कर्तव्या संमुखी तिथिः ॥

इति स्कान्दात् ।

भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा ।
वर्जयित्वा सुरश्रेष्ठ ! सावित्रीव्रतमुत्तमम् ॥

इति ब्रह्मवैवर्त्ताच्च । अत्र [1]पौर्णमास्यमावास्यनुरोधेन यथा त्रिरात्रसंपत्तिर्भवति

---

a. This and the line following it are omitted in क and ख. b. This line is omitted in Ms. ग. c. This stanza is omitted in Ms. घ.

1. पूर्णिमामा–ख; पूर्णिमानुरोधेनैव–ग.

तथा त्रयोदश्यादि ग्राह्यम्, तस्याः प्राधान्यात् । एवमन्यस्यामपि ।[a] अस्यामेव पौर्णमास्यां[1] विशेषश्च आदित्यपुराणे—

ज्येष्ठे मासि तिलान् दद्यात् पूर्णिमायां विशेषतः ।
अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः ॥

इति । विष्णुधर्मोत्तरे[b]—

सोपवासस्तथा ज्येष्ठे पूर्णे[2] तु शशलक्षणे ।
उपानहौ तथा छत्रं दत्त्वात्यन्तं सुखी भवेत् ॥

तत्र[3] क्रमेण मन्त्रौ—

उपानहौ प्रदास्यामि कंटकादिनिवारणे[4] ।
सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छ मे ॥

छत्रदाने[5] मन्त्रः—

इहामुत्रातपत्राणं कुरु मे केशव ! प्रभो ! ।
छत्रं त्वत्प्रीतये दत्तं ब्राह्मणाय मया[6] सह ॥

मया—लक्ष्म्या । विष्णुस्मृतौ—

ज्येष्ठी ज्येष्ठायुता[7] चेत्स्यात्तस्यां छत्रोपानत्प्रदानेन नरो नरोऽधिपत्य-माप्नोति[8] इति । इयं[9] रौच्यमन्वादिः, कौर्मकल्पादिश्च[10] । तथा वामनपुराणे—

---

a. This sentence is omitted in Ms. क, ख and ग. 1. पूर्णमास्यां—ख; [illegible] b. [illegible] "[illegible]" to "[illegible] लक्ष्म्या" Omitted in Ms. ख. 2. [illegible] 3. [illegible]—क, ख. 4. [illegible]—क; [illegible]—ख. 5. [illegible] Omitted in Ms. ग. 6. [illegible]—क. 7. तु [illegible]—क, ग. 8. प्रा—क. 9. यं म—ख. 10. श्च । [illegible]

उदकुंभाम्बुदानं च तालवृन्दं सचन्दनम् ।
त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि तु ॥ इति ।

इति ज्येष्ठकृत्यानि ॥

अथ आषाढकृत्यानि ।

[a]आषाढकृष्णतृतीया आग्नेयकल्पादिः । आषाढामा चैत्रकल्पादिः । [1]आषाढशुक्लद्वितीयाकृत्यं तिथितत्त्वे स्कान्दे—

आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥
यात्रोत्सवं प्रवर्त्याथ प्रीणयेत्तु बहून् द्विजान् ।
ऋक्षाभावे तिथौ कार्या सदा सा प्रीतये मम ॥

इति । मां—जगन्नाथम् ।

आषाढशुक्लचतुर्थी राथन्तरकल्पादिः । आषाढस्य शुक्लदशमी [2]पौर्णमासी च मन्वादिः । [b]निर्णयस्तु पूर्वमुक्तः । आषाढभाद्रकार्तिकशुक्लद्वादशीषु अनुराधाश्रवणरेवतीयुक्तासु पारणं न [3]कार्यमित्युक्तं भविष्ये—

आभाकासितपक्षेषु मैत्रश्रवणरेवती ।
संगमे नैव भोक्तव्यं द्वादशद्वादशीं हरेत् ॥

a. Portion from "आषाढ" to "राथन्तरकल्पादिः" is omitted in Ms. घ.
1. तिथितत्त्वे अथा......इत्यं स्कान्दे—क, ख. 2. पू—ख. b. This sentence is omitted in Ms. घ. 3. [illegible]—घ; [illegible] ।
[illegible]

इति । अत्र विशेषो विष्णुधर्मे[1]—

मैत्राद्यपादे स्वपितीह विष्णुः

श्रुतेश्च मध्ये परिवर्त्तमेति[2] ।

पौष्णान्त्यपादे प्रतिबोधमेति

सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम् ।

इति । [a]इदं तु वचनद्वयं महानिबन्धेष्वदृष्टत्वादनाकरमपि लोके बहुलप्रसिद्धे-लिखितम् ।

आषाढशुक्लैकादश्यां तद्द्वादश्यां वा विष्णुशयनोत्सवः कर्तव्यः ।

[3]तदुक्तं ब्राह्मे—

एकादश्यां तु शुक्लायामाषाढे भगवान् हरिः ।

भुजङ्गशयने शेते क्षीरार्णवजले सदा ॥ इति ।

भविष्ये—

द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवाः । इति ।

[b]वाराहे—

द्वादश्यां सन्धिसमये नक्षत्राणामसंभवे ।

आभाकासितपक्षेषु शयनावर्त्तनादिकम् ॥

इति । [c]तत्र विशेषः—

निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् । इति । एताश्च द्वादश्यो रात्रिसन्ध्यादिनेष्वनुराधाश्रवणरेवतीनामादिमध्यान्तभागयुक्ताः[4] स्वापादिषु प्रशस्ताः । तथा च नारदीये—

1. मौत्तरे–ख. 2. संते च–ख. a. This sentence is omitted in Ms. ख. 3. त हो omitted in Ms. ग. b. This and the following stanza are found only in Ms. ख. c. From "तत्र विशेषः" to "रात्र्याविगतो माहुः"-omitted in Ms. ग. 4. क्ताः प्र–क, ख.

मैत्राद्यपादे स्वपितीह विष्णुः
श्रुतेश्च मध्ये परिवर्त्तमेति ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥

इति । रात्र्यादिषु नक्षत्रभागानामभावे द्वादशीनक्षत्रमात्रयोगेऽपि रात्र्यादिगतो ग्राह्यः । अत्र द्वादश्यामिति पारणाहर्विवक्षितम्, "पारणाहे पूर्वरात्रे घण्डादीन् वादयन्मुहुः" इति रामार्चनचन्द्रिकोक्तेः । [a] यदा तु द्वादशीषु नक्षत्राणि न सन्त्येव, किन्तु एकादशीषु त्रयोदशीषु वा तदा तत्रापि तत्तन्नक्षत्रभागे एव निशादिवेलानादरेण[1] प्रस्वापादि कार्यम् ।

अप्राप्ते द्वादशीमृक्षे उत्थानशयने हरेः ।
पादयोगेन कर्तव्ये नाहोरात्रं विचिन्तयेत् ॥

इति जीमूतवाहनोदाहृतवचनात् । क्वचित्तु आषाढकार्त्तिकपौर्णमास्योः स्वापप्रबोधावुक्तौ—"क्षीराब्धौ शेषपर्यङ्के आषाढ्यां संविशेद् हरिः, निद्रां त्यजति कार्तिक्याम्" इति । चातुर्मास्यव्रतारम्भोऽपि आषाढशुक्लैकादशी-द्वादशीपूर्णिमासु[2] कर्कसंक्रान्तिदिने[3] वा विकल्पेन कर्त्तव्यः ।

एकादशीं तु गृह्णीयात् संक्रान्तौ कर्कटस्य वा ।
आषाढ्यां वा नरो भक्त्या चातुर्मास्योदितं व्रतम् ॥

इति सनत्कुमारवचनात् । "आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि[4] वा ।" इति वराहपुराणाच्च[5] । [b] अत्रैव चातुर्मास्यारंभो भारते उक्तः—

---

a. Portion from "यदा तु" to "[illegible]"—omitted in Ms. घ.
1. च स्वा-ग. 2. पौर्णमासीषु—ग. 3. न्तौ वा—ग. 4. च—ग.
5. च्च । भारते—क. ग; च्च । महाभा—ख. b. This sentence is omitted in Ms. घ.

आषढे तु सिते पक्षे एकादश्यामुपोषितः ।
चातुर्मास्यव्रतं कुर्याद् यत्किञ्चित्प्रयतो नरः ॥

इति । अस्य नित्यत्वमत्रैवोक्तम्[1]–

वार्षिकान् चतुरो मासान् वाहयेत् केनचिन्नरः ।
व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोद्भवम् ॥
असंभवे तुलार्के तु कर्त्तव्यं तत् प्रयत्नतः ।

इति वृद्धगार्ग्यः[2] । अस्यारम्भः[a] शुक्रास्तादावपि कार्यः ।

न शैशवं न मौढ्यं च शुक्रगुर्वोर्न वा तिथेः ।
खण्डत्वं चिन्तयेदादौ चातुर्मास्यविधौ नरः ॥

इति वचनात्[3] । इदं द्वितीयाद्यारम्भविषयम्[4] । एवमाशौचादावपि द्वितीयाद्यारम्भो भवत्येव,

अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान् ।
व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैः ॥ इति स्कान्दोक्तेः[5] ।

"प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम्" । इति विष्णुवचनाच्च[6] । यत्तु,

असंक्रान्तं तथा मासं दैवपित्र्ये च कर्मणी ।
मलमासमशौचं[7] च वर्त्तयेन्मतिमान् नरः ॥

इति भविष्यपुराणवचनं तत्प्रथमारम्भविषयम् । व्रतग्रहणप्रकारस्तु हेमाद्रौ भविष्ये—

---

1. त्वं तत्रै—ख, ग. 2. इति [illegible] and [illegible] [illegible] [illegible] omitted in Ms [illegible]. 3. इति । इदं—क, ख, ग. 4. द्यार—घ. 5. [illegible] प्रो—क, ख, ग. 6. च्च । व्रतग्रहण—ख, ग. 7. सं तथाशौचं—घ.

एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः ।
आभाषेताग्रतो विष्णोः कृताञ्जलिपुटस्तथा ॥

[a] चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत! ॥

[b] इदं व्रतं मया देव! गृहीतं पुरतस्तव ।
निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव! ॥

गृहीतेऽस्मिन् व्रते देव! यद्यपूर्णे म्रिये ह्यहम् ।
तन्मे भवतु संपूर्णं त्वत्प्रसादात् सुरेश्वर! ॥

इति संकल्पमन्त्रः । अत्र इममिति स्थाने[1] करिष्यमाणव्रतस्य निर्देशः कार्यः[2] । चातुर्मास्यव्रतानि च तत्रैव—

[c] तैलस्य वर्जनाद्राजन्! सुन्दरांगः प्रजायते ।
कटुतैलपरित्यागाच्छत्रुनाशमवाप्नुयात् ॥

मधुस्वरो भवेद्राजन्! पुरुषो गुडवर्जनात् ।
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ॥

फलत्यागाच्च मतिमान् बहुपुत्रश्च जायते ।
ताम्बूलवर्जनाद्भोगी[3] रक्तकण्ठश्च जायते ॥

शाकपत्राशनत्यागी अपक्वादमलो भवेत् ।
पादाभ्यंगपरित्यागी[4] स्थिरोऽभ्यंगस्य वर्जनात् ॥

---

a. This Stanza is found only in ख. b. Portion from "इदं व्रतं" to "व्रतान्याह" (Page 46) is omitted in Ms ख. c. This Stanza is omitted in क 3. स्तु–ख. 4. गात्–ख, ग

दीप्तिमान् दीप्तकरणो यक्षो द्रव्यपतिर्भवेत् ।
दधिदुग्धतक्रनियमी गोभक्तो गोपतिर्भवेत् ॥

[a] इन्द्रातिथित्वमाप्नोति स्थालीपाकस्य वर्जनात् ।
[b] लभते सन्ततिं दीर्घां तैलपक्वविवर्जनात् ॥

भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत् ।
भूमौ भुङ्क्ते यस्तु नरः स पृथिव्याः पतिर्भवेत् ॥

सदा मुनिः सदा योगी मधुमांसस्य वर्जनात् ।
निर्व्याधिर्नीरुगोजस्वी सुरामद्यविवर्जनात् ॥

[c] एकान्तरोपवासेन ब्रह्मलोके महीयते ।
धारणाभिर्नरो नित्यं गंगास्नानफलं लभेत् ॥

धारणान्नखलोम्नां च गंगास्नानं दिने दिने ।
मौनव्रती भवेद्यस्तु तस्याज्ञास्खलिता भवेत् ॥

नमो नारायणायेति जपन् यज्ञफलं लभेत् ।
[1] पादाभिवन्दनाद्विष्णोर्लभेत् गोदानजं फलम् ॥

प्रदक्षिणशतं यस्तु करोति स्तुतिपाठकः ।
हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत् ॥

एकभक्ताशनान्नित्यमग्निहोत्रफलं लभेत् ।
उपोषणफलं भुङ्क्ते रंभापालाशपत्रकैः ॥

---

a. This and the following two lines are omitted in Ms. ग. b This line is omitted in Ms. ग. c. This stanza is omitted in Ms. क.
1. व-ग.

अन्येषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ।

अन्येषु – पत्रेषु ।

एवमादिव्रते पार्थ ! तुष्टिमायाति केशवः ।।

इति । अत्र एकभक्तव्रते विप्रमिथुनं पूजयित्वा धेनुदानमन्ते कार्यम् । सन्ध्यायां दीपदाने समाप्तौ सुवर्णदीपिकां सवस्त्रां[1] दद्यात् । पत्रभोजने कांस्यपात्रं गोयुतं[2] दद्यात् । यत्र नोक्तं तत्र धेनुं दद्यात्, "चातुर्मास्यव्रतं कृत्वा व्रतान्ते गोवृषप्रद" इति वचनात् । प्रदक्षिणं कृत्वा वस्त्रं दद्यात् । तत्रैव,

चतुरो वार्षिकान् मासान् नियमो येन यः कृतः ।
कथयित्वा द्विजेभ्यस्तं दद्याद्भक्त्या सदक्षिणम् ।।
दत्त्वा विसर्जयेद्विप्रांस्ततो भुञ्जीत वाग्यतः ।

इति । [a]श्रावणादिषु मासेषु प्रत्येकं व्रतान्याह भविष्ये—

श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि[3] कार्तिके द्विदलं त्यजेत् ।।

स्कान्दे—

चत्वार्येतानि नित्यानि चतुराश्रमवासिनाम् ।
प्रथमे मासि कर्त्तव्यं नित्यं शाकव्रतं नरैः ।।

द्वितीये मासि कर्त्तव्यं दधिव्रतमनुत्तमम् ।
पयोव्रतं तृतीये तु चतुर्थेऽपि निशामय ।।

द्विदलं बहुबीजं च वृंताकं चैव वर्जयेत् ।
नित्यान्येतानि विप्रेन्द्र![4] व्रतान्याहुर्मनीषिणः ।।

1. [illegible]युतां–ख. 2. [illegible]ती त–गं. a. This line is omitted in Ms. ख.
3. से–क, ग. 4. राजेन्द्र–ख.

तथा,

जम्बीरं राजमाषांश्च मूलकं रक्तमूलकम् ।
कूश्माण्डं चेक्षुदण्डं च चातुर्मास्ये त्यजेद् बुधः ॥

तथा,

विशेषाद्बदरीं धात्रीं कूश्माण्डं तिन्त्रिणीं त्यजेत् ।
जीर्णं धात्रीफलं ग्राह्यं कथञ्चित् कायशोधनम् ॥ इति ।

वार्षिकांश्चतुरो मासान् प्रसुप्ते वै जनार्दने ।
मञ्चखट्वादिशयनं वर्जयेद्भक्तिमान् नरः ॥

अनृतौ वर्जयेद्भार्यां मांसं मधुपरोदनम् ।
पटोलं मूलकं चैव वृंताकं च न भक्षयेत् ॥

इत्यादि[1] । शाकशब्दश्च दशसु रूढः,

मूलपत्रकरीराग्रफलकाण्डाधिरूढकाः ।
त्वक् पुष्पं कवचं चैव शाकं दशविधं स्मृतम् ॥

इत्युक्तेः । करीरं—वंशाग्रम् । अधिरूढम्—अंकुरः ।
[a]कवचं छत्राकसदृशम् । आचारप्रदीपे—

वृंताकं च कलिंगं च बिल्वोदुंबरभिस्सटम्[2] ।
उदरे यस्य जीर्यन्ति तस्य दूरतरो हरिः ॥

भिस्सटम्—दग्धान्नम् । भीस्सटेति दीर्घपाठे तु भीस्सटं श्लेष्मातकम् इति धन्वन्तरिनिघण्टुः ।

---

1. इत्याह—ख; इति—घ. a. कव......शम् omitted in Ms. घ.
2. टा—क, ख.

तथा,

> निष्पावान् राजमाषांश्च मसूरं संधितानि च ।
> वृंताकं च कलिंगं च सुप्ते देवे विवर्जयेत् ।।

संधितानि लवणशाकादीनि । अत्रैव[a] तप्तमुद्राधारणमुक्तं रामार्चनचन्द्रिकायाम् । आषाढ्यां[1] कोकिलाव्रतारम्भः उक्तो भविष्ये—

> आषाढपौर्णमास्यां तु संध्याकाल उपस्थिते ।
> संकल्पयेन्मासमेकं श्रावणे प्रत्यहं ह्यहम् ।।
>
> स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती ।
> भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयाम् ।।

इति । अस्य[2] नक्तव्रतत्वात्प्रदोषव्यापिनी ग्राह्या । अस्यां[b] किञ्चिद्दानमावश्यकम् । तदुक्तमयोध्याकाण्डे भरतशपथेषु—

> *आषाढी कार्तिकी माघी तिथयः पुण्यसम्भवाः ।
> अप्रदानवतो यान्तु यस्यार्योऽनुमते गतः ।।

इति । अत्रैव व्यासपूजोक्ता । तत्र मध्याह्नव्यापिनी ग्राह्या । "दिनद्वये तादृशी चेत् परैवे"ति संन्यासपद्धतौ । इयं[c] मन्वादिः ।

इत्याषाढकृत्यानि ।।

---

a. This Sentence is omitted in Mss क and ग. 1. आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं स्कान्दे हेमाद्रौ भविष्ये-घ. 2. न-ग. b अस्यां ..... यस्यार्योऽनुमते गतः ।। इति—omitted in Ms. घ. c. Portion from 'इयं मन्वादिः' to 'कार्यमिति दिवोदासीये' (Page 49) omitted in Ms. क.

* मुद्रितपाठे न दृश्यते ।

अथ श्रावणकृत्यानि ।

श्रावणादिमासचतुष्टये कृष्णपक्षद्वितीयासु अशून्यशयनव्रतम् । तत्र चन्द्रोदयव्यापिनी ग्राह्या, "एकभक्ते दिवानक्ते निशि चन्द्रोदयव्रते । तिथि-[1]स्तात्कालिकी ग्राह्या" इति मदनरत्ने स्मृतिसंग्रहवचनात् । चन्द्रोदयव्रतत्वं चास्य, "चन्द्राय चार्घ्यो[2] दातव्यो दध्यक्षतविभूषित" इति चन्द्रोदये चन्द्रार्घ्यदा[3]-नविधानात् । दिनद्वये तत्र सत्त्वेऽसत्त्वे वा परा,

चतुर्ष्वसितपक्षेषु मासेषु श्रावणादिषु ।
अशून्याख्यं व्रतं कुर्याज्जायया तु फलाधिकम् ॥

इति मदनरत्नोदाहृतवचनात् । अत्र पूर्णिमान्तो मासो ग्राह्यः इति हेमाद्रौ ।

[4]श्रावणकृष्णतृतीया कज्जलीसंज्ञा । सा परेति दिवोदासीये ।

[a]श्रावणकृष्णचतुर्थी बहुलाख्या मध्यदेशे प्रसिद्धा । सा च सायाह्नव्यापिनी ग्राह्या । दिनद्वये तथात्वे तु पूर्वा[5] । अत्र गोपूजा यवान्नाशनं च[6] कार्यमिति दिवोदासीये ।

[7]श्रावणकृष्णतृतीयायां श्रवणयुक्तायां विष्णुपूजा । तदुक्तं हेमाद्रौ विष्णुधर्मोत्तरे—

तृतीया श्रावणे कृष्णा या स्याच्छ्रवणसंयुता ।
तस्यां संपूज्य गोविन्दं तुष्टिमग्र्यामवाप्नुयात्[8] ।

1. ह्योक्तेः–ग. 2. य चार्घो–ख. 3. र्घ–ख. 4. सा च प–ख. a. श्रावण...दिवोदासीये–omitted in Ms. ग. 5. च–ख. 6. नमिति–ख. 7. अस्यामेव श्रवणयुक्तायां विष्णुपूजा हेमाद्रौ धर्मोत्तरे–ग. 8. ग्रामवा-ख, ग्र्यां स मा-घ.

इति । श्रावणशुक्लचतुर्थी सोमकल्पादिः । श्रावणशुक्लतृतीया मधुश्रावाख्या गुर्जरेषु प्रसिद्धा । सा परयुता ग्राह्येति[1] दिवोदासीये ।

श्रावणशुक्लचतुर्थ्यां दूर्वागणपतिव्रतम् । तत्र सा मध्याह्नव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तावव्याप्तौ च पूर्वा । तथा च बृहस्पतिः—

चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्नव्यापिनी सा तु परतश्चेत् परेऽहनि ॥

इति । श्रावणशुक्लपञ्चम्यां नागपूजोक्ता भविष्ये—

श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप! ।
द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः ।

पूजयेद् विधिवद् क्षीरदधिदूर्वांकुरैः[2] कुशैः ।
गन्धपुष्पोपहारैश्च ब्राह्मणनां च तर्पणैः ॥

ये तस्यां पूजयन्तीह नागान् भक्तिपुरःसराः ।
न तेषां सर्पतो वीर! भयं भवति कुत्रचित् ॥

इति । [a]अत्र पञ्चमी परा ग्राह्या,

श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी ।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिता (?) ॥

इति मदनरत्नोदाहृतवचनात् । इयमेव रौरवकल्पादिः ।

श्रावणशुक्लद्वादश्यां दधिव्रतारम्भः प्रागुक्तः[3] । तत्र तक्रादीनां न

---

1. ग्राह्या ।- क, ख, ग. 2. वीर ! ख, ग; वारं-घ. a. This and the following 3 lines upto वचनात् are omitted in ख, ग and घ.
3. तं प्रागुक्तम्-घ.

निषेध:[1], दधित्वाभावात् । अत्रैव[2] द्वादश्यां विष्णोः पवित्रारोपणं हेमाद्रौ विष्णुरहस्ये–

श्रावणस्य सिते पक्षे कर्कटस्थे[3] दिवाकरे ।
द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतम् ॥

द्वादश्यां श्रावणे वापि पञ्चम्यामथवा द्विज! ।
अनुकल्पेषु कर्त्तव्यं पञ्चदश्यामथापि वा ॥

इति । शिवे नु तत्रैव कालोत्तरे,

आषाढान्ते चतुर्दश्यां नभस्यनभसोस्तथा ।
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोः समम् ॥

इति । अधिवासनं तु दीपिकायाम्–

गोदोहनान्तरिते काले पूर्वेद्युरधिवासनम् । इति ।

गौणकाल उक्तो रामार्चनचन्द्रिकायाम्–

पवित्रारोपणं विघ्नाच्छ्रावणे न भवेद्यदि ।
कार्तिक्यवधि शुक्रास्ते कर्तव्यमिति नारदः ॥

शुक्रास्तेऽपीत्यर्थः । तथा,

हेमरौप्य[4]ताम्रक्षौमसूत्रैः कौशेयपद्मजैः ।
कुशैः काशैश्च कार्पासैः ब्राह्मण्या कर्तितैः शुभैः ॥

कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत् ।
तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः ॥

1. ध: । अत्रैव–क, ख, ग. 2. अस्यामेव वि-ग 3. कर्कस्थे तु दि-घ.
4. रू प्य-ग.

सप्तत्या सहितं द्वाभ्यां शताभ्यां मध्यमं स्मृतम् ।
साशीतिना शतेनैव कनिष्ठं तत्समाचरेत् ॥

साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् ।
उत्तमं तु शतग्रंथि पञ्चाशत्ग्रंथि मध्यमम् ॥

कनिष्ठं तु पवित्रं स्यात् षट्त्रिंशद्ग्रंथिशोभितम् ।
षट्त्रिंशच्चतुर्विंशद्द्वादशेति केचन ।
चतुर्विंशद्द्वादशाष्टावित्येके मुनयो विदुः ॥

इति । हेमाद्रौ विष्णुरहस्ये—

कनिष्ठं तन्तुभिर्ज्ञेयं सप्तविंशतिभिः शुभम् ।
चतुःपञ्चाशता ज्ञेयं तन्तूनां मध्यमं परम् ॥

उत्तमं चैव तन्तूनां शतमष्टोत्तरं स्मृतम् ।
शिवपवित्रं तु शिवागमे—

एकादशभिर्वा सूत्रैस्त्रिशता वाष्टयुक्तया ।
पञ्चाशता वा कर्तव्यं तुल्यग्रन्थ्यन्तरालकम् ॥

द्वादशांगुलमानानि व्यासादष्टांगुलानि वा[1] ।
लिंगविस्तारमानानि चतुरंगुलकानि च[2] ॥

इति । तत्र मन्त्रः—

देव देव! नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥

---

1. च-घ. 2. वा-ख.

पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव ! त्वत्प्रसादात् सुरेश्वर ! ॥

इति मूलमन्त्रसंपुटितेनानेन दद्यात् । प्रार्थना–

मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज! ॥

वनमाला यथा देव! कौस्तुभः सततं हृदि ।
पवित्रमस्तु ते तद्वत्पूजां च हृदये वह ॥

इति । एतच्च नित्यम् । तत्रैव,

न करोति विधानेन पवित्रारोपणं तु यः ।
तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम! ॥

तस्मात् भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ।
वर्षे वर्षे विधातव्यं पवित्रारोपणं हरेः ॥ इति । तथा,

पवित्रारोपणं काले न करोति कथञ्चन ।
तदायुतं जपेन्मन्त्रं स्तोत्रं वापि समाहितः ॥

इति । श्रावणशुक्लचतुर्दशी[1] पवित्रारोपणे पूर्वविद्धा ग्राह्या, चैत्रशुक्ल-चतुर्दशीवत् ।

अथोपाकर्म । तच्च बह्वृचैः श्रावणे कार्यम् । याजुषैः पौर्णमास्यम् । सामगैः सिंहस्थे सूर्ये हस्तनक्षत्रे ।

1. शी पू–घ.

सिंहे रवौ हि पुष्यर्क्षे पूर्वाह्णे[1] विचरेद् बहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं सर्वच्छन्दसाम् ॥
शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकम् ।

इति गार्ग्यवचनात् । एषां खंडत्वे औदयिकानि ग्राह्याणि,

[a] उदये संगमस्पर्शे श्रुतौ पर्वणि चार्कभे ।
कुर्युर्नभस्युपाकर्म ऋग्यजुःसामगाः क्रमात् ॥

इति पृथ्वीचन्द्रोदाहृतवचनात् । [b] एषां ग्रहसंक्रान्तिदुष्टत्वे बह्वृचैः श्रावणशुक्लपञ्चम्यां यजुर्वेदिभिर्भाद्रपद्याम् । येषां गृह्ये आषाढी उक्ता तैराषाढ्यां कार्यम्[2] । वाजसनेयिभिस्तु पञ्चम्याम्, -'उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभि''रिति वचनात् । वाजसनेयिग्रहणं येषां गृह्ये पञ्चम्युक्ता तेषामुपलक्षणम् । ग्रहसंक्रान्तियोगश्च अर्धरात्रात् पूर्वं विद्यमान एव दूषको नान्यथा । तथा च गार्ग्यः—

अर्धरात्रादधस्ताच्चेत्[3] संक्रान्तिग्रहणं तथा ।
उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत्[4] ॥

इति । इयं च कर्कटस्थे भानौ निषिद्धम् । स च निषेधो नर्मदोत्तर-भागविषयः ।

नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके ।
कर्कटे संस्थिते भानौ उपाकुर्म तु दक्षिणे ॥

इति वचनात् । [c] कथं तर्हि नर्मदोत्तरभागगतानां शिष्टानां कर्कस्थे

---

1. तु–ख. a. This stanza and the Sentence following it are omitted in Ms. घ. b. portion from "एषां" to "तेषां उपलक्षणम्" is omitted in Ms. ग. 2. कर्म तु-ख. 3. घश्चेत्स्यात्-ख 4. भाक्–क c. Portion from "कथं तर्हि" to "अनाकरत्वमाहुः" (Page 55) is omitted in Ms. घ

रवावुपाकर्मानुष्ठानम् । अत्र केचिदस्य वचनद्वयस्य सामगविषयत्वात् तद्व्यतिरिक्तानां कर्कस्थेऽपि सूर्ये न दोष इत्याहुः । अन्ये तु सामग-विषयत्वस्याप्ययुक्तत्वादेतस्य प्राच्यग्रन्थेषु दाक्षिणात्यप्राच्यनिबन्धेषु च अदृष्ट-त्वात् अनाकरत्वमाहुः । एतच्च शुक्रास्तादावपि कार्यम् । प्रथमारंभस्तु तत्र न कर्तव्यः । अधिमासे न भवत्येव । सामगानां त्वधिमासेऽपि भवति, तेषां सिंहस्थे सूर्ये विधानात् । एतच्च सामगैरपराह्णे कार्यम्, [a]"शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिक"मिति गार्ग्यवचनात् । इतरैः पूर्वाह्णे इत्यादि अन्यत्र मत्कृतौ द्रष्टव्यम् ।

श्रावण्यामाश्वलायनेन श्रवणकर्मोक्तम्—"श्रावण्यां पौर्णमास्यां श्रवण-कर्मे"ति । तत्रास्तमय[1]युता ग्राह्या, "अस्तमिते स्थालीपाकं श्रपयित्वे"ति अस्तमयकाले विधानात्; "कर्मणो यस्य यः काल" इति वचनात् । याज्ञिकास्तु पौर्णमासीशब्दस्य पर्वान्त्यक्षणवचनत्वात् पर्वसन्धिदिवसे रात्रौ श्रवणकर्मानुष्ठानं वदन्ति । अत्रैव रक्षाबन्धनमुक्तं भविष्योत्तरे—

ततोऽपराह्णसमये कुर्यात् पोटलिकां शुभाम् ।
कारयेच्चाक्षतैस्तद्वत्सिद्धार्थैर्हेमचर्चिताम् ।।

इति । तत्र मन्त्रः—

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वाम[2]भिबध्नामि रक्षे मा चल मा चल ।।

[b]इति । अत्रापराह्णव्यापिनी ग्राह्या । उभयत्र तद्व्याप्तौ पूर्वा ग्राह्या ।

श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम् ।।

---

a. This sentence is omitted in Mss क and घ. 1. युक्—घ.
2. मभिबध्नामि रक्ष मा च-घ. b. This centence is omitted in Ms घ

इति[1] बृहद्यमवचनात् । अस्मादेव विशेषवचनादन्येष्वपि[2] उपाकर्मव्यतिरिक्तेषु पवित्रारोपणादिश्रावणीकृत्येषु[3] पूर्वैव ग्राह्या । पूर्वस्यां भद्रासत्त्वे तूत्तरस्यामेव रक्षाबन्धनं[a] कार्यम् ।

भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा ।
श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी ।।

इति वचनात् । अद्भुतसागरे नारदः–

भानौ सिंहगते चैव यस्य गौः संप्रसूयते ।
मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः ।।

तत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम् ।
[b] प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ।।

ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः ।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ।।

व्याहृतिभिश्चायं[5] होमः ।

"सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम्" इति । अथर्ववेदिनां गृह्यपरिशिष्टे—

माघे बुधे च महिषी श्रावणे बडवादि[6] वा ।
सिंहे गावः प्रसूयन्ते स्वामिनो मृत्युदायकाः ।।

---

1. ति व–ख. 2. पिं पवित्रा–घ. 3. दिषु पू—क, ख, ग. a. omitted Ms. क, ख, and ग. b. This line and the line following it are omitted in Ms घ. 5. स्तु हो -घ. 6. वा तथा—घ.

इति । अत्र, तत्रोक्तामृता[1] शान्तिः कार्या ।

इति श्रावणकृत्यानि ॥

अथ भाद्रपदकृत्यानि ।

भाद्रपदकृष्णचतुर्थ्यां[2][3][4] संकटचतुर्थीव्रतं[5] स्कान्दे—

श्रावणे बहुले पक्षे चतुर्थ्यां तु विधूदये ।
गणेशं पूजयित्वा तु चन्द्रायार्घ्यं च दीयते[6] ॥

इति । श्रावणोऽत्रामांतमासेन ग्राह्यः, 'शुक्लादिमेव च' इति वचनात्[a] । इयं चन्द्रोदययोगिनी[7] ग्राह्या, "कर्मणो यस्य यः काल" इति वचनात् । तत्काले चन्द्रार्घ्यदानविधानेन चन्द्रोदयव्रतत्वात्, "चन्द्रोदयव्रते चैव तिथिस्तात्कालिकी स्मृता" इति वचनाच्च[8] । दिनद्वये चन्द्रोदये सत्त्वेऽसत्त्वे[9] च पूर्वा ग्राह्या ।

चतुर्थी च तृतीयायां महापुण्यफलप्रदा ।
कर्त्तव्या व्रतिभिर्वत्स! गणनाथसुतोषिणी ॥

इति ब्रह्मवैवर्तात् ।

गणेशगौरीबहुलाव्यतिरिक्ताः प्रकीर्तिताः ।
चतुर्थ्यः पञ्चमीविद्धा देवतान्तरयोगतः ॥

---

1. कर्त्तव्या -ख. 2. अस्यामेव चतु-घ. 3. शुक्लच-क. 4. र्थी सं—ख. 5. र्थी । तदुत्तं स्का—ख. 6. प्रदी—घ. a. इति । ...... वचनात् । omitted in घ. 7. व्यापिनी—घ. 8. त् । —क, ख, ग. 9. वा—घ.

इति वचनाच्च । न च तृतीयाविद्धाविधायकानि वचनानि दिवा त्रिमूहूर्त-वेधे सत्येव प्रवर्तन्ते, न रात्रियोगमात्रे इति वाच्यम्, रात्रिसाध्यकर्मसु रात्रावपि वेधस्य जन्माष्टमीप्रकरणे माधवादिभिर्दर्शितत्वात् । अत एव महालक्ष्मीव्रतसमापने दिनद्वये अष्टम्याश्च[1] चन्द्रोदयकालव्यापित्वे[2],

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्तव्या परविद्धा न कुत्रचित् ।।

इति वचनाच्च[3] पूर्वविद्धा ग्राह्येत्युक्तं हेमाद्रौ मदनरत्ने च । यानि तु,

चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्न[4]व्यापिनी सा तु परतश्चेत्परेऽहनि ।।

इत्यादीनि वचनानि, तानि सिद्धिविनायकादिव्रतविषयाणि, तेषु मध्याह्नस्य कर्मकालत्वात् । "प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप!" इति वचनात् । अत एव माधवेन मध्याह्नस्य कर्मकालत्वमङ्गीकृत्यैव विनायक-व्रते मध्याह्नव्यापिनी ग्राह्येत्युक्तम् । तस्मादुभयत्र चन्द्रोदयकाले सत्त्वेऽ-सत्त्वे वा पूर्वैवेति न्याय्यः पन्थाः, इत्यलं बहुना ।

भाद्रपदकृष्णपञ्चमी मानवकल्पादिः । अथ जन्माष्टमी । सा[5] चामांत-मासेन श्रावणकृष्णाष्टमी । पूर्णिमांतमासपक्षे भाद्रपदकृष्णाष्टमी[6] । सा च शुद्धविद्धभेदेन द्विधाप्यष्टमी[7] प्रत्येकं द्विधा[8], द्वितीयदिने सूर्योदयोत्तरं सती असती च। तादृश्यपि पुनः प्रत्येकं द्विधा-रोहिणीसहिता तद्रहिता च।

---

1. म्याश्चन्द्रो- घ, ग. 2. यव्या–घ. 3. तु पू – ग, घ. 4. पराह्न–म a. This Sentence is omitted in Ms. घ. 5. च श्राव–घ. 6. मी शुद्ध–क, ख, ग. 7. द्विविधा–घ. 8. द्विविधा–घ

तत्र शुद्धायां विद्धायां वा द्वितीयदिने सूर्योदयादूर्ध्वमसत्यां विवाद एव नास्ति द्वितीयदिनेऽष्टम्यभावात्। शुद्धाधिकाया विद्धाधिकाया वा दिनद्वयेऽप्यर्धरात्रं विहाय रोहिणीयोगे सप्तमीविद्धानिषेधान्नवमीयुक्तायाः प्रशस्तत्वादुत्तरा ग्राह्या। यदा त्वेकस्मिन्नेव दिनेऽर्धरात्रे रोहिणीयोगस्तदा सैव ग्राह्या।

अर्धरात्रे तु योगोऽयं तारापत्युदये[1] सति।
नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्तयेत्॥

इति विष्णुधर्मोत्तरात्[2]। दिनद्वयेऽप्यर्धरात्रे रोहिणीयुक्ता परैव, "सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी"ति वचनेन सप्तमीविद्धायाः निषेधात्। दिनद्वयेऽपि रोहिणीयोगाभावेऽर्धरात्रव्यापिनी ग्राह्या, अर्धरात्रस्य कर्मकालत्वात्।

दिवा वा यदि वा रात्रौ नास्ति चेद् रोहिणीकला।
रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम्॥

इति वचनाच्च[3]।

दिनद्वयेऽप्यर्धरात्रे सत्त्वेऽसत्त्वे वा परा, सप्तमीविद्धाया निषेधात्। इदं च नित्यं "वर्षे वर्षे तु[4] कर्तव्यं तुष्ट्यर्थं चक्रपाणिनः" इति वीप्साश्रवणात्। "अकुर्वन् नरकं याति यावदिन्द्राश्चतुर्दशे"त्यकरणेपि प्रत्यवायश्रवणाच्च[5]। काम्यं चेदं फलस्यापि श्रवणात्। तथा च स्कान्दे, "सिध्यन्ति सर्वकार्याणि कृते जन्माष्टमीव्रते" इति। यत्तु[a] कैश्चिद्

---

1. तथा—क,ग. 2. रात्रं विहाय रोहिणीयोगे सप्तमीविद्धायाः निषेधात् नवमीयुक्तायाः प्रशस्तत्वादुत्तरा ग्राह्या—घ. 3 त्। दिन—ख, ग, 4 च-ग. 5. स्य श्र—ख. a. Portion from "यत्तु" to "विहितमेव" (Page 60) is omitted in Ms. घ.

उपवासस्यांगत्वमुक्तं तदप्युक्तम् । "उपवासस्तु तत्रोक्तो महापातकनाशनः" इति वह्निपुराणात् । "उपोष्या सा प्रयत्नतः" इति तत्रैवोक्तेश्च । विष्णुरहस्येऽपि—"मुहूर्त्तमपि लभ्येत सोपोष्या सा महाफला" इति उपवासाकरणे दोषश्रवणाच्च । तथा च स्कन्दपुराणे[1] —

शूद्रान्नेन तु यत्पापं शवहस्तस्थभोजने ।
तत्पापं लभ्यते पुंभिर्जयन्त्यां[2] भोजने कृते ॥

इति । शवहस्तस्थभोजने—शवसूतकिहस्तस्थभोजने इत्यर्थः । तथा,

गृध्रमांसं खरं काकं श्येनं वा मुनिसत्तम ! ।
मांसं वा द्विपदां भुङ्क्ते कृष्णजन्माष्टमीदिने ॥

इति । तथा,

कृष्णाष्टमीदिने प्राप्ते येन भुक्तं द्विजोत्तम ! ।
त्रैलोक्यसंभवं पापं तेन भुक्तं द्विजोत्तम! ॥

ब्रह्मघ्नश्च सुरापश्च गोवधे स्त्रीवधेऽपि वा ! ।
न लोको मुनिशार्दूल ! जयन्तीविमुखस्य च (?)॥

जयन्तीवासरे प्राप्ते करोत्युदरपूरणम् ।
याप्यते तिलमात्रं तु यमदूतैः कलेबरम् ॥

इति । न हि क्वचिदंगाकरणे प्रत्यवायः श्रूयते । एकप्रयोगत्वं च जन्माष्टमीव्रतशब्देनोभयोरेकफलोद्देशेन विधानादेकसंकल्पविषयत्वाच्च विहितमेव पारणं तु केवलाष्टम्युपवासे दिवा, तिथ्यन्तलाभे दिवैव तिथ्यन्ते कर्तव्यम् । रोहिणीयुक्ताष्टम्युपवासे तूभयान्ते कर्तव्यमिति मुख्यः कल्पः[3] । अन्यतरान्ते[4] गौणः । यदि रात्रावुभयोरन्यतरस्य वान्तस्तदा रात्रावपि[5] पारणं कार्यम् ।

1. स्कान्दे—ख. 2. भ—ग. 3. पक्षः—घ. 4. न्तो—घ. 5. वा कार्या—ख.

T. S. S COMPLETES 71 YEARS

Mm. T. GANAPATI SASTRI'S LETTERS–A LOOK BACK.

Vol. XXI-1

PART – B

which the late distinguished Mm. T. Ganapati Sastri (1860-1926) who started the series wrote to contemporory scholars, Indian and European. He was the first Head of the Department for publication of Sanskrit Texts and stayed as Curator for seventeen years (1908–1925). These letters throw some light on the scholarly life of that period.

These were lent to us by Sri V. S. V. Guruswami Sastri, Retd. Professor of the Trivandrum Sanskrit College.

October 1976 Editor.

SOME LETTERS OF MAHAMAHOPADHYAYA DR. T. GANAPATI SASTRI

One

श्री

अनन्तशयनम्
२०–६–०५

मान्यतमविद्वद्वरिष्ठश्रीसंस्कृतचन्द्रिकासम्पादकश्रीमदप्पाशास्त्रिमहाशयेभ्यो बहवः प्रणामाः ।

मत्प्रहितभक्तिमञ्जरीग्रन्थाधिगममभिनन्दन् यो मया लेख आसादितः संस्कृतपाठशालाविश्रमवशात् सार्धं मासं देशान्तरे चरता, परतश्च पाठशालोद्घाटनात् पक्षमेकं देहास्वास्थ्यमनुभवता स लेखो मया यथाकालं न लब्धुं, न चोत्तरयितुमपारीति क्षन्तव्योऽस्मि श्रीमद्भिः ।

लेखस्तु श्रीमतामव्याजसौजन्यप्रेमसारचतुरोदारैरर्थैः शब्दैश्च परिमितललितावदातैराह्लादं मे निरतिशयमुपजनितवान्, सत्यमसावाह—"धन्यः स प्रदेशो, यत्र........सरस्वत्या अप्यव्याजप्रेमास्पदं यद्वल्लभाः प्रादुःषन्ति" इति ।[illegible] राजानो ह्यस्यानन्तशयनप्रदेशस्य वर्षद्विशतीप्राक्कालात् प्रभृति वैदुष्यविशेषशालिन एव समुपलभ्यन्ते ।

नवप्रकाश्यमानात्त्यग्रन्थावलेरर्थे प्रीतिपूर्वकया साहायकप्रतिज्ञया भृशमुपकृतोऽस्मि श्रीमद्भिः साहायकं च समयेष्वर्थयिताहे ।

यत् पुनः श्रीमद्भिरुच्यते—"स्पृहयामि च श्रीमतां परिचयाय सौहार्दाय च" इति, तत्र तदेव वाक्यमुत्तरमीषद्व्यत्ययेन प्रतिपद्ये—स्पृहयामि च श्रीमतां परिचयं सौहार्दं चेति । विरला हि विश्वजनीने कर्मण्यजस्रमासज्जमाना जगति भवादृशाः । इति शिवम् ।

भवतां मित्रं,
त. गणपतिशास्त्री.

To
श्रीमदप्पाशास्त्रिणः
संस्कृतचन्द्रिकासम्पादकाः ।

श्री

Two

अनन्तशयनम्
२१–६–०५

श्रीमन् ! सुहृत्तम,

व्यवहितमासाविंशदिवसलिखितो भवल्लेखो लब्धः, किन्त्वसौ पाठशालाविश्रमवशात् सार्धं मासं देशान्तरे चरता, परतश्च पाठशालोद्घाटनात् पक्षमेकं देहास्वास्थ्यमनुभवता मया यथाकालं न लब्धुं न चोत्तरयितुमपार्यतेति क्षन्तव्योऽस्मि तत्र भवता ।

अत्रस्थयोर्भामहालङ्कारपुस्तयोरेकं द्विशतवर्षवृद्धदेशीयं जीर्णकल्पमनतिशुद्धं च, द्वितीयं तु तस्यैव प्रतिरूपम्, एतन्मातृकमेव चास्मन्मित्रपण्डितगोविन्ददासाय मत्प्रहितं प्रतिरूपम्, अन्तिमश्लोकपर्यालोचनायामत्रत्यं भामहपुस्तकं समग्रमेवेति प्रतिभाति ।

अन्यदेतत्प्रतिरूपं वैयाकरणभूषणस्य यं कमपि वा टीकाग्रन्थमुपलब्धुं लब्धुं च प्रयतिष्ये, यत्नफलं च निवेदयितास्मि ।

प्राकृतव्याकरणसूत्रवृत्तिः [४ परि.] इत्येकैवात्र पुस्तकालये वर्तते प्राकृतव्याकरणकृतिः ।

मत्प्रहिता वैयाकरणभूषणमातृका "अधिकषष्टवर्षप्राचीनेन पण्डितवरेणोपयुक्ता' इति मदुक्तौ 'अधिकषष्टवर्षशतप्राचीनेन' इत्याशयः शङ्कितो भवता २१–७–०४ लेखे । न तथा ममाशयः, किन्तु षष्टेरधिकान्यधिकषष्टानि यानि वर्षाणि तत्प्राचीनेनेत्येवाशयः अधिकषष्टानि इति हि 'संख्ययाव्ययासन्ना-' (२–२–२५) इति बहुव्रीहिः ।

अयं तु पण्डितवरो वेङ्कटरामशास्त्रिनामात्रैव नगरे 'Toliyai Kovil' अग्रहारे पूर्वमासीत् । इदानीं तु जानेऽस्य पित्रा (पन्तलम्) सुब्रह्मण्य-

शास्त्रिणमपि वैयाकरणश्रेष्ठेनेदं पुस्तकमुपयुक्तमिति । एतत्प्रीत्यस्य सुब्रह्मण्य-शास्त्रिणस्तु सकाशात् पुस्तकमिदमधिगतम् ।

अत्र मुद्र्यमाणे दुर्घटवृत्तिनाम्नि व्याकरणग्रन्थेऽयं श्लोकोऽस्ति—

२ ० १ ५

'शाकमहीपतिवत्सरमाने एकनभोनवपञ्चवितानै ।

दुर्घटवृत्तिरकारि मुदे वः कण्ठविभूषणहाररलतेव' इति ।

इदं वत्सरमानं शालिवाहनीयं वान्यदीयं वेति निर्णये यदि कश्चिदुपायोऽस्ति, स कृपयोपदेष्टव्यो मह्यं भवता ।

शमत्र मे । तद् भवतः शश्वदाशासे महेशानात्, जिज्ञासे च ।

भवन्मित्रं,

त. गणपतिशास्त्री.

To,

K. P. Trivedi Esq.
Ahmedabad.

श्री

Three

१२-८-५.

सद्गुणभूषणाः विद्वद्वरमहाशयाः,

अस्य राजकीयसंस्कृतविद्यामन्दिरस्य पाठ्यपरीक्षाव्यवस्थाम् अद्य भवद्भ्यः प्रहिणोमि, तया च सह 'भक्तिमञ्जरीम्' । ते तत्र भवन्तः स्वीकर्तुं कृपां कुर्वन्तु । 'भक्तिमञ्जरी' राजशासनानुमत्या भवदर्थे कल्पितः कश्चिद् विद्व-दुपहारो भवति ।

कतिपयदिवसेभ्यः प्राग् भवदन्तिकमागतो 'मयूरसन्देश' नाम्नः

काव्यस्याङ्गलभाषानुवादः श्रीमतो मयूरसन्देशकर्त्तुः प्रार्थनया मया प्रेषितोऽभूत् । तमपि भवन्तः स्वीकर्त्तुं प्रसीदन्तु ।

अत्र राजशासनेन कापि 'प्राचीनसंस्कृतग्रन्थावलिः' सम्प्रति प्रकाशयितुमुपक्रान्ता । तस्याश्च प्रथमो ग्रन्थो धातुविवरणरूपो 'दैव'नाम ७०० वर्षप्राचीनया 'पुरुषकाराख्यया सहित इदानीं मुद्रितप्रायः । तमचिरात् प्रेषयिष्यमाणं महाशयाः सदयमङ्गीकुर्वन्तु ।

तच्च 'भारतानुवर्णनं' सामग्र्येण मुद्रितमभूत् । भारतालेख्यस्य परं मुद्रणमवशिष्यते । सर्वथा तत्पुस्तकं सेप्टम्बर्मासे भवद्भ्य प्रेषयितास्मि ।।

शुभम्

भवदीयो विश्वास्यः
त. गणपतिशास्त्री.

Professor Syloain Levi Esq.
9 Ruy Paris.

श्री

Four

अनन्तशयनम्
१८-२-०६

श्रीमन् सुहृत्तम,

अलप्सि भवतो लेखं प्रेमभूमाभिरामम् । तेन चामोदिषि निकामम् ।

उत्तरदानविलम्बो भवादृशां नाम विश्वजनीनकर्मान्तरव्यासङ्गमवश्यमनुमापयन् मद्विधैः स्पृहणीयोऽपि भवति । न तु सूनृतसुहृद्वाक्यरसास्वादप्रतीक्षां यथाकालमचरितार्थयन् द्वेष्य एव केवलम् ।

अत्र कृतकार्यमित्येतावता भवते प्राहिणवं तद् विद्युद्वार्त्ताप्रमाणपत्रं, न पुनर्भवच्छङ्कितं फलमाभिसन्धाय ।

भवत्प्रश्नरत्नानां समुचितान्युत्तराण्येषु दिनेषु यत्नादुल्लिखामि । इतो मासादूर्ध्वं मन्ये भवत्सकाशं तानि प्राप्नुयुः ।

शमत्र । तद् भवतो जिज्ञास आशासे च ।

त. गणपतिशास्त्री.

To,
Editor,
Mitragoshthi.

श्री

Five

२०—५—०६

श्रीमद्भ्यः सकलसद्गुणशेवधिभ्यः ब्रह्मश्रीयुतेभ्यः श्रीकण्ठशास्त्रिभ्यो बहवः प्रणामाः ।

श्रीमतामनुज्ञामादाय शृङ्गेरिपुरात् प्रस्थितोऽहं सकुटुम्बः पाथेयसौकर्यसंविधाभिर्भवन्निदेशोपपादिताभिः प्रत्यागमयात्रां सुखेन निरवर्त्तयम् । महाराज्ञीविवाहदिवसस्य पूर्वेद्युश्चानन्तशयनमागतः कुशली श्रीजगद्गुरुपादकृपया वर्त्ते ।

महाराज्ञीविवाहमहोत्सवस्य तावद् वैभवमलोकसामान्यमासीदपूर्वतया जनैरतिमात्रमभिनन्दितं च ।

अद्राक्षं च महामहिमानं श्रीमहाराजम् । स हि श्रीसद्गुरुपादसक्तः स्वयमेवाप्राक्षीज्जगद्गुरुसन्निधिवृत्तम् । मया निवेदितश्च सर्वं वृत्तं भृशममोदत । विद्वत्सम्भावनार्थं पञ्चसहस्ररूप्यवार्षिकायतेर्ग्रामस्योषकल्पनात्मकं श्रीमदाचार्य-चरणानामौदार्यं ब्रह्मश्रीयुतरामचन्द्रार्याणां महामनस्कता च स्वीयमहामन्दिर-विश्राणनविषया महाराजस्य चमत्काराय महतेऽभवत् ।

आचार्यजयन्तीमहोत्सवं तमिममागामिनि वर्षे कालटिग्रामे निर्वर्त्तनीय-

सिञ्चाम इत्येवञ्जातीयकान्यामृतमहाक्षराणि श्रीसद्गुरुमुखारविन्दगलितानि श्रीमहाराजाय न्यवेदयं, श्रुत्वा च महाराजः 'परमम्' इत्यवन्दत् ।

श्रीरामचन्द्रार्यवृत्तं भूयोऽपि श्रीमहाराजो अकरोत् ।

श्रीमज्जगद्गुरुभट्टारकचरणच्छायासनीडे मद्वन्दनकोटयो यथावसरं कृपया निवेदनीया इति प्रार्थये ।

ब्रह्मश्रीकृष्णशास्त्रिभ्यः रामचन्द्रार्येभ्यश्च बहव इमे मदीया नमोवाकाः ।

अनन्तशयनमाहात्म्यस्यैकं प्रतिरूपं भवदर्थे प्रेष्यमाणं स्वीकर्तव्यम् । रूप्याणि मत्प्रेषितानि मन्ये श्रीमद्भिरियता कालेनाधिगतानि स्युः ।

त. गणपतिशास्त्री.

To

Sri Sreekantha Sastri (Asthana Vidvan)
Sringeri Sankaracharya Mutt.

श्री

Six

११–७–०६

परमहंसपरिव्राजकाचार्यवर्यश्रीहरिहरपुरमठाधिपतीनां स्वामिनां चरण-कमलयोरनेककोटिवन्दनपूर्वा सप्रश्रया विज्ञापना—

श्रीस्वामिभिश्चातुर्मास्यसेवनपुण्येन मां योजयितुकामैः परमया कृपया सम्प्रेषितामाज्ञापत्रिकां पूर्वेद्युरहमलप्सि । अनेन स्वामिनामनल्पानुग्रहेण सर्वेषामहं श्रेयसां भाजनं कृतोऽस्मि ।

किन्तु राजकीयाधिकारपरतन्त्रोऽहं चातुर्मास्यसमये सन्निधातुमशक्तोऽस्मि । इयते कालाय राजकीयानुमतिरपि सद्यो ग्रहीतुं नैव शक्यते ।

किं करोमि ? स्वाम्याज्ञानुष्ठानसौकर्यविरहं प्रति विषीदामि केवलम् । तथापि समाश्वसिमि, स्वामिनामनन्तशयनविजययात्राप्रसङ्गे स्वामिचरणवन्दनपुण्यः मे सुलभं भविष्यति इति ।

सर्वथा तत्काले तत्राहमसन्निहित इत्ययमगत्योपततो ममापराधः श्रीस्वामिभिः कृपया क्षन्तव्यः, अनुग्रहश्च मयि कर्त्तव्य इति भूयोभूयः प्रार्थये ।

त. गणपतिशास्त्री.

To

His Holiness Hariharapura Mathadhipathi
Sri Sankaracharya.

श्री

Seven

अनन्तशयनम्
१९-१०-०६

गुणवदग्रणीभ्यः ब्रह्मश्रीश्रीकण्ठशास्त्रिमहाशयेभ्यो बहवः प्रणामाः । अत्र कुशलम् । तद् भवतां मुहुर्जिज्ञासे ।

प्रमाणितप्रहितं भवत्प्रीतिलेखमलप्सि । तत्र प्रतिपादिते श्रीमज्जगदाचार्यचरणकैङ्कर्यलवे नियोज्यं मामिच्छन्ति भवन्त इति कृतज्ञोऽस्मि तत्र भवत्सु । तल्लेखानुगत्वरीं तां श्रीप्रसादसम्पुटसनाथां श्रीमुखशासनपत्रीं महामहिम्ने श्रीमन्महाराजाय सकलसद्गुणैकधाम्ने समार्पिपं श्रीमदनन्तरामार्यमहाशयद्वारेण । श्रीमहाराजस्तां भक्तिमौखं गृहीत्वा श्रीमुखे विवृतमर्थं केरलभाषयानुवदितुमाजिज्ञपन्माम् ।

अथानुवाच्य केरलभाषानुवादं सन्तोषातिशयजनितव्यग्रभावेनान्तरात्मना श्रीमहाराजः श्रीजगद्गुरुसङ्कल्पिताचार्यमूर्त्तिप्रतिष्ठार्थेषु पूर्वसंविधानेषु कारयितव्येष्वौत्सुक्यं भृशमाविष्कुर्वन् 'कालटिग्रामे न किञ्चिद् अद्ययावत्

संविहितम्' इति "तत्र महामात्रं चोदयिष्यामः" इति चाज्ञिज्ञपद् इति प्रीतान्तरङ्गोऽनन्तरामार्यमहाशयो विस्रब्धं मामाह ।

मत्समर्पितश्रीमुखप्रतिसन्देशभङ्ग्या च श्रीमहाराजेन ह्यो मां प्रत्येवं प्रोक्तम् 'प्रसादाधिकमधिगम्य निर्भरं प्रीतोऽस्मि कृतार्थश्च , श्रीमुखस्य पुनरुत्तर-निवेदनिकां महामात्यद्वारेण यथासमुदाचारं प्रेषयितास्मि' इति ।

यथाचैवं देवो महाराजः श्रद्दधानः प्रसीदति तथावधारयामि भगवत्पाद-प्रतिष्ठामहोत्सवोऽचिरादेव निर्वर्त्स्यतीति । अपिच मन्ये नास्ति स कश्चित् सङ्कल्पो नाम यः श्रीजगद्गुरुपादानां मनस्याविद्यकविषयानभिमर्शविशदे परमार्थतत्त्वैकगोचरेऽप्याविर्भूय स्वार्थविसंवादं प्रतिपद्यते ।

एतच्चेदानीं वोऽवश्यनिवेद्यं पश्यामि, यत् कालटिकार्यं प्रति समये समये श्रीमहाराजः स्मारयितव्यः । जानन्ति खलु भवन्तो भवदागमनकाले प्रधानन्यायसभाप्राड्विवाकं सम्प्रति करनिर्णयकार्योपमन्त्रिणं श्रीपद्मनाभार्य-महाशयम् । स प्रकृतसत्कार्यघटनलालसो गुणवांश्च श्रीमहाराजदयाबहुमान-भाजनं च । तं यदि महाप्राड्विवाकः श्रीरामचन्द्रार्यमहाशयः कीदृशी कालटि-कार्यस्थितिरित्येतावन्मात्रं लेखद्वारेण पृच्छेत्, सोऽवश्यं तं लेखमास्पदीकृत्य देवं महाराजं यथासमयमावेदयेत्, महामात्यं च पदे पदे स्मारयेत् त्वरयेच्च इति मम विस्रम्भः ।

भवतां मित्रं,

त. गणपतिशास्त्री.

To

Sreekantha Sastri
Asthana Vidvan
Sringeri Sankara Mutt.

श्री

Eight

ता. २९-८-०६

भवल्लेखमलप्स्महि, तत्सध्रीचीं च युगलाङ्गुलीयमाख्यायिकां सपरितोषमवीवचाम । एतस्यां पदानि सरसकोमलानि वाक्यसंस्थानानि प्रसन्नमधुरचूर्णकप्रायाणि, न च किञ्चित्पश्यामो भाषान्तरानुवादसुलभ् अभिप्रायाविष्कारकृच्छ्रं क्वचिदपि । मन्यामहे सर्वथेयमाख्यायिकासु तथा जातीयास्वेका नाम, यथाजातीयास्तावदद्यत्वे निकामं काम्यन्ते, तदेतदस्माकमनुमोदनमाख्यायिकाकर्वि भवन्त आवेदयन्तु ।

त. गणपतिशास्त्री.

To,

महाराष्ट्रपण्डितः
रामदास सर्वे
पूना.

श्री

Nine

पण्डितकृष्णमाचार्याः,

भवत्प्रहितं 'कादम्बरीसङ्ग्रहो' नाम पुस्तकं प्राप्तम् । अत्र मुद्राक्षराणां सन्निवेशजातिरतिसमीचीनावभासते । पत्राणि घनमसृणकान्तानि । पुस्तकबन्धच्छाया च द्रढिमचाकचक्यविशेषभृशभासुरा । वाङ्मयं पुनरत्र निविशमानं श्रीभट्टबाणमहाकवेरिव विद्यते । गुणः स्पृहणीयः । जितं खलु सर्वथा वाणीविलासमुद्रालयेन बहूनिमान् गुणानेवात्र समुच्चित्य दर्शयता । यज्जातीयाः संस्कृतमुद्रालया एकद्वा एव भारते प्रथन्ते ।

यश्च पुस्तकेऽस्मिन् भवदंशभूतो व्यापारो लक्ष्यते वस्तुवर्णनपरग्रन्थसन्दर्भाणामपेक्षिताधिकानां विनाकरणमात्रलक्षणः, सोऽपि न विफलो

भावी । पेलवधियो हि बालकाः । तथाविधैर्ग्रन्थसन्दर्भैः प्रत्यूह्यमानकथानुपूर्वीप्रतिपत्तयः उपलभ्यन्ते । ते खल्वनेन परिहृतप्रतिपत्तिप्रत्यूहा कादम्बरीकथां सुखं मन्ये प्रतिपत्तारः । निशितविशालबुद्धींस्तु रसयितुं कादम्बरी समग्रा स्थितैवेति न तैर्बालानुकूलो भवद्व्यापारचमत्कारोऽयमसूयितव्यः ।

त. गणपतिशास्त्री.

To
R. V. Krishnamachayra
Kumbakonam.

श्री

Ten

११-७-०७

श्रीमन्तः सहृदयधुरीणाः सुहृत्तमाः,

परुत् पूर्णः प्रैषि प्रणयभरिताभिर्भणितिभि-
र्भवद्भिर्लेखो यः शतधृतिवधूगीतिगतिभिः ।
इदानीं यश्चास्य स्थितिमिव विचिन्वन् प्रियसखः
समं मे तावेतौ हृदयममृतेन स्नपयतः ॥

दिनमनु लेखमाद्यमनुचिन्तयतापि मया
प्रतिवचनेऽपि वश्चिरमुदासितमेव बत ।
तदपि न मन्तुमर्हत मयीरयितुं तु यतः
प्रतिवचनं सदैवमुपदातुमतृष्यमहम् ॥

ग्रन्थानां मुद्रणजुषां प्रतिरूपाणि कानिचित् ।
संविभक्तुं भवादृक्षु मयानुमतिरर्थिता ॥

नागताद्यापि सामात्यसकाशात् तदयं मया ।
लेखो मत्कृतिमात्रेण सानुगः क्रियतेऽधुना ॥

सत्यं महिमभट्टीयैर्वाक्यैः काव्यानुशासनम् ।
पूरितं हेमचन्द्रेण क्वापि क्वापि तु माम्मटैः ।

सा नाट्यवेदविवृतिर्बहुपत्रलोप–
संत्रोटजीर्णभृशदुर्लभपूर्णवाक्या ।
तस्या अपि प्रतिकृतिस्तदवाप्तिगृध्नु–
गोविन्ददासविदुषे कथमप्यलेखि ॥

आदर्शान्तरसंवादक्रियामात्रोपयोगिनी ।
सर्वथावधृता सेयं काम्यते यदि कथ्यताम् ॥

भवत्प्रकाशितं यत्तच्छात्रारम्भसमर्थनम् ।
तस्यानिनीषाम्यादर्शान् छात्रसम्माननोत्सवे ॥

साचेतस्यं जीवितं यस्य देहो
ग्रन्थज्ञत्वं सौहृदं शूरभावः ।
प्रत्यग्रार्थग्रामचिन्ता च वृत्ति–
स्तस्मै स्वस्ति त्वादृशां पण्डितिम्ने ॥

भामहालङ्कारस्तु क्रयप्रतिरूपणोऽल्पपरिमाणत्वादगणनीयलेखनशुल्कश्च । वेदान्तवादावलौ प्रकाशितानां ग्रन्थानां नामावलिं जिज्ञासे । बहवः प्रणामाः ।

त. गणपतिशास्त्री.

To,

A. Anantalwar Esq,
Pandit, Archl. Office,
Malleswaram,
Bangalore.

श्री

Eleven

२४-१०-१९०७

श्रीमन्तः पण्डितसुहृद्वराः,

स्वस्ति स्वागतं भवद्भ्यः अस्मदभिजनदेशमवतीर्णेभ्यः। चिरस्य प्रतीक्षितं भवतां प्रणयलेखं समासाद्य निर्भरमहं सन्तुष्टोऽस्मि। भवतां दर्शनं प्रति ममोत्कण्ठा बहोः कालात् प्रभृति वर्तते। निवेदिता च सा भवद्गुरोः सकाशे। अपि च, अतिदुर्लभं खलु भारते भवतामागमनम्। तदिदानीं दैवात् सम्भूतम्। अस्मिन्नवसरे मम मन्मित्राणां च तृप्तये मद्गृहेऽपि भवद्भिः सन्निधातव्यमिति ममाशा बलवती। स्पृहणीयदर्शनश्चायमोषधिवनवीथीसम्पन्नः केरलदेशः। अतः सति सौकर्ये सा ममाशा पूरणीयेति प्रार्थये। अन्ततः पाण्डिच्चेरिनगरे वा भवत्समागमो यदि मे घटेत काममहं कृतार्थो भवेयम्।

एषु दिवसेषु देहमनसोरस्वास्थ्यमासीत्। तेन भवत्सन्दर्शनार्थी यात्रां कथमहं निर्वहेयमिति चिन्तयतो मे विलम्ब एतावान् प्रतिपत्रलेखने सञ्जातः तत्राहं भवद्भिः कृपया क्षन्तव्योऽस्मि।

साण्डीरभाषाव्याकरणस्य कञ्चिदादर्शं सम्पादयितुं तत्रत्यानगरीयः कश्चित् सुहृदर्थ्यते। तस्य प्रतिपत्रिकां च प्रतीक्षमाणो वर्ते। अत्र तु तज्जातीयो न कोऽपि ग्रन्थः प्रकाशितोऽस्ति।

भारतानुवर्णनस्य द्वे प्रतिरूपे भवतां प्रणयोपायने अद्य प्रेषयामि। ते भवन्तः स्वीकर्तुं प्रसीदन्तु।

विद्वत्तमैः श्रीलेविमहाशयैः कृपया महायानपुत्रालङ्कारो मह्यं प्रहितः।

तस्य स्वल्पा एव भागाः परिशीलनाय ममावशिष्टाः। ग्रन्थोऽयमपूर्वश्च गम्भीरश्च महार्थसम्भृतश्च विद्वदेकवेद्यमहिमा च।

असकृद् भवतां प्रणयलेखं
लब्धुकामः
त. गणपतिशास्त्री.

To,
Professor Jules Block,
C/o the Post-Master,
Calcutta.

Twelve

श्री

१४-४-१९१३

श्रीमन्तः सकलसदुपमार्हाः विद्वदवतंसाः श्रीनिवाससेट्टलूर्महाशयाः सप्रणामं विज्ञाप्यन्ते।

ह्यो नूतनवर्षारम्भशोभने दिने श्रीमद्भिः वञ्चिमहामात्यश्रीराजगोपालाचार्यमहोदयहस्तद्वारेण प्रतिपादितं राजतं पात्रम् उपपात्रसचिवं आदरात् प्रतिगृहीतवानस्मि। एष मम सत्कारो नाम, नववर्षवर्धापनाभ्युदयो भाविनां श्रेयसां पूर्वरूपम्। इष्टतमस्य गुणवतः सुजनस्य विदुषो विप्रकृष्टदेशवासिनः सकाशाद् अतर्कितोपनतं प्रीतिचिह्नं चेति देशकालादिसम्पद्योगाद् उच्चैः प्रीतिकरो मे सञ्जातः। उपयोगसौकर्यानुकूलशिल्पभङ्गिसुभगं भवन्नामाङ्कहृद्यं तत् पात्रयुग्मं सन्ध्योपासनायां देवतार्चने च विनियुज्यते नित्यम्।

यस्तदनुगामी भवतां कृपालेखः स महामात्यैः स्वहस्ताक्षरप्रमाणितः सबहुमानं मम हस्ते समर्पितः।

गुणलवमपि परकीयं भवद्विधाः लोकोत्तरगुणगणाभरणाः यया कयापि विधयोपयुज्य गुरु कुर्वन्तः स्वभावात् परितुष्यन्ति । परं च तावता स्वोपकारिणम् अपदिशन्तो बहुमन्यन्ते । अतस्तत्र लेखे प्रकाशमानां मद्गुणश्लाघां प्रति न मे काप्यसूया ।

सर्वथा महार्घस्य अविस्मरणीयगुणयोगिनः श्रीमतां परिचयस्य सङ्घटनया मयि कृतोपकारातिशयेषु वञ्चिराज्यकिरीटपतिमहामात्येषु श्रीराजगोपालाचार्यमहाभागेषु कृतज्ञताम् अनपायिनीं वहामि । इह कुशलम् ।

श्रीमतां कुशलमाशंसमानः
त. गणपतिशास्त्री.

To,
S .S. Setlur Esq,

Thirteen

श्री

अनन्तशयनम्
१८-८-१९१४

भो विद्वच्चूडामणयः प्रियमित्रमहाभागाः,

जूनमासप्रहितो भवतां कृपालेखो यथाकालं मम हस्तं प्राप्तः । ग्रन्थप्रकाशनविषयं मत्परिश्रमम् अधिकृत्योपन्यस्तैर्भवतामभिनन्दनवाक्यैर्गर्वित इवास्मि संवृत्तः । भारते भवतः पत्नीसमेतान् अचिरेण संद्रक्ष्यामीति प्रमोदस्योपरि मे प्रमोदः । मन्ये अक्तोबरमासस्यान्ते भवन्तः सिंहलद्वीपं जह्युः । सिंहलद्वीपाच्च प्रस्थितैर्भवद्भिः श्रीरामसेतुरेखानुगामिना पथा पाण्ड्यराजधानी मधुरापुरी प्राप्तव्या भविष्यति । यां संभाव्य पश्चात् तञ्जापुरकाञ्चीपुरादिकं भवन्तः संभावयिष्यन्ति । तत्र मधुरायां भवत्समागमं लब्धव्यमभिलषामि । अतो भवतां मधुरायां सन्निधानं यस्मिन् दिवसे भविष्यति, स दिवसो मह्यं कृपया निवेदनीयं इत्यर्थये ।

इह कुशलम् । तद् भवताम् आशासे महेशानात् ।

भवदीयः

त. गणपतिशास्त्री.

To,
Sylvan Levi Esq,
Professor an college de France
Director d etudes a 'l' Ecole des hantes-etudes
9 Run Guy de-la-Brosse
Paris.

Fourteen

श्री

अनन्तशयनम्
१५-१०-१४

ब्रह्मश्रीयुताः श्रीकृष्णमाचार्याः,

अस्य मासस्याष्टमेऽह्नि विसृष्टं भवल्लेखं प्रत्यैच्छम् । ये पूर्वतरे मासि भवद्भिः प्रहिता भवत्प्रकाशितस्य महाभारतस्य १८–४८ पर्यन्ता अङ्काः सोपोद्घातविषयानुक्रमाः, यश्च लेखो महाभारतविषयमदभिप्रायार्थी, या च पत्रिका अनन्तशयनसंस्कृतग्रन्थावलिदानप्रार्थिनी, त एते सर्वे यथाकालं मम हस्तं प्राप्ता एव ।

किन्तु अदत्तेऽपि मूल्ये महाभारतपुस्तकस्य प्रेषणं प्रति भवतामभि-सन्धिमविजानता भवद्भ्यः प्रतिलेख इयच्चिरं मया न प्रेषितः । पुस्तकं प्रत्यभिप्रायं वक्ष्यतो ममानुवाचनार्थं तत्प्रेषणमिति भवल्लेखात् साम्प्रतिकाद् भवदभिसन्धिरिदानीमवगतः । स यथा तथास्तु ।

भवदीयं महाभारतपुस्तकमिह वर्तमानं बह्वोः कालात् प्रागेव तत इतो मया वाचितम् । दिष्ट्या महाभारतविषयो मुद्रणमहोद्यमः समुद्र

इव दुस्तरोऽपि भवद्भिर्निस्तीर्णः। भवदीयं महाभारतपुस्तकं शुद्धिगुणाद् अक्षरपङ्क्तिविन्याससौष्ठवाद् विशदविषयानुक्रमनिवेशाद् उपोद्घातादियोजनाच्च पिपठिषून् प्रति परमोपकारकारीत्यत्र कः सन्देहोऽस्ति। उक्तैर्गुणैरिदं वः पुस्तकं मुद्रितपूर्वाणि महाभारतपुस्तकान्यतिशेत इति मे मतिः। महतोऽस्य परिश्रमस्य फलमनुरूपं पञ्चमवेदपरमाकूतभूतो देवो वो देयात्।

संस्कृतग्रन्थावलिप्रदानसम्भाव्यनामावलौ विश्वजनीनव्यवसायानां भवतामपि नामधेयं निवेश्यमेव। तत्र राजशासनानुमतिसम्पादनार्थं यतिष्ये यथावसरम्।

भवत्पुस्तकानां बहूनां विक्रयणं प्रति श्रीमन्त एतद्राज्यमहामात्याः प्रार्थनीया इति भवतां मन्ये नाविदितम्।

To,
Brahmasri
T. R. Krishnamacharya,
Proprietor, Madhva vilas Book Depot.
Kumbakonam.

Fifteen

श्री

२-२-१९१५

भो विद्वदवतंसाः प्रियमित्रमहाभागाः,

भवत्क्षेमवार्तां चिरस्य जिज्ञासमानोऽहं दिष्ट्या तन्निवेदकं कमपि लेखं भवदन्तेवासिना श्रीयुतसुब्रह्मण्यार्येण प्रहितम् अलप्सि। षण्मासेभ्यः प्राङ् मत्प्रहितस्य लेखस्य सद्यः प्रत्युत्तरालाभात् तदानीं युद्धवार्ताप्रसरणाच्च मदाशंसितो मधुरापुरे भवत्समागमो विघ्नित एवेति तदैव निरचिनवम्।

अयं भवत्समागमाशाभङ्गो मे दैवकृतो मानसम् अतिमात्रं व्यथयति । असाहस-लभ्यमानपरिमितार्थसन्तृप्यत्प्रजाभूयिष्ठः क्वायं लोकः । क्व चेदं प्रजा-नियामकान्तं युरोपनाथानाम् अतिशयितकुरुपाण्डवसङ्ग्रामम् इतरेतरायोधनम् । एतन्निमित्तं जनसंक्षयं जनसंक्लेशांश्च नानाप्रकारान् शृण्वतो मे हृदयम् आविश्यत इव महतान्धकारेण । अस्यां दशायां आयुष्मतोर्भवत्कुमारयोरपि युद्धरङ्गावतरणं सम्प्रति विज्ञातवानस्मि । अत्र विषये भवतां चित्तवृत्ते-रनतिभिन्नैव मे चित्तवृत्तिः ।

यथा च दीर्घायुषौ भवत्पुत्रौ कृतार्थौ युद्धरङ्गाद् अक्षताङ्गौ प्रत्या-गत्य प्रियं पितरम् अचिराद् आनन्दयेताम्, तथानुग्रहकरणाय मदिष्टदेवताम् अनुदिवसं प्रार्थये ।

भवतां सर्वतः क्षेमं सर्वदा जिज्ञासुः
भवदीयः
त. गणपतिशास्त्री.

To,
Sylvan Levi Esq.

Sixteen

श्री

१६-१-१९

श्रीमत्परमहंसपरिव्राजकाचार्यवर्यपदवाक्यप्रमाणपारावारपारीणयमनियमा-सनप्राणायामप्रत्याहारध्यानधारणासमाध्यष्टाङ्गयोगानुष्ठाननिष्ठतपश्चक्रवर्त्यना-द्यविच्छिन्नगुरुपरम्पराप्राप्तषड्दर्शनप्रतिपादकवैदिकमार्गप्रवर्तकसर्वतन्त्रस्वतन्त्रा-दिराजधानीविद्यानगरमहाराजधानीकर्णाटकसिंहासनप्रतिष्ठापनाचार्यश्रीमद्रा-जाधिराजगुरुभूमण्डलाचार्यऋष्यशृङ्गपुरवराधीश्वरतुङ्गभद्रातीरवासिश्रीमद्विद्या-शङ्करपादपद्माराधकश्रीजगद्गुरुश्रीमत्सच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वा-

मिगुरुकरकमलसंजातश्रीजगद्गुरुश्रृङ्गेरीश्रीचन्द्रशेखरभारतीश्रीमहास्वामिनां चरण कमलयोः साष्टाङ्गप्रणामसहस्रसमर्पणपूर्वा विज्ञापना—

श्रीमहास्वामिकृपया प्रहितान् परमपुरुषार्थसाधनपदीयसः श्रीशारदाप्रसादमन्त्राक्षतान् श्रीव्यासप्रसादाक्षतांश्चाशीर्वादशासनसनाथान् भक्तिपुरःसर स्वीकृत्य सकुटुम्बः कृतार्थोऽभूवम् ।

अत्रत्यमहाजनार्थांश्च तान् प्रसादमन्त्राक्षतान् गायत्रीजपदिवससमिलितायै महाजनसभायै यथासमुदाचारं समार्पिपम् ।

भूयश्चेदृशानामनुग्रहविशेषाणां यथायं जनः पात्रतां प्रतिपद्येत, तथा श्रीमहास्वमिनां कृपा समेधतामिति प्रह्वः प्रार्थये ।

राक्षसश्रावणबहुलषष्ठी } शिष्यपरमाणुः
सोमवारः अनन्तशयनात्. } त. गणपतिशास्त्री.

अनन्तशयनसंस्कृतग्रन्थावल्याः प्रेषितचरान् अङ्कान् अनु एकत्रिंशादीनां द्वाचत्वारिंशपर्यन्तानाम् अङ्कानां एकैकं प्रतिरूपं श्रीमहास्वामिपादानां सदयस्वीकरणानुग्रहायाद्य प्रहिणोमि ।।

Seventeen

श्री

श्रीपद्मनाभः शरणम् ।

अनन्तशयनम्
१७–१०–१९१७

श्रीमन्तः विचक्षणवरेण्याः प्रियसुहृदः,

लब्धौ भवतां कृपालेखौ यथाकालम् । श्रीभर्तृहरेः समाधिस्थानं किमपि भवदुक्तातिरिक्तं शक्यशङ्कं स्यान्न वेति विमृशत । युक्त्याभासोऽपि भवन्मतप्रतिकूलो मया नासादितः । अतस्तत्समाधिस्थानविशेषं स्वीकृतो-

पपत्तियुक्तं ज्ञापयन्तो लोकस्य परमाप्ता भवन्त इति मे मतिः ।

तदिदं भवद्भिरुच्यमानं तस्य तत्र भवतो देहत्यागस्थानं नूनं, नियतवासस्थानं तु काममन्यत् स्यात् तपश्चरणस्थानं वा। अत एव हि केचिद् वर्णयन्ति—क्रैस्थाब्दीयस्य नवमशतकस्य मध्यात् प्रभृति आद्वादशशतकं वङ्गमगधाधिपत्यं भृतवद्भिः पालराजैः चरणाद्रौ निर्मितस्य गिरिप्राकारस्यैकदेशो भर्तृहर्याश्रमत्वेन कीर्त्यत इति ।

पारियात्रमन्तरेण यदभिहितं भवद्भिः तदपि जाने समीचीनमेवेति । तस्य खलु कुलगिरेः पर्वतसमष्टिरूपत्वार्हस्य परितो यात्रया दृश्य इति वा, परितो यात्रायां भव इति वा व्युत्पत्त्या समनुगतार्थनामधेयस्यातिदूरायतत्वमुपपन्नं, तत्प्रसरवीथ्युपश्लेषभाजां च अर्बुदादीनां व्यष्टीनामवान्तराख्यविशेषजुषामपि तस्मिन्नन्तर्भावो वक्तुं युक्तः ।

कार्यान्तरव्यासङ्गवशोपजातमियन्तं ममोत्तरदाने विलम्बं भवन्तः कृपया क्षन्तुमर्हन्ति । विमर्शकुशलाः भवन्त ईदृशानां वस्तूनां समालोचनकर्मणि प्रशंसनीये मम बुद्धिं यन्नियोजन्ति, स एव सर्वथा मां प्रति महान् भवदीय उपकार इति मे निश्चय : ।

विश्वजनीनभवदुद्यमसिद्ध्याशंसुः

त. गणपतिशास्त्री.

Chavali
Yajneswara Somayaji Sarma,
Billakarru,
Via, Kottapet Post
Godavari Dist.

श्री

Twenty

४-११-१९१९

श्रीमन्! श्रेष्ठमित्रमहोदय! विद्वत्तम!

दिष्ट्या चिरपर्युत्सुकोऽहं दूरदीर्घविप्रवासप्रत्यागतमिव प्रियं बन्धुं भवत्कृपालेखमिदानीं आसादितवानस्मि । दिष्टया दुष्टदस्यूपप्लवसंकुलस्यात्मदेशस्य रक्षार्थे युद्धरङ्गं प्रविष्टौ भवत्प्रियपुत्रौ कृतकृत्यौ च कुशलिनौ च; दिष्ट्या युद्धे अन्वौषधशालनिशारक्षिककर्मणि अमेरिकादिदेशदूतव्यापारे च भवदुपात्ताः परिश्रमाः सफलाः शुभावसानाश्च। दिष्ट्या जनसमुदायक्षेमार्थमित्थमायस्यतां प्रान्स्देशजन्मनाम् इङ्गलाण्डदेशभुवां च वीरशूरविद्वन्महोदयानां निरन्तरैरतिमहद्भिः प्रयत्नैर्दमिताः सर्वे निष्कारणनृशंसकर्मप्रवृत्ता जर्मन्यदस्यव : । दिष्ट्येदानीं कृत्स्नस्य लोकस्य पीडाः प्रशान्ताः क्षेमं च प्रत्यापन्नं सर्वेश्वरप्रसादात् । सर्वथाऽनेन सर्वप्रकारकल्याणशंसिना भवत्कृपालेखेन प्रमोदस्य परां कोटिमधिरूढोऽस्मि ।

अहमिह सकुटुम्बः कुशली । पूर्वतरे वर्षे निखिलभारतवर्षीयसंस्कृतसाहित्यसंमेलनमहासभायां पञ्चममधिवेशनं यत् प्रयागे निर्वृत्तं, पिब्रवरिद्वादशत्रयोदशयोर्दिनयोस्तत्र सभापतित्वं विदुषां प्रार्थनयाङ्गीकृत्य प्रयागं गतोऽभूवम् । तद्वशाच्च हरिद्वारपर्यन्तपुण्यतीर्थयात्रां दारसहितः कृतवानस्मि । अथ जून् मासे चक्रवर्तिजन्मर्क्षमहोत्सवे महामहोपाध्यायपदलाभ इमं मे तीर्थयात्राभ्युदयमन्वजायत ।

संस्कृतग्रन्थावलिव्यापार इदानीमपि वर्तते । एकषष्टितमादीन् पञ्चषष्टितमान्तांस्तस्या अङ्कान् भवदङ्गीकारायाद्य प्रेषयामि ।

मञ्जुश्रीमूलतन्त्रस्य मुद्रणम् आरब्धम् । तस्य प्रथमं भागं पञ्चषैर्मासैर्भवत्सकाशं प्रेषयेयमिति मे निश्चयः । भरतनाट्यशास्त्रवृत्तेरभिनवगुप्तीयाया आदर्शान्तरमेकं चिरमृग्यमाणमिदानीं क्वचिदस्तीत्यवगतम् । तत्प्राप्त्युत्तरं सापि मुद्रयितुमारप्स्यते । बुद्धचरितं मद्रास्राजकीयग्रन्थशालाध्यक्षेण मुद्रितमिति तन्मुखादेव श्रुतम्; किन्तु नाद्यापि तद् बहिरवतीर्णम् । शृङ्गारप्रकाशो नामातिविपुलः साहित्यग्रन्थो भोजदेवप्रणीत उपलब्धः, यं विद्याधर एकावल्याख्यालङ्कारग्रन्थकारः प्रमाणयति । नारदस्मृतेर्व्यवहारभागस्य भवस्वामिभाष्यम्, ऋग्वेदस्य स्कन्दस्वामिभाष्यं चोपलब्धमेषु दिवसेषु ।

मत्परिश्रमं प्रत्यभिनन्दनविशेषं विधातुं लण्डनस्थभारतकार्यालयपुस्तकशालाध्यक्षो यत् तत्र भवता प्रचोदितः, तत्राहं कृतज्ञोऽस्मि ।

निर्गुण्डीमधिकृत्य समनन्तरलेखे वर्णयितुमिच्छामि । सदारं तत्र भवन्तं भारते संपश्येयमिति योऽसौ मम मनोरथो वर्षपञ्चकात् प्रागुत्पन्नः इयच्चिरं हृदि प्रसुप्तः स इदानीमनेन भवत्प्रीतिलेखेन प्रबोधितः । सफलश्चायमचिराद् भविष्यतीति मे दृढो विस्रम्भः । 'जीवन् भद्राणि पश्यति' । सकुटुम्बस्य भवतः कुशलवार्तां मुहुर्ज्ञातुमुत्कण्ठितोऽस्मि ।

भवदीयः

त. गणपतिशास्त्री.

To,

Professor Sylvan Levi Esq.

श्री

Twenty

४-११-१९१९

श्रीमन्! श्रेष्ठमित्रमहोदय! विद्वत्तम!

दिष्ट्या चिरपर्युत्सुकोऽहं दूरदीर्घविप्रवासप्रत्यागतमिव प्रियं बन्धुं भवत्कृपालेखमिदानीं आसादितवानस्मि । दिष्टया दुष्टदस्यूपप्लवसंकुल-स्यात्मदेशस्य रक्षार्थे युद्धरङ्गं प्रविष्टौ भवत्प्रियपुत्रौ कृतकृत्यौ च कुश-लिनौ च; दिष्ट्या युद्धे अन्वौषधशालनिशारक्षिककर्मणि अमेरिकादिदेश-दूतव्यापारे च भवदुपात्ताः परिश्रमाः सफलाः शुभावसानाश्च । दिष्ट्या जनसमुदायक्षेमार्थमित्थमायस्यतां प्रान्स्देशजन्मनाम् इङ्गलाण्डदेशभुवां च वीरशूरविद्वन्महोदयानां निरन्तरैरतिमहद्भिः प्रयत्नैर्दमिताः सर्वे निष्कारण-नृशंसकर्मप्रवृत्ता जर्मन्यदस्यव: । दिष्टयेदानीं कृत्स्नस्य लोकस्य पीडाः प्रशान्ताः क्षेमं च प्रत्यापन्नं सर्वेश्वरप्रसादात् । सर्वथाऽनेन सर्वप्रकार-कल्याणशंसिना भवत्कृपालेखेन प्रमोदस्य परां कोटिमधिरूढोऽस्मि ।

अहमिह सकुटुम्बः कुशली । पूर्वतरे वर्षे निखिलभारतवर्षीय-संस्कृतसाहित्यसंमेलनमहासभायां पञ्चममधिवेशनं यत् प्रयागे निर्वृत्तं, पिञ्चवरिद्वादशत्रयोदशयोर्दिनयोस्तत्र सभापतित्वं विदुषां प्रार्थनयाङ्गीकृत्य प्रयागं गतोऽभूवम् । तद्वशाच्च हरिद्वारपर्यन्तपुण्यतीर्थयात्रां दारसहितः कृतवानस्मि । अथ जून् मासे चक्रवर्तिजन्मर्क्षमहोत्सवे महामहोपाध्यायपद-लाभ इमं मे तीर्थयात्राभ्युदयमन्वजायत ।

संस्कृतग्रन्थावलिव्यापार इदानीमपि वर्तते । एकषष्टितमादीन् पञ्च षष्टितमान्तांस्तस्या अङ्कान् भवदङ्गीकारायाद्य प्रेषयामि ।

मञ्जुश्रीमूलतन्त्रस्य मुद्रणम् आरब्धम् । तस्य प्रथमं भागं पञ्चषैर्मासैर्भवत्सकाशं प्रेषयेयमिति मे निश्चयः । भरतनाट्यशास्त्रवृत्तेरभिनवगुप्तीयाया आदर्शान्तरमेकं चिरमृग्यमाणमिदानीं क्वचिदस्तीत्यवगतम् । तत्प्राप्त्युत्तरं सापि मुद्रयितुमारप्स्यते । बुद्धचरितं मद्रास्राजकीयग्रन्थशालाध्यक्षेण मुद्रितमिति तन्मुखादेव श्रुतम्; किन्तु नाद्यापि तद् बहिरवतीर्णम् । शृङ्गारप्रकाशो नामातिविपुलः साहित्यग्रन्थो भोजदेवप्रणीत उपलब्धः, यं विद्याधर एकावल्याख्यालङ्कारग्रन्थकारः प्रमाणयति । नारदस्मृतेर्व्यवहारभागस्य भवस्वामिभाष्यम्, ऋग्वेदस्य स्कन्दस्वामिभाष्यं चोपलब्धमेषु दिवसेषु ।

मत्परिश्रमं प्रत्यभिनन्दनविशेषं विधातुं लण्डनस्थभारतकार्यालयपुस्तकशालाध्यक्षो यत् तत्र भवता प्रचोदितः, तत्राहं कृतज्ञोऽस्मि ।

निर्मुण्डीमधिकृत्य समनन्तरलेखे वर्णयितुमिच्छामि । सदारं तत्र भवन्तं भारते संपश्येयमिति योऽसौ मम मनोरथो वर्षपञ्चकात् प्रागुत्पन्नः इयच्चिरं हृदि प्रसुप्तः स इदानीमनेन भवत्प्रीतिलेखेन प्रबोधितः । सफलश्चायमचिराद् भविष्यतीति मे दृढो विस्रम्भः । 'जीवन् भद्राणि पश्यति' । सकुटुम्बस्य भवतः कुशलवार्तां मुहुर्ज्ञातुमुत्कण्ठितोऽस्मि ।

भवदीयः

त. गणपतिशास्त्री.

To,

Professor Sylvan Levi Esq.

श्री

Twenty one

अनन्तशयनम्
२९-१२-१९१९.

प्रियमहाशयाः,

प्रतीष्टा भवच्चीटी मत्प्रहितपुस्तकपञ्चकप्राप्तिशंसिनी । किन्नामा भवत्पुस्तकालयः ? कुत्र स्थापितः ? तस्य वा भवतामेव वा नामधेयं राजकीयसंस्कृतग्रन्थावलिदानीयनामावलौ निवेशयितुं महामात्यानुमितिं जिघृक्षामि । तदनुकूलं यत्नमनतिचिरादास्थास्ये ।

रा-र-मुं- श्रीजगन्मोहनलालजीमहाशयस्य तु नामधेयं पुस्तकदानीय-नामावलौ (In the free distribution list) पूर्वमेव राजशासनानुमत्या निवेशितम् । तदनुसारेण च उपदापुस्तकानि तेभ्यः प्रेषितानि मया ।। विवृतश्चायमर्थः पुस्तकपूलसध्रीचि मदीये लेखे । स तु लेखो नायात इति श्रीलालजिमहाशयोऽद्यागते तदीये लेखे वक्ति । तत्प्रतिलेखादद्य मया प्रेष्यमाणाद् भवन्तः मनीषिमहाशयाश्च सर्वं जिज्ञासितं ज्ञास्यन्ति । एकवराटिकामूल्यमपि किञ्चिद् वस्तु अप्रार्थितं मादृशः कथङ्कारं दाक्षिण्यौदार्यसागरायापि पुंसे विक्रयबुद्ध्या ग्राहिणुयादिति भवद्भिर्वा मनीषिमहाशयैर्वा चिन्तनीयमासीत् । प्रसीदन्तु भवन्तस्तथा कर्तुं, यथा ते मत्प्रहितपुस्तकपूलदर्शनप्रभवं चाकित्यं बहुदिवसानुवृत्तम् इदानीमपि वा जह्युः ।

त. गणपतिशास्त्री.

To,
Ramakumar Misra Esq,
C/o Munshi Jagamohan Lalji,
Thajmin Sardar,
Ithihasakaryalaya, Alwar City,
Rajputana.

श्री

Twenty two

२२-१-१९२०.

प्रियसुहृदः,

परमार्थसारपुस्तकाधिगमवार्ताचीटी वः प्राप्ता। पुस्तकस्थ '८ तमश्लोके चतुर्थपादे षोडशमात्रा दृश्यन्ते' इति भवद्भिरुक्तम्। वस्तुतः सप्तदशमात्रा दृश्यन्ते। अन्यापि मात्राष्टादशी तत्रापेक्षिता नाम। तस्याश्च सम्पत्तिः अक्षरशोधकप्रमादच्युतेन शृणुपदपूर्वपाठ्येन तुशब्देन भवति। 'तु शृणुत' इति हि लघुचतुष्टयात्मा षष्ठोऽस्मिन्नर्धे गणः। गीतिश्चेयमेकादशपद्यवत्।

६९ तमपुटे २० तमपङ्क्तौ 'स्वकार्यायाः' इति, तत् 'सकार्याया' इत्येव व्यवहितोत्तरपङ्क्ताविव पठनीयम्।

प्रीतोऽस्मि वोऽनयाक्षरप्रमादद्विकसूक्ष्मेक्षिकया।

किन्तु 'विष्फुरत्' 'विष्फुलिङ्ग' इति विपूर्वस्फुरस्फुलधातुविषपे षत्वस्य शास्त्रबोधितयोर्भावाभावपक्षयोः स्थितयोः भावानुष्ठानं धर्महेतुरिति च स्थितौ कुतो नु खलु तद् भवद्भिर्न सोढमिति ज्ञातुमभिलषामः। 'स्फुर स्फुल सञ्चलने' इति हि धातुपाठः। तत्र विशेषेण स्फुलतीत्यर्थे विपूर्वात् स्फुलतेरिङ्गच्प्रत्ययेनौणादिकेन हि विस्फुलिङ्गशब्दः शिष्टप्रयुक्तो निष्पाद्यते। अमूर्धन्यस्तु सोऽन्यथा यथाकामं व्युत्पाद्यताम्।

भवदीयः

त. गणपतिशास्त्री.

To

Ramaswami, Esq,
Pratapgarh, Alwar,
Rajputana.

श्री

Twenty three

२९–९–२१

श्रीमन्तो मान्याः प्रियसुहृदः,

परमोदाभिप्रायभासुरो भवतां कृपालेखो यथाकालं मम हस्तं प्राप्तः। तेनाहमतीव चमत्कृतश्च प्रीतश्च भवामि। निसर्गत एव साधुजनसामान्यं प्रति भवतामादरो निरुपाधिकः प्रसरतीति च तेन मे सञ्जातः प्रत्ययः।

यानि भवल्लेखे निर्दिष्टानि संस्कृतपुस्तकानि—भवदुपोद्घातोपस्कृतः श्रीकृष्णशुभोदयः– भवत्प्रणीता महालक्ष्मीस्तुतिः- श्रीविष्णुदासविज्ञापना– श्रीकृष्णदिदृक्षेत्येतानि, तानि भूयिष्ठमनुवाचितानि मह्यं निकामं स्वदन्ते। तेषामेकैकं प्रतिरूपं ममैवात्मीये ग्रन्थसंग्रहे निवेशितम्। अपरं चास्मद्राजकीयपुस्तकशालाया आभरणीकृतम्।

प्रायेणाद्यत्वे राजकीयाधिकारप्रविष्टाः पुरुषाः न जानेऽवसरालाभाद् वावहेलनाद्वा वैफल्यावधारणाद्वा संस्कृते व्युत्पत्तिं मनामपि नाधिगन्तुमिच्छन्ति, येऽप्यतो व्युत्पन्ना अपि वा कथञ्चित् साहित्यकलायां नाभियोगं भजन्ते। तेष्वमीषु काव्यरचनप्रत्याशायाः कोऽवकाशः। एवं स्थिते भवतामधिष्ठितमन्त्रिपदवीकानां सरसकाव्यनिर्माणनैपुणीमीदृशीमुपलभमानस्य न माति हृदि मे परितोषश्च विस्मयश्च। अपि च भवत्कृतयः सर्वा भगवद्भक्तिरसपरिवाहिन्यश्च वस्तुस्वभावयाथात्म्यशंसनपराश्च सदर्थोपदेशदायिन्यश्च परमोपकाराय पठितॄणां कल्पन्ते। सर्वथा भवन्तः सज्जनसामान्यस्य विशेषेण तु राजकीयाधिकारिणामनुकरणीयगुणा इति मे मतिः। यास्तु एतासां भगिन्य आङ्गलभाषाकृतयः, ताः संस्कृतानभिज्ञोपकाराय मन्ये भवद्भिः प्रणीताः।

दिष्ट्या मे भवद्भिः सहृदयधुरीणैः सह परिचय इदानीं सञ्जातः। सा एव वर्धतां भगवत्कृपयेत्याशासे।

इति भवत्कुशलाशंसुः

त. गणपतिशास्त्री.

To

Dewan Bahadur
V. Anantha Raw Pantulugaru
Sri Alaka Rajeswari Prasad,
Vizianagaram.

श्री

Twentyfour

२०-१०-१९२१.

श्रीमन्! विद्वदुत्तंस! प्रियमित्रमहाभाग!

दिष्टयेदानीं भवते किमपि प्रियमाख्यातुमवसरमहं लब्धवानस्मि। योऽसौ मया नाट्यवेदविवृतेरभिनवभारत्यभिधानाया एकस्तालपत्रादर्शग्रन्थो बहोः कालान्मृग्यते, सोऽयमिदानीं दिष्टयोपलब्धः। ग्रामटिकाकोणगह्वरे क्वचिन्निलीय स्थित एष लोकोत्तरैतद्ग्रन्थदर्शनाभिनिवेशिनो भवत एव स्फटिकस्वच्छान्तःकरणस्य मनोरथेनावितथेन बालदाकृष्य, मन्ये, मम हस्तं प्रापितः। नाट्यवेदस्य तु बहव आदर्शग्रन्थाः प्रागेव सम्पादिता मद्वशे वर्तन्ते। अतो नाट्यवेदेन सहितामिमामभिनवभारतीं त्वरितं मुद्रयितुकामोऽद्य प्रभृति संशोधयामि। पक्षेणैकेन च तस्याः प्रथमसम्पुटपर्याप्तमंशं मुद्रालयं प्रति प्रेषयेयम्। तस्मान्मुद्रितनाट्यवेदविवृतिसन्दर्शनसमयोऽतिप्रत्यासन्न इति।

इदं च प्रियात् प्रियतरमहं समाचारपत्रेभ्यः शृणोमि यद् भवान् कलिकाताविश्वविद्यालयेन स्वीयच्छात्रोपदेशदानाय प्रार्थितो भारतभुवमचिरेण पत्नीसहितो भूषयिष्यतीति । अपि भवता समागमम् अविचारितसङ्घटनपटुर्भगवान् मम सङ्घटयेत् ।

इह कुशलम् । भवतः सकुटुम्बस्य कुशलं जिज्ञासे चाशासे च महेश्वरात् ।

भवदीयः

त. गणपतिशास्त्री.

To,

Professor
Sylvan Levi Esq,
Paris.

DAṆḌIN'S VERSION OF THE STORY OF KĀDAMBARĪ*

Dr. MAN SINGH, M.A., Ph.D.
Assistant Professor of Sanskrit
Centre for Post-graduate Studies,
H. P. University, Simla.

In his Avantisundarī, Daṇḍin has put the narration of the episode of Kādambarī into the mouth of Mandākinī, daughter of Namuci. One night, when Prince Rājavāhana, the hero of the prose Romance, was staying with his companions in the Vindhya forest while on his adventure for world conquest, a Brāhmaṇa called Mātaṅga took him away from his sleeping companions and set out, as advised by lord Śiva,[1] to the nether-worlds. Proceeding through a chasm as instructed in books on bilakalpa, they saw a beautiful city surrounded by a fort made of copper. Mātaṅga bathed in a pool; and requesting the Prince to ward off obstacles, began to offer oblations in the sacred fire, and finally threw himself of into the flames. Soon after, he rose from the fire adorned with a sword in his hand, bracelets in his arms and a crown on his head and seated in a fiery chariot. Then a divine damsel of infinite beauty approached him, casting a loving look at him. She thanked the Prince for his kindness. She took them to her palace and related her story. She was Mandākinī, daughter of Namuci. Once on her way to worship god Viṣṇu, she saw a young man and fell in love with him. He at once plunged into the sea and was transformed

---

* Paper read in the Classical Sanskrit Section, All India Oriental Conference XXVII Session, Kurukshetra, 1974.

into a horse. The God finding her in sorrow said that the young man would certainly become her husband. Mahāśvetā and other Gandharva maidens were her friends. Once Mahāśvetā and her husband paid a visit to her and she cheered her up by telling her the long tale of her life. Then as desired by Mahāśvetā, her husband Puṇḍarīka narrated to her the story of his life and also that of Kādambarī.[2]

हंस इति । प्राथमिकसृष्टौ यद् बिन्दुत्रयं प्रादुरभूत् तत्र बिन्दुः पुमान् विसर्गः प्रकृतिः । ताभ्यां क्रमेण स्वस्य विशिष्टहकारसकारावृत्तिनौ (सोऽयं?)हंस इति अजपानामको मन्त्रः तस्यैव वैपरीत्यकथने सोऽहमिति परमात्ममन्त्रश्च परमात्मनि योगे तु परा प्रासादमन्त्र इत्यादि शारदायां चरमपटलेऽन्यत्र च वक्तव्यं । तदिदं परस्पराभिन्नमन्त्र इत्यादि । उच्छ्वासनिःश्वासरूपम् । 'उच्छ्वास एव निःश्वासो हंस इत्यक्षरद्वयम्' इति वचनात् । स च मन्त्रः सर्वैः प्राणिभिरहोरात्रसम्मिते काले षट्शताधिकैकविंशतिसहस्रमावृत्यते । सोऽयमनायासेन जप(त)स्त(था?दा)त्वे तज्ज्ञानमात्रान्मोक्षप्रदत्वात् सर्वमन्त्रोत्तमः । तदुक्तम्-

हंसःपदं परेशानि! प्रत्यहं जपते नरः ।
मोहान्धो यो न जानाति मोक्षस्तस्मान्न विद्यते ।।

श्रीगुरोः कृपया देवि ज्ञायते जप्यते ततः ।
तस्योच्छ्वासैश्च निःश्वासैस्तथा बन्धक्षयो भवेत् ।। इति,

अजपा नाम गायत्री योगिनां मोक्षदायिनी ।
तस्याः सङ्कल्पमात्रेण नरः पापैः प्रमुच्यते ।।

अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं पुण्यं न भूतं न भविष्यति ।।

इति च । तदुपासनेतिकर्तव्यता शारदायां चतुर्दशपटलेऽन्यत्र विस्तृतेति नेहोच्यते । गुरुदेवतामन्त्राणां चैक्यात् ते सर्वे श्वासा नामरूपा एव ।

अक्षरार्थस्तु—हंस इत्यजपामन्त्रादिरूपश्वाससमूहाभिन्ना या गायत्री सर्वप्राणिष्वविच्छिन्ना वर्तते तदभिन्नः सन् वासनात्मकरूपेण यः प्रादुर्भूतः तं गुरुं नौमि । स एव च गुरुः सतां मार्गं मुक्तिपुरीगमनोपायः । 'गुरुरुपायः' इति शिवसूत्रात् । आनन्दमत्तो मयूरः पिञ्छावयवान् प्रसार्य नृत्यकाले यथा विचित्ररूपो दृश्यते न तथा कालान्तरे । अतस्तस्य तद्रूपमाच्छन्नम् । एवं गुरोरपि वक्ष्यमाणविचित्ररूपमाच्छन्नमस्ति । गौण्या मत्तमयूरपदेन गुरुः स्तूयते । अस्मिन् स्तोत्रे दशापि श्लोका मत्तमयूराभिधवृत्तरूपाः । तल्लक्षणं चोक्तं पिङ्गलमुनिना— 'मत्तमयूरा मात् तो य्सौ गः समुद्रनवकौ' इति । मतयसगणा गुरुश्च प्रतिपदं चतुर्भिर्नवभिश्च यतिरिति तदर्थः । प्रकृते युक्तैरेव पदैः सूच्यार्थकथनादिह मुद्रालङ्कारः । तल्लक्षणं चन्द्रालोके— 'सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः । नितम्बगुर्वी तरुणी दृग्युग्मविपुला च सा' इति । सङ्केतरीत्या तूक्तश्वाससंख्याया अपि पदद्वयेन सूचनात् समोबालङ्कारः । तत्प्रकारस्तु 'कटपयवर्गभवैरिह पिण्डान्त्यैरक्षरैरङ्काः । न शून्यं ज्ञेयं । तथा स्पर्शे केवले कथिते' इति श्लोकोक्तरीत्या मकारः पञ्चमसङ्ख्यासङ्केतकः । षष्ठाङ्के यकाररेफगकाराः एकद्वित्र्यङ्केषु सङ्केतिताः । तथा अङ्कानां वामतो लेखे सति मत्तमयूरपदेन एकविंशतिसहस्राणि पञ्चशतानि पञ्चषष्टिश्च कथितानि भवन्ति । (२१५६५) । सन्मार्गोऽपि यस्मिन्निति व्युत्पत्त्या मार्गशब्दोक्तपञ्चत्रिंशतिसंख्याया अस्यां मेलनेन षट्शताधिकैकविंशतिसहस्रसंख्यानिष्पत्तिरिति । एवमग्रेऽपि सङ्केता अवगन्तव्याः ॥१॥

उद्यद्भास्वन्मण्डलकालादिनमित्या—
विद्यारूपः प्राप वडर्यो नरभावम् ।
यस्तीर्थात्मा मण्डलपूर्णाक्षरवर्मा
तं सन्मार्गं मत्तमयूरं गुरुमीडे ॥२॥

तन्त्रराजेऽपि सप्तविंशपटले श्वासानां वासनाद्वयमुक्तं—'संख्यानां वासनाव्याप्तं श्वासानां शृणु सुन्दरि । यया विदितया मन्त्री सदा भजनवान् भवेत् ॥' इत्यादिना । तयोः प्रथमां वासनां चतुर्भिः श्लोकैः प्रदर्शयति उद्यदित्यादिभिः । सूर्यमण्डलोदयमारभ्य प्रथमतः श्वासा एकैकदिननित्याविद्यारूपाः । अ आ इ ई इत्यारभ्य क्षः क्षा इत्यन्ता मन्त्राः षट्त्रिंशदधिकसप्तशतोत्तरविंशतिसहस्रसंख्याकास्तन्त्रे प्रसिद्धाः । एते स्त्रीदैवत्यतया विद्या इत्युच्यन्ते । 'स्त्रीदैवत्या स्मृता विद्या पुंदैवत्यास्तु मन्त्रकाः' इति कोशात् । गुरुनाथस्तु तावद्रूपः सन् एवं नरभावं मनुष्यत्वं भक्तानुग्रहाय प्राप्तवान् । स च षडर्थी षण्णामर्थानां समाहारस्वरूप इति च विद्याया अर्थः योगिनीहृदयव्याख्यायामस्माभिः प्रपञ्चिता । षडर्थनरशब्देन (२०७३६) दिननित्याविद्यानां संख्या चोक्ता । एवमुत्तरत्र सर्वत्रापि संख्या सङ्केताक्षरपदानां श्रीगुरोः श्लेषेण ध्वन्यर्थतयावसेया । तत्परतः षट्सप्तत्युत्तरपञ्चशतश्वासाः पूर्णमण्डलाक्षररूपाः । अकार एकः ककारादिक्षकरान्ताः पञ्चत्रिंशद् व्यञ्जनानि चेत्येवं षट्त्रिंशदक्षरणां प्रत्येकमकारादिषोडशस्वरसंयोगे संयुक्तसंख्यान्यक्षराणि भवन्ति । तानि पूर्णमण्डलपदेन दिनार्णपदेन च तन्त्रे व्यवह्रियन्ते । तदभिन्नं वर्ष्म शरीरं यस्य सः तीर्थात्मा गुरुरूप एव । 'तीर्थमृषिजुष्टे जले गुरौ' इत्यमरः । तीर्थात्मपदं (५७६) चोक्तसंख्यां वक्ति ॥२॥

तत्पश्चात्यप्राणसमूहैर्नवनाथा
यः षट्त्रिंशत्तत्त्वमयैः षोडशनित्याः ।
एवंरीत्योपासितसन्ध्यात्रयमूर्ति —
स्तं सन्मार्गं मत्तमयूरं गुरुमीडे ॥३॥

पूर्णमण्डलात्परे नव श्वासाः प्रकाशादिसुभगान्तं नाथनवकरूपाः । ततः शिवादिक्षित्यन्तास्तत्त्वरूपाः षट्त्रिंशत् । तदुत्तरं त्रिपुरसुन्दरीकामेश्वर्यादिपरे चित्रान्तरूपास्तु षोडश । एतदेव क्रमेण सन्ध्यात्रयमुपास्यते । तेन तद्वासनारूपो गुरुरेवेत्यर्थः ॥३॥

श्वासैः षष्ट्या षष्टिर्घुटिदैवतरूपो
मेषप्रष्ठद्वादशराशिप्रतिमानः ।
अर्काद्यात्मा यो नवसंख्याग्रहमूर्ति-
स्तं सन्मार्गं मत्तमयूरं गुरुमीडे ॥४॥

विसर्गरहितानां पञ्चाशन्मात्राणां दशदशाक्षरैरेको वर्ग इत्येवं पञ्च-वर्गा अकचतयनामानः । तेषु प्रथमवर्गस्यादावन्ते च जपे सति षष्टिवर्णा अहोरात्रस्य घुटिकारूपा भवन्ति इति तन्त्रे स्पष्टम् । नित्याश्वासानन्तरं षष्टिश्वासास्तद्देवतात्मानः । ततो द्वादश मेषादिराशिरूपाः । प्रष्ठशब्दः अग्रेसरवाची सन् प्रभृतिपरः । 'प्रष्ठोऽग्रगामिनि' (पा-सू-८–३–९२) इति निपातनात् । तदुत्तरं नव श्वासा अर्कादिनवग्रहरूपाः । तत्स्वरूपो गुरुरि-त्यर्थः ॥४॥

पञ्चात्मा यो भूतनिकायो गतमायो
यः पञ्चाशद्वर्णवपु(श्चित्र ?श्चक्र)गताभिः ।
शक्त्यालीभिः सङ्गतिमानेकनवत्या
तं सन्मार्गं मत्तमयूरं गुरुमीडे ॥५॥

ग्रहात्मकश्वासानन्तरं पञ्च श्वासाः आकाशादिपञ्चभूतरूपाः । तदुत्तरं पञ्चाशच्छ्वासाः मातृकारूपाः, तासामेकपञ्चाशतो मध्ये विसर्गस्वरत्यागात् । तदेतच्छ्लेषेणाह- गतमाय इति । मायाशब्दः विसर्गस्वरवाचकत्वात् तद्रहितं इत्यर्थः । तदनन्तरमेकनवतिः श्वासा (श्चित्र? श्चक्र) स्थिताः आवरणशक्ति-समूहरूपाः तासामेकनवतित्वं मूले । एवं नवमश्लोके विशदीकरिष्यति । ततश्च पूर्वोक्तसंख्यानामेकीकरणे श्वाससंख्यापूर्तिः सम्पद्यते । तदुक्तं तन्त्रराजे-

नित्यातत्त्वाप्तविद्यानां संख्याः स्युः पूर्वमेकशः ।
ततो दिनार्णसन्ध्याश्च ततश्च घुटिकार्णकाः ॥

राशयो द्वादश तथा ग्रहा भूतानि पञ्च च ।
मातृकाश्चापि पञ्चाशत् श्रीचक्रस्थाश्च शक्तयः ॥

सैका नवतयः प्रोक्ता देवी सर्वात्मना स्थिता ।

इति । नित्याः षोडश स्वराः तत्त्वाक्षराणि पूर्वोक्तानि तेषामाप्तिः परस्परसंयोगविशेषरूपः प्रस्तारः तत्संबन्धिनीनां दिननित्याविद्यानामित्यर्थः । शिष्टः स्पष्टः ॥५॥

यद्वा पञ्चाशल्लिपिपीठैकरदाना-
मावृत्त्या सद्यः फलवान् देशिकवर्यः ।
ज्ञानोत्तुङ्गो डरलकसहषट्कविवर्ते-
स्तं सन्मार्गं मत्तमयूरं गुरुमीडे ॥६॥

एतावता बन्धेन श्वासानामवयवशो विभागेन वासना उपदिश्येदानीं सम्पूर्णस्य श्वाससमूहस्यैकैका वासना उपदिशति । उक्तायां वक्ष्यमाणानां च वासनानामन्यतमानुसन्धाने विकल्प्य द्योतनार्थो वाकारः । इमाश्च वासना मूलेऽनुक्ता अपि पूज्यपादमुखादवगताः इति तु मनोरमाकारः[*] ।

आद्यषोडशनित्यानां कालेन प्राणतोच्यते ।
मातृकाभूतनाथाद्यैः श्रीचक्रेण च शक्तिभिः ।

इति पटलादारभ्य प्रतिज्ञाश्लोके सूचिता इति तु निधिकारः । कालेन प्राणता श्वासात्मककालभेदाः । अत्राद्यपदेन ग्रहतत्त्वनित्या घुटिकाराशयो गृह्यन्ते । श्रीचक्रशब्देन तदन्तर्गतत्रैलोक्यमोहनादिनवचक्राणि । शक्तिशब्देन श्रीचक्रस्थाः षण्णवतिशक्तय इति व्याचष्टे ।

---

* सुभगानन्दकृता तन्त्रराजव्याख्या मनोरमा ।

वस्तुतस्तु मातृकापदेन गणेशग्रहनक्षत्रयोगिनीराशिपीठानां लघुषोढान्यास–देवतारूपाणां ग्रहणात् तैःसह मातृकाऽभेदस्य तन्त्रराजे एव 'गणेशग्रहनक्षत्रे' त्यादिद्वादशश्लोकीस्तवेन कथनात् "गुरुदेव्योस्तैः सहाभेदस्य योगिनीहृदये कौलिकार्थप्रकरणे वर्णनाच्च । 'नित्याहृदयसम्प्रोक्तस्फुटोपायेन भावयेद्' इति वचनेन योगिनीहृदयोक्तभावनासापेक्षितायाः स्वतन्त्रे स्वीकारात् । तस्मादाद्यपदेन नित्यातत्त्वादेरेव ग्रहणम् । (विषयः?) अकाराद्या वर्णाः, पीठाः कामरूपादयः, एकरदा विघ्नेश्वरादयो गणेशाः, एते त्रयोऽपि गतमायाः सन्तः पञ्चाशदेव । श्वाससंख्यापिण्डस्य पञ्चाशता विभागे द्वात्रिंशदुत्तरचतुःशती लब्धा । तेन तावद्वारमावृत्ता लिप्यादय एव श्वासा इति वासनात्रयम् । आवृत्तिश्च दण्डकलितन्यायेग स्वस्थानविवृद्धाविति तु गुरुमुखादेव विनिर्णेयम् । पदेन लब्धा संख्योक्तिः । डाकिन्यादियोगिनी–षट्कात्मकतया श्वासवासनामाह–ज्ञानेति । ज्ञाकारनकारौ तकारगकारौ षट्त्रिंशत् परे । तेन त्रीणि षट्शतानीत्यर्थः (३६००) । षड्भिः श्वास–संख्याविभागे तावत एव लाभात् । डरलकसहेत्यनेन नामैकदेशे नाम–ग्रहणमित्यनेन न्यायेन डाकिन्यादय उच्यन्ते । याकिन्या सह सप्तसंख्या तु न शङ्कनीया "शक्तिः षड्भिरथोत्तरैः" इत्यादिना योगिनीहृदये षण्णमेव ग्रहणात् । याकिन्याः षट्समष्टिरूपेण व्यष्टितो भेदाभावात् । "सप्तानां ग्रहण" मित्यमृतानन्दव्याख्या तु सेतुबन्ध एवास्माभिर्निरस्ता । यत्तु योगिनीपदस्य वशिन्याद्यष्टकपरत्वेन कास्वराणां व्याख्यानं तत्पक्षेऽपि न दोषः अष्टभिः श्वासानां विभागे सप्तशतोत्तरसहस्रद्वयस्य लाभेन श्वाससंख्या (नि?नां) निःशेषत्वसम्भवात् ॥

अत्र वृत्ते पञ्चमाष्टमाक्षरयोर्गुरुत्वस्यावश्यकत्वेऽपि त्रयोः स्थाने 'द्विद्विलघुनिवेशो कास' इति सूत्रेण लद्वयस्य गुरुकार्यकारित्वविधानबलात्

∵ भास्कररायकृतयोगिनीहृदयाख्या सेतुबन्धः ।

स्वीकृतः। तत्सूत्रस्य मात्राच्छन्दोविषयकत्वेऽपि वर्णच्छन्दस्यपि कतिपयवृत्तेषु तदङ्गीकारो ज्ञापकसिद्ध इति छन्दोभाष्यराजादौ प्रपञ्चितमस्माभिः। प्रयोगोऽपि—"वन्दे रामं मरतकवर्णं मुनिवन्द्यम्" इत्यादि ॥६॥

नेत्रोद्गाढो शशिकरभूतसमूहै-
रेनोहारी यो नवनाथग्रहचक्रैः।
नक्षत्रस्यावृत्तिभिरानन्दशरीर-
स्तं सन्मार्गं मत्तमयूरं गुरुमीडे ॥७॥

नेत्रांशे उद्गाढोऽतिदृढः इत्यनेन दूरदर्शित्वादिकं गुरोरुक्तम्। पञ्च-भूतसंख्यया श्वासविभागे सति चत्वारि सहस्राणि त्रीणि शतानि विंश-तिश्च लभ्यन्ते (४३२०) इति तावद्वारमावृत्ताः श्वासा गुरुरूपा एवेत्यर्थः। नाथादिनवकरूपवासनात्रयमाह-एनोहारीति। पापहा महागुरुः चतुःशता-धिकसहस्रद्वयं (२४००) वारावृत्त्या (दि?) (नव)नाथादिरूप इत्यर्थः। अष्टशतावृत्त्या गुरुर्नक्षत्ररूपोऽभूदित्याह—नक्षत्रस्येति। जातावेकवचनम्। आनन्दशब्देनोक्ता ८०० संख्या प्रदर्शिता।

नित्यावृत्तावीशलयः सन्नचलोऽभू-
न्माद्या वृत्ताराशिषु नानाजपरूपः।
अभ्यस्यद्भिस्तत्त्वगणैरुन्नतमूर्ति-
स्तं सन्मार्गं मत्तमयूरं गुरुमीडे ॥८॥

नित्येति। षोडशनित्याभिः श्वासानां विभागे सहस्रोत्तरसार्धत्रिशती (१३५०)लभ्या। ईशे परेशे (लयो) यस्य स गुरुः 'तत्संख्यातनित्या-वृत्तिरूपः दशध्यानसमो लय' इति लक्षितः समाधिविशेषो लय इत्युच्यते। षष्टिनाडीदेवतासंख्यया विभागे त्वचलो भवेत्। षष्ट्युत्तरशतत्रयसंख्यो जातः (३६०)। राशिष्वावर्तमानेषु नानाजपात्मा १८०० अष्टशता-धिकसहस्ररूपः। षट्त्रिंशत्तत्त्वगणाभ्यासेनोन्नतस्वरूपः (६००) षट्शतसंख्य इत्यर्थः ॥८॥

धृत्युर्वी(ष्टे?)न्द्रविगाशाहियुगवि–
प्रोक्ताभिः पुंहेतिभिरम्बाभिरभिन्नः ।
आवृत्यैवं षण्णवतेर्यः ⁘शिखरात्मा
तं सन्मार्गं मत्तमयूरं गुरुमीडे ॥९॥

चक्रस्य शक्तिसमूहात्मकवासनामाह–धृ(ते?)तीति । धृतयोऽष्टादश–देवतापुरःस्था अणिमादय दश । ब्राह्म्याद्यष्टौ । कादिमते तृतीयरेखाया अकथनेन तत्रत्यमुद्रादेवतादशकस्याभावात् । उर्वीशाः षोडश कामाकर्षिण्याद्याः षोडशदलपद्मस्थाः । अष्टावनङ्गकुसुमादयोऽष्टदलपद्मस्थाः । इन्द्राश्चतुर्दशसर्वसंक्षोभिणीमुद्रादयो मन्वस्रगताः । दिशो दश बहिर्दशारे सर्वसिद्धिप्रदादयः । आशा अपि दशान्तर्दशारे सर्वज्ञाद्याः । अहयो वशिन्याद्या अष्टकोणस्थाः । [त्रिकोणस्थाः] कामेश्वर्यादिदेवताः । एताः सं[हृ?ह]त्यैकनवति⁘संख्यावत्त्वे[न]पञ्चमश्लोके प्रोक्ताः । तावतीनामेव ग्रहणे श्वाससंख्याया एकनवत्या विभागो निःशेषतया असम्भभात् विभजनाङ्के पञ्चानां मेलनेन षण्णवतित्वमापादयितुमाह–पुंहेतिभिरिति । कामेश्वर्यायुधदेवताभिश्चतसृभिरित्यर्थः । इमाः पञ्चनवतिरम्बाबिम्बस्थाः प्रधाना अम्बिकेत्येकशेषाभिप्रायेणाम्बाभिरित्युक्तम् । एवं प्रकारेण षण्णवतेर्देवतानामावृत्या शिखरात्मा सर्वोत्तमस्वरूपो गुरुः सपाद[दश?शत]द्वयावृत्तिमानासीदित्यर्थः ।

ननु 'चक्रेण शक्तिभि' रित्यत्र शक्तिसामान्यवाचकस्यापि पदस्यास्यै[का नवतयः?कनवतिः]प्रोक्ताः । 'श्रीचक्रस्थाश्च शक्तयः' इत्यनेनोपसंहारादेकनवतिदेवताः सिध्यन्तीति न पुंहेत्यादिग्रहणे मानं पश्यामः । न च

⁘ पाशाङ्कुशचापबाणाः ।

तथा संख्यायाः श्वाससंख्याविभागे निरवशेषत्वासंभवादेव पञ्चानामेकानां योग इति वाच्यम् । तस्याः कतिपयन्यूनताधिकत्वेनापि सम्भवात् । धृत्यादिनवसंख्याभिः प्रत्येकं विभजनेऽपि तत्सम्भवाद्वा । इन्द्रसंख्याया विभागे द्वादशानामवा[श्ये? श्यकत्वेऽ]पि तेषां राशिवासनाकल्पनासम्भवात् । न चैवं वासनासाङ्कर्ये यथावस्थितैकनवतिभागाः शेषस्यापि वासरकल्पनयैवोपात्ता प्रतिचक्रदेवतासंख्यानां प्रातिस्विकं विभाजकत्व [मत्विना? मपि] न स्यादिति वाच्यम् । एकनवत्या विभागे त्रयस्त्रिशतो विशेषेण तस्योक्तमातृकादिभिन्नत्वेन स्वेच्छया देवतान्तरकल्पनाया अव्यवस्थापत्तेरिति चेत् मैवम् । इह सम्प्रदायस्यैव शरणत्वात् । अत एव मनोरमायां 'शक्तिभि'रितिपदम् एकनवतिषण्णवतिपरत्वेन द्वेधा व्याख्याय एकत्र वचनम् अन्यत्र गुरुमुखागम एवोत्तरग्रन्थे प्रमाणमुपन्यस्तम् । इदं तु सुवचनम्—'श्रीचक्रेण चे' ति [चक्र? तन्त्र-]राजे नवचक्रसंख्यासमेतैकनवतिसमुच्चयरूपायां (श? श्वास)संख्याया निरवशेषो भागो विधीयत इति ।

न चैकनवत्या विभाजकत्वायोगात् तदाधारचक्रनवकमेलनस्य न्यायसिद्धत्वेन मन्वस्रेऽपि तथा रचनाक्रमात् तस्य मेलनेन तावन्मात्रांशे पञ्च [दश? शत]संख्याया विभाजकत्वकल्पनेन निरव(वि?)शेषताऽसम्भवात् धृत्यादिभिः पार्थक्येनैव चक्रस्य त[न्त्र? त्र]मेलने[न?]उपपत्त्यभावेन नवचक्रसंख्यामेलनस्य वाचकत्वाङ्गीकारेणैव निर्वाहादिति दिक् ॥९॥

इत्यग्रथनाद् भास्कररायो नवरत्नै-
मालामग्र्यां नाथरहस्यं गमयन्तीम् ।
येषामेका कण्ठगता ते जगदम्बा
विद्याभ्यासादत्र जनुष्येव महेशाः॥१०॥

कृतस्य नाथनवरत्नमालिकानाम्नः स्तवस्योपसंहारपूर्वकं तदर्थानुसन्धानपूर्वकं, पाठपराणां गुरुभक्तानां श्रीविद्योपासकानां सद्यः परशिव–भावप्राप्तिः फलतीत्याह–इतीति । मालास्तोत्रयो रूपकानुगुण्याय प्रबन्ध-रचनमालारचनोभयवाची ग्रथिधातुः प्रयुक्तः । नाथरहस्यं तद्रूपम् । अत्र जनुष्येव अस्मिन्नेव जन्मनि । महेशाः परमशिवरूपाः उक्तं तन्त्रराजे—

'एवंविधां वासनां यो भावयेत् स महेश्वरः'

इति सर्वं शिवम् ।।

इति श्रीमन्नाथनवरत्नमालाभिधस्तुतेः
मञ्जूषा भासुरानन्दनाथेनाकारि गुप्तये ।।

कैलासवर्णनप्रबन्धः

नारायणभट्टकृतः

अथ विमतजनविलासिनीनयनवारिनिर्झरप्रवर्धनकलाकौशलधुरीणदोर्दण्डचण्डिमा स पाण्डवसूनुः आरादेव दूरतरविसारिणीभिर्नारायणभुजबललोड्य(वीम?मान) मन्दरमहीधरान्दोलितकलशाम्बुराशिकल्लोलमालापरस्परोन्मर्दनिष्पन्न(र?न्)फेनकूटपाण्डित्यपाटच्चरद्युतिभिः उत्तालताण्डवाडम्बरप्रसृमरप्रमोदत्रिपुरहरवदनसरसिजोदित्व(रम?रा)ट्टहासद्युतिनिवहसचरिणीभिः, अविरतसन्निहितपशुपतिमकुटशशाङ्कलेखासौहृदय्यसमापतितसकललोककैरवाकरकान्तिकदम्बकविडम्बिनीभिः प्रभामण्डलीभिः अपिहितापरवर्णाधिकरणधावल्याद्वैतविद्यासिद्धान्तमध्यापयन्तमाशाविभागान्, अन्तरिक्षपरिमाणजिघृक्षयेव स्वीकृतनिरतिशयौन्नत्यपरिणाहैः अतिवेलनैर्मल्ययोगादविभाव्यमानरूपैः स्वेच्छानुरूपसञ्चाररसिकदिविजविमानसरभससंघट्टसाध्वस(ा?)ध्वस्त(मान)मानिनीस्वयंग्रहसुखायमानवैमानिकाभिनन्द्यमानैः अपेनसंख्यैः शिखरैः उल्लिखितोर्ध्वाण्डकटाहम्, अमरनगरतरङ्गिणीतुङ्गतरङ्गभङ्गशीकरभारिबालसमीरणसञ्चरणसुभगलताभवनविहरण(मना?)सु(?)चारणकिन्नरसीमन्तिनीवदनसरसिजनिर्गच्छदच्छिन्न [भवदवदात]गर्भनिर्भरमनोहरसंगीताकर्णनसमुत्सुकस्तिमितोत्कर्णकुरङ्गयूथम्, अमृतकरकरावमर्शद्रुतशशिकान्तमणिनिष्यन्दझरीसहस्रोपकण्ठप्ररूढैः इतरेतराश्लेषनिबिडविटपदुर्वहफलकुसुमकलिकाकिसलयगुलुच्छच्छदभरावनम्रैः पादपैः उपशोभितोपान्तदेशम्, अभ्यर्णविक्रीडदमरेश्वरौपवाह्यसाधर्म्यदुर्वहैः स्फटिकमणिगण्डशैलैरुपरुद्धैकभागम्, क्वचिद् अतिचिरारब्धतपोयो-

---

Mss. used Nos. 20663 E and T. T. 545 and 'Prabandharatnamalika,' S. R. P. Press Kayamkulam M. E. 1083.

गविगलितमहामोहमहिमोज्ज्वलहृदयपुण्डरीकमध्यप्रतिष्ठापितपरमशिवस्वरूपैः अशेषकलुषराशिचूर्णीकरणनिपुणरुद्राक्षवलयविलसितप्रकोष्ठैः पञ्चाङ्गपरिस्फुरितभसितत्रिपुण्ड्राभरणैः शतरुद्रीयमध्यसुप्रतिष्ठितपरमरहस्यमन्त्रोद्धजपैकतानमानसैः तापसैः उद्भासमानम्, क्वचिच्च स्मरान्तकपदाम्बुजसेवामहोत्सवकूतूहलिभिः अनेकलोकान्तरापतितैः असमानवेषभाषाकारपरिचितैः अत्यन्तभक्तिभरनम्रकन्धरैः अवसरमभिलषद्भिः उद्भिन्नपुलकनिचुलिताकृतिभिः उत्तमाङ्गनिवेशितकरकमलकोरकैः त्रिपुरदहनमदनसंहननभासितकारिवारणासुरदण्डधरदम्भखण्डनप्रति (घान्ति? बन्धी) भवदन्तकवधकालकूटकबलनप्रमुखप्रवरचित्रचरित्रस्तोत्रवाचालितदिशाकूलैः महाजनैः महनीयमानम्, अपरत्र च तपोवनप्रियतमा नैसर्गिकमपि विरोधं दूरिकुर्वाणैः अस्खलितसौहार्दसारसमाहितहृदयैः, अचलवृत्तिभिः नानामृगैः परिवृतम्, निखिलभुवनकोशसुचरितपरिपाकमिव (संभूयन्तं? सम्भूतं,) आनन्दस्याप्यानन्दपारतन्त्र्यसंदापिनम्, उच्चाटनौषधमिव समस्तदुश्चरितानां, सहायमिव गुणगणस्य, अरातिमिव दुराचाराणां, अवतारमिव सुचरितानां सवितारमिव साधुजनमानससरसीरुहाणाम्, आत्मानमिव अधःकृताशेषमहीभृ (तं? तां), रघुपतिमिव खरविरोधिनं, सरसिजसम्भवमिव सत्यावासम्, अभिमन्युमिव सुभद्रोद्भूतिं, भृगुपतिमिव अर्जुनकुलवर्धनोल्ललितं, हरिमिवानन्तभोगसुखोपविष्टं, हरमिव सर्वमङ्गलोल्लसितं, अपरिगणितकन्दरोपेतमप्येकगुहाधिष्ठानं, सर्वप्रियमप्यत्यन्तमहितम्, अवाङ्मनसगोचरम्, अनवरतवात्सल्यमात्रगृहीतविग्रहेण यथाजातावग्रहेण परिकल्पितशिरोलङ्कारं कैलासशैलमालोकयामास ॥

कृत्यरत्नावली

(contd from vol. XXI - part I)

न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात् ।
तत्र निश्यपि तत्कुर्याद् वर्जयित्वा महानिशाम् ॥

इति वचनात् । अत्यशक्तेन तु जागरान्ते प्रातरेव पारणं कार्यम्— "तिथ्यन्ते वोत्सवान्ते वा व्रती कुर्वीत पारणम्" इति कालादर्शोदाहृत-वचनात् ।

अथ संक्षेपतो व्रतानुष्ठानप्रकारः —

प्रातः कृतनित्यक्रियः सूर्यादिदेवताभ्यो व्रतं निवेद्याचम्य प्राणानायम्योदङ्मुखो वारिपूर्णं ताम्रपात्रं गृहीत्वा मासाद्युल्लिख्यामुकफलकामः पापक्षयकामो वा जन्माष्टमीव्रतमहं करिष्ये इति । तथा,

वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥

[a] अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥

एनसो मोक्षकामोऽस्मि यद् गोविन्द! त्रियोनिजम् ।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे ॥

आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत्प्रणाशय गोविन्द! प्रसीद पुरुषोत्तम! ॥

इति पठित्वा जलमुत्सृजेत् । ततो मध्याह्ने तिलैः स्नात्वा अर्धरात्रे

---

a. Portion from "अद्य कृष्णाष्टमीं" to "जानुभ्यां सरणीं गत्वा चन्द्रायार्घ्यं निवेदयेत् (Page 64) is omitted in Ms. ब

पूर्ववद् "अद्य[1] सपरिवारश्रीकृष्णपूजां करिष्ये" इति संकल्प्य समीपप्रसुप्तस्तनपायि-श्रीकृष्णप्रतिमोपेतां लक्ष्म्या देवक्याश्चरणौ संवाहयन्त्या चोपेतां देवकी-प्रतिमां प्रसुप्तां मञ्चकोपरि स्थापयेत्। प्रतिमापूजनं च प्राणप्रतिष्ठा-पूर्वकं कर्तव्यम् ।

प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
प्राणप्रतिष्ठां कुर्वीत तस्यां देवस्य वा हरेः ॥

अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च ।
यथा पूर्वं तथा भावः स्वर्णादीनां न देवता ॥

अन्येषामपि देवानां प्रतिमास्वपि पार्थिव ! ।
प्राणप्रतिष्ठा कर्तव्या तस्यां देवत्वसिद्धये ॥

वासुदेवस्य बीजेन तद्विष्णोरित्यनेन च ।
तथैव हृदयेऽङ्गुष्ठं दत्त्वा शंखं च मंत्रवित् ॥

एभिर्मन्त्रैः प्रतिष्ठां तु हृदयेऽपि समाचरेत् ।
अस्मै प्राणाः प्रतिष्ठन्तु अस्मै प्राणाः क्षरन्तु च ।

अस्मै देवत्वसंख्यायै स्वाहेति[2] यजुरीरयन् ।
अंगमन्त्रैरंगिमन्त्रैर्वैदिकैरित्यनेन च ॥
प्राणप्रतिष्ठां सर्वत्र प्रतिमासु समाचरेत् ।

इति कालिकापुराणात् । बीजेन मूलमन्त्रेण । इदं च प्रकृतविष्ण्वभिप्रायेण[3] । यदा स्वहृदये पूजा क्रियते तदा हृदयेऽङ्गुष्ठं दत्त्वा मन्त्राः पठनीयाः । तेन अत्रापि प्रतिप्रतिमं कपोलौ स्पृष्ट्वा तत्तद्देवतानां मूलमन्त्रान् वैदिक-

1. रस्य श्रीकृष्णाख्य पू-क. 2. [illegible] 3. [illegible]

मन्त्रान्, तदभावे प्रणवादिचतुर्थ्यन्तनमोन्तनामानि, अस्मा इत्यस्य स्थाने तत्तद्देवतानां युक्तम् अस्मा इत्यादि स्वाहान्तं च, मन्त्रं पठन् प्राणप्रतिष्ठां कुर्यात्। तथा तत्रैव पीठस्योपरि देवकीसहितं वसुदेवं यशोदासहितं नन्दं श्रीकृष्णसहितं बलदेवं चण्डिकां च प्रतिमासु पूजयेत्। तत्रादौ,

गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादै-
र्भृङ्गारादर्शकुन्तप्रवरकृतकरैः किंकरैः सैव्यमाना।
पर्यङ्के स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते।
सा देवी देवमाता जयति सुवदना देवकी देवरूपा॥

इति देवकीं ध्यात्वा,

मां चापि बालकं सुप्तं पर्यङ्के स्तनपायिनम्।
श्रीवत्सवक्षसं शान्तं नीलोत्पलदलच्छविम्॥

इति श्रीकृष्णं च ध्यात्वा ॐ देवक्यै नमः ॐ वसुदेवाय नमः, ॐ नमो देव्यै श्रियै इति देवक्यादीन् मञ्चकोपरि, ॐ देवक्यै नमः ॐ वसुदेवाय नमः, ॐ यशोदायै नमः, ॐ नन्दाय नमः, ॐ वासुदेवाय नमः, ॐ बलदेवाय नमः, ॐ चण्डिकायै नमः इति पीठान्तरस्थान् देवक्यादीन् च षोडशोपचारैः पूजयेत्।

केषुचिदुपचारेषु मन्त्राः भविष्योत्तरपुराणे--

योगेश्वराय देवाय योगानां पतये विभो!।
योगोद्भवाय नित्याय गोविन्दाय नमो नमः॥

इति स्नाने।

यज्ञेश्वराय देवाय तथा यज्ञोद्भवाय च।
यज्ञानां पतये[1] तुभ्यं गोविन्दाय[2] नमो नमः॥

1. पत्ये-ख, 2. नाथ-ख

इति धूपार्घो ।

विश्वेश्वराय विश्वाय तथा विश्वोद्भवाय च ।
विश्वस्य पतये तुभ्यं गोविन्दाय नमो नमः ।

इति नैवेद्यं[1] । गारुडे तु

"यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसंभवाय गोविन्दाय नमो नमः" इत्यर्घ्यम्[2], "धर्माय धर्मेश्वराय धर्मपतये धर्मसंभवाय गोविन्दाय नमो नमः" इति स्वाहान्तो घृताक्ततिलहोमे, "सोमाय सोमेश्वराय सोमपतये सोमसंभवाय नमो नमः" इति चन्द्रपूजायां मन्त्राः[3] उक्ताः[4] । ततो गव्यघृतेनाग्नौ वसोर्धारा कार्या । क्वचिद् गुडघृतेनेत्यपि[5] । ततो जातकर्म नालच्छेदनं षष्ठीपूजनं नामकर्म च संक्षेपेण कार्यम् । ततश्चन्द्रोदये रोहिणीयुतं[6] चन्द्रं प्रतिमादौ संपूज्य,

शंखे तोयं समादाय सपुष्पकुशचन्दनम् ।
जानुभ्यां[7] धरणीं गत्वा चन्द्रायार्घ्यं निवेदयेत् ।। इति ।

[8] चन्द्रार्घ्यमन्त्रस्तु,

क्षीरोदार्णवसंभूत! अत्रिनेत्रसमुद्भव! ।
गृहाणार्घ्यं शशांकेमं रोहिण्या सहितो मम ।।

[a] इति । ततो,

[9] ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः ।
नमस्ते रोहिणीकान्त! सुधावास! नमोऽस्तु ते ।।

---

1. omitted in ख. 2. र्घ्यो–ग, र्घे–ख, 3. न्त्रः–ख. 4. क्तः–ख. 5. नेति । त–क, ग. 6 यतं–क. 7. ध–ख ग. 8 This line is omitted in Mss. क, ख, and ग. a. Portion from 'इति ततो' to 'सुधावास! नमोऽस्तु, ते' is omitted in Ms. ग. 9. ज्योत्स्नापते! नमस्तुभ्यं नमस्ते ज्योतिषां पते! नमस्ते रोहिणीकान्त! अर्घ्यं मे प्रतिगृह्यताम्–ग.

नमो मण्डलदीपाय शिरोरत्नाय धूर्जटेः[a] ।
कलाभिर्वर्धमानाय नमश्चन्द्राय चारवे ॥

इति मन्त्राभ्यां प्रणमेत् । ततः,

अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥

वाराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥

गोविन्दमच्युतं कृष्णमनन्तमपराजितम् ।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारिणम् ॥

अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।
नारायणं चतुर्बाहुं शंखचक्रगदाधरम् ॥

पीताम्बरधरं नित्यं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगद्धेतुं श्रीकृष्णं श्रीधरं हरिम् ॥

प्रपद्येऽहं सदा देवं सर्वकामप्रसिद्धये ।
प्रणमामि सदा देवं वासुदेवं जगत्पतिम् ॥

इति मन्त्रैर्नामकीर्तनपूर्वकं प्रणम्य,

त्राहि मां सर्वलोकेश! हरे! संसारसागरात् ।
त्राहि मां सर्वपापघ्न! दुःखशोकार्णवात् प्रभो! ॥

सर्वलोकेश्वर! त्राहि पतितं मां भवार्णवे ।
देवकीनन्दन! श्रीश! हरे! संसारसागरात् ॥

---

a. Portion from "नमो मण्डलदीपाय" to "इयं मन्वादिः" (Page 66) is omitted in Ms. ब.

[a] त्राहि मां सर्वदुःखघ्न! रोगशोकार्णवाद्धरे! ।
दुर्गतेस्त्रायसे[1] विष्णो! ये स्मरन्ति सकृत्सकृत् ॥

सोऽहं देवातिदुर्वृत्तस्त्राहि मां शोकसागरात् ।
पुष्कराक्ष! निमग्नोऽहं मायाविज्ञानसागरे ॥

त्राहि मां देवदेवेश! त्वत्तो नान्योऽस्ति रक्षिता ।
यद्बाल्ये यच्च कौमारे यौवने यच्च वार्द्धके ॥
तत्पुण्यं वृद्धिमायातु पापं हर हलायुध! ।

इति मन्त्रैः प्रार्थयेत् । ततः स्तोत्रपुराणपठनादिभिः रात्रिशेषमतिवाह्य परदिने प्रातः स्नानादिनित्यकृत्यं विधाय पुनः सपरिवारं श्रीकृष्णं यथासंभवं संपूज्य चण्डिकायाश्च यथासंभवं महोत्सवं कृत्वा यथाशक्ति ब्राह्मणान् भोजयित्वा तेभ्यः सुवर्णमेदिनी[2]धेनुवस्त्रादि यद्यदिष्टं तत्तत् "कृष्णो मे प्रीयता"मिति दत्त्वा,

"यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥

सुजन्म वासुदेवाय गोब्राह्मणहिताय च ।
शान्तिरस्तु शिवं चास्तु"——इत्युक्त्वा

ब्राह्मणान् विसृज्य इष्टैः सह स्वयं पारणं कुर्याद् इति । इयं मन्वादिः ॥

इति श्रावणकृत्यानि ।

---

a. This and the following two lines are omitted in Ms. ख 1. तांस्त्रा—ख. 2. दिकं—ख.

अथ भाद्रपदकृत्यानि ।

भाद्रपदामावास्यायां कुशग्रहणमुक्तं मदनरत्ने मरीचिना–

मासे नभस्येऽमावास्या तस्यां दर्भोच्चयो मतः ।
अयातयामास्ते ज्ञेयाः विनियोज्याः पुनः पुनः ॥

[a] इति । नभस्यमावास्येति पाठोऽमांतमासेन । भाद्रपदशुक्लतृतीयायां हरितालिकाव्रतम् । तत्र सा मुहूर्तमात्रापि परा ।

रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम! ।
अन्येषु सर्वकार्येषु गुणयुक्ता प्रशस्यते ॥

इति ब्रह्मवैवर्तात् ।

[b] द्वितीयया तु या विद्धा तृतीया न कदाचन ।
कर्त्तव्या व्रतिभिस्तात! धर्मकामार्थतत्परैः ॥

[1] विहाय[2]ैकां तु रंभाख्यां तृतीयां पुण्यवर्धिनीम् । इति स्कान्दे द्वितीयाविद्धा[3]याः निषेधाच्च । निषेधप्रयोजकश्चात्र द्वितीयावेधो न त्रिमुहूर्तात्मक[4]ः, किन्तु कलाकाष्ठादिरूपोऽपि । तदुक्तं स्कान्दे–

कला काष्ठापि या चैव द्वितीया संप्रदृश्यते ।
सा तृतीया न कर्तव्या कर्त्तव्या गुणसंयुता ॥ इति ।

---

a. This line is omitted in Ms. घ. b. This stanza is omitted in Ms. घ. 1. 'तृतीया तु न कर्तव्या द्वितीयासंयुता तिथि': इति स्कान्दे–घ. 2. यैकान्तरां मुख्यां–ग. 3. विद्धानि–ग; संयुक्तानि–घ. 4. मुहूर्तपरः–ख; मुहूर्तकः–ग; मुहूर्ती–घ.

अत एव स्वल्पापि तृतीया चतुर्थीयुता[1] एकादशीवद् ग्राह्या[2]। अयं चाल्पवेधमुक्तोऽपि[3] निषेधो गौरीव्रतविषयः।

"विहायैकां तु रम्भाख्याम्" इति पर्युदासे[4] तत्सदृशानामेव व्रतान्तराणां प्रतीतेः, "नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः" इति न्यायात्। तथैव शिष्टसमाचाराच्चेति। [5]इयं मन्वादिः।

भाद्रपदशुक्लचतुर्थ्यां[6] सिद्धिविनायकव्रतमुक्तं स्कन्दपुराणे[7]। कृष्ण[8] उवाच—

गजवक्त्रं हि शुक्लायां[9] चतुर्थ्यां तु प्रपूजयेत्[10]।
यदा चोत्पद्यते भक्तिस्तदा पूज्यो गणाधिपः॥

प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप!।
स्वशक्त्या गणनाथस्य स्वर्णरौप्यमयाकृतिम्॥
अथवा मृण्मयीं कुर्याद्वित्तशाठ्यं न कारयेत्।

गणनाथस्य--सिद्धिविनायकस्य। तत्स्वरूपमुक्तं[11] तत्रैव—

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम्।
पाशाङ्कुशधरं देवं ध्यायेत् सिद्धिविनायकम्॥ इति[12]।

[a]एवं प्रतिमां कृत्वा प्राणप्रतिष्ठां कुर्यात्। तद्विधिः कालिकापुराणे—

1, त्ता—ख. 2 व ग्रा—क, घ. 3. क्तो नि—ग, घ. 4. सेन त—ख. 5. इ........दि omitted in Ms. ख. 6. र्थी गणेश-चतुर्थी। तत्र सिद्धि—ख. 7. स्कान्दे—ख, घ. 8. कृ... वाच omitted Ms. घ. 9. तु—क, ग. 10. पूजयेन्नृप!-ख. 11 तस्य च रूप—ख. 12 omitted in Ms. ख. a. Portion from 'एवं प्रतिमां' to' पठेदिति। ततः' (Page 69) omitted in Mss. क, ख and ग.

प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
प्राणप्रतिष्ठां कुर्वीत तस्यां देवस्य वा हरेः ॥

अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च ।
यथा पूर्वं तथा भावः स्वर्णादीनां न देवता ॥

अन्येषामपि देवानां प्रतिमास्वपि पार्थिव ! ।
प्राणप्रतिष्ठा कर्तव्या तस्यां देवत्वसिद्धये ॥

अथ प्राणप्रतिष्ठाप्रयोगः — गणेशप्रतिमायाः कपोलौ दक्षिणपाणिना स्पृष्ट्वा "ॐ गणानां त्वे"ति मन्त्रं पठित्वा, गणेशाय प्राणाः प्रतिष्ठन्तु, गणेशाय प्राणा रक्षन्तु, गणेशाय देवत्वसंख्यायै स्वाहा, अन्यदेवेषु तद्बीजमन्त्रौ पठित्वा चतुर्थ्यां तत्तद्देवतापदयुक्तं पूर्वोक्तमन्त्रं पठेदिति । ततः,

कृत्वा पूजां प्रयत्नेन स्नाप्य पञ्चामृतैः पृथक् ।
गणाध्यक्षेति नाम्ना वै गन्धं दद्याच्च भक्तितः ॥

विनायकेति पुष्पाणि धूपं चोमासुतेति च ।
दीपं रुद्रप्रियायेति नैवेद्यं विघ्ननाशिने ॥

वस्त्रं सर्वप्रदे रक्तं युग्मं दद्यात्सुभावितः ।
ततो दूर्वाङ्कुरान् गृह्य विंशतिं चैकमेव च ॥

पूजनीयः प्रयत्नेन एभिर्नामपदैः पृथक् ।

तानि वक्ष्यन्ते—

दूर्वायुग्मं गृहीत्वा तु गन्धयुक्तं प्रपूजयेत् ॥

एकैकेन तु नाम्ना वै दत्त्वैकं सर्वनामभिः ।
तथैकविंशतिं गृह्य मोदकान् घृतपाचितान् ॥

न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात् ।
तत्र निश्यपि तत्कुर्याद् वर्जयित्वा महानिशाम् ॥

इति वचनात् । अत्यशक्तेन तु जागरान्ते प्रातरेव पारणं कार्यम्— "तिथ्यन्ते वोत्सवान्ते वा व्रती कुर्वीत पारणम्" इति कालादर्शोदाहृत-वचनात् ।

अथ संक्षेपतो व्रतानुष्ठानप्रकारः —

प्रातः कृतनित्यक्रियः सूर्यादिदेवताभ्यो व्रतं निवेद्याचम्य प्राणानायम्योदङ्मुखो वारिपूर्णं ताम्रपात्रं गृहीत्वा मासाद्युल्लिख्यामुकफलकामः पापक्षयकामो वा जन्माष्टमीव्रतमहं करिष्ये इति । तत्र

वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥

अद्य[a] कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥

एनसो मोक्षकामोऽस्मि यद् गोविन्द! त्रियोनिजम् ।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे ॥

आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत्प्रणाशय गोविन्द! प्रसीद पुरुषोत्तम! ॥

इति पठित्वा जलमुत्सृजेत् । ततो मध्याह्ने तिलैः स्नात्वा अर्धरात्रे

---

a. Portion from "अद्य कृष्णाष्टमीं" to "जानुभ्यां सरणीं गत्वा चन्द्रायार्घ्यं निवेदयेत् (Page 64) is omitted in Ms. ब

पूर्ववद्"अद्य सपरिवारश्रीकृष्णपूजां करिष्ये"[1] इति संकल्प्य समीपप्रसुप्तस्तनपायि-श्रीकृष्णप्रतिमोपेतां लक्ष्म्या देवक्याश्चरणौ संवाहयन्त्या चोपेतां देवकी-प्रतिमां प्रसुप्तां मञ्चकोपरि स्थापयेत्। प्रतिमापूजनं च प्राणप्रतिष्ठा-पूर्वकं कर्तव्यम्।

प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना।
प्राणप्रतिष्ठां कुर्वीत तस्यां देवस्य वा हरेः॥

अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च।
यथा पूर्वं तथा भावः स्वर्णादीनां न देवता॥

अन्येषामपि देवानां प्रतिमास्वपि पार्थिव!।
प्राणप्रतिष्ठा कर्तव्या तस्यां देवत्वसिद्धये॥

वासुदेवस्य बीजेन तद्विष्णोरित्यनेन च।
तथैव हृदयेऽङ्गुष्ठं दत्त्वा शंखं च मंत्रवित्॥

एभिर्मन्त्रैः प्रतिष्ठां तु हृदयेऽपि समाचरेत्।
अस्मै प्राणाः प्रतिष्ठन्तु अस्मै प्राणाः क्षरन्तु च।

अस्मै देवत्वसंख्यायै स्वाहेति[2] यजुरीरयन्।
अंगमन्त्रैरंगिमन्त्रैर्वैदिकैरित्यनेन च॥
प्राणप्रतिष्ठां सर्वत्र प्रतिमासु समाचरेत्।

इति कालिकापुराणात्।[3] बीजेन मूलमन्त्रेण। इदं च प्रकृतविष्ण्वभिप्रायेण। यदा स्वहृदये पूजा क्रियते तदा हृदयेऽङ्गुष्ठं दत्त्वा मन्त्राः पठनीयाः। तेन अत्रापि प्रतिप्रतिमं कपोलौ स्पृष्ट्वा तत्तद्देवतानां मूलमन्त्रान् वैदिक-

1. रस्य श्रीकृष्णाख्य पू-ग्रन्थ. 2. [illegible] 3. [illegible]

मन्त्रान्, तदभावे प्रणवादिचतुर्थ्यन्तनमोन्तनामानि, अस्मा इत्यस्य स्थाने तत्तद्देवतानां युक्तम् अस्मा इत्यादि स्वाहान्तं च, मन्त्रं पठन् प्राणप्रतिष्ठां कुर्यात् । तथा तत्रैव पीठस्योपरि देवकीसहितं वसुदेवं यशोदासहितं नन्दं श्रीकृष्णसहितं बलदेवं चण्डिकां च प्रतिमासु पूजयेत् । तत्रादौ,

गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादे-
भृङ्गारादर्शकुन्तप्रवरकृतकरैः किंकरैः सेव्यमाना ।
पर्यङ्के स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते ।
सा देवी देवमाता जयति सुवदना देवकी देवरूपा ॥

इति देवकीं ध्यात्वा,

मां चापि बालकं सुप्तं पर्यङ्के स्तनपायिनम् ।
श्रीवत्सवक्षसं शान्तं नीलोत्पलदलच्छविम् ॥

इति श्रीकृष्णं च ध्यात्वा ॐ देवक्यै नमः ॐ वसुदेवाय नमः, ॐ नमो देव्यै श्रियै इति देवक्यादीन् मञ्चकोपरि, ॐ देवक्यै नमः ॐ वसुदेवाय नमः, ॐ यशोदायै नमः, ॐ नन्दाय नमः, ॐ वासुदेवाय नमः, ॐ बलदेवाय नमः, ॐ चण्डिकायै नमः इति पीठान्तरस्थाम् देवक्यादीन् च षोडशोपचारैः पूजयेत् ।

केषुचिदुपचारेषु मन्त्राः भविष्योत्तरपुराणे–

योगेश्वराय देवाय योगानां पतये विभो ! ।
योगोद्भवाय नित्याय गोविन्दाय नमो नमः ॥

इति स्नाने ।

यज्ञेश्वराय[1] देवाय तथा यज्ञोद्भवाय[2] च ।
यज्ञानां पतये तुभ्यं गोविन्दाय नमो नमः ॥

---

1. अस्यै–ख 2. वाय–प

इति धूपार्घो ।

विश्वेश्वराय विश्वाय तथा विश्वोद्भवाय च ।
विश्वस्य पतये तुभ्यं गोविन्दाय नमो नमः ।

इति नैवेद्यं ।[1] गारुडे तु

"यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसंभवाय गोविन्दाय नमो नमः" इत्यर्घ्यम्[2], "धर्माय धर्मेश्वराय धर्मपतये धर्मसंभवाय गोविन्दाय नमो नमः" इति स्वाहान्तो घृताक्ततिलहोमे, "सोमाय सोमेश्वराय सोमपतये सोमसंभवाय नमो नमः" इति चन्द्रपूजायां मन्त्राः[3] उक्ताः[4] । ततो गव्यघृतेनाग्नौ वसोर्धारा कार्या । क्वचिद् गुडघृतेनेत्यपि[5] । ततो जातकर्म नालच्छेदनं षष्ठीपूजनं नामकर्म च संक्षेपेण कार्यम् । ततश्चन्द्रोदये रोहिणीयुतं[6] चन्द्रं प्रतिमादौ संपूज्य,

शंखे तोयं समादाय सपुष्पकुशचन्दनम् ।
जानुभ्यां सरणीं[7] गत्वा चन्द्रायार्घ्यं निवेदयेत् ॥ इति ।

[8] चन्द्रार्घ्यमन्त्रस्तु,

क्षीरोदार्णवसंभूत! अत्रिनेत्रसमुद्भव! ।
गृहाणार्घ्यं शशांकेम रोहिण्या सहितो मम ॥

[a] इति । ततो,

[9] ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः ।
नमस्ते रोहिणीकान्त! सुधावास! नमोऽस्तु ते ॥

---

1. omitted in ख. 2. र्घ्यं—ग, र्घं—ख, 3. न्त्रः—ख. 4. क्तः—ख. 5. नेति । त—क, ग. 6 यतं — क. 7. ध—ख ग. 8 This line is omitted in Mss. क, ख, and ग. a. Portion from 'इति ततो' to 'सुधावास! नमोऽस्तु, ते'—is omitted in Ms. ग. 9. ज्योत्स्नापते! नमस्तुभ्यं नमस्ते ज्योतिषां पते! नमस्ते रोहिणीकान्त! अर्घ्यं मे प्रतिगृह्यताम्—ख.

[a]नमो मण्डलदीपाय शिरोरत्नाय धूर्जटेः ।
कलाभिर्वर्धमानाय नमश्चन्द्राय चारवे ॥

इति मन्त्राभ्यां प्रणमेत् । ततः

अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥

वाराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥

गोविन्दमच्युतं कृष्णमनन्तमपराजितम् ।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारिणम् ॥

अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥

पीताम्बरधरं नित्यं वनमालाविभूषितम् ।
श्रीवत्साङ्कं जगद्धेतुं श्रीकृष्णं श्रीधरं हरिम् ॥

प्रपद्येऽहं सदा देवं सर्वकामप्रसिद्धये ।
प्रणमामि सदा देवं वासुदेवं जगत्पतिम् ॥

इति मन्त्रैर्नामकीर्तनपूर्वकं प्रणम्य,

त्राहि मां सर्वलोकेश! हरे! संसारसागरात् ।
त्राहि मां सर्वपापघ्न! दुःखशोकार्णवात् प्रभो! ॥

सर्वलोकेश्वर! त्राहि पतितं मां भवार्णवे ।
देवकीनन्दन! श्रीश! हरे! संसारसागरात् ॥

---

a. Portion from "नमो मण्डलदीपाय" to "इयं मन्वादिः" (Page 66) is omitted in Ms. ख.

[a] त्राहि मां सर्वदुःखघ्न! रोगशोकार्णवाद्धरे! ।
दुर्गतेस्त्रायसे[1] विष्णो! ये स्मरन्ति सकृत्सकृत् ॥

सोऽहं देवातिदुर्वृत्तस्त्राहि मां शोकसागरात् ।
पुष्कराक्ष! निमग्नोऽहं मायाविज्ञानसागरे ॥

त्राहि मां देवदेवेश! त्वत्तो नान्योऽस्ति रक्षिता ।
यद्बाल्ये यच्च कौमारे यौवने यच्च वार्द्धके ॥
तत्पुण्यं वृद्धिमायातु पापं हर हलायुध! ।

इति मन्त्रैः प्रार्थयेत् । ततः स्तोत्रपुराणपठनादिभिः रात्रिशेषमतिवाह्य परदिने प्रातः स्नानादिनित्यकृत्यं विधाय पुनः सपरिवारं श्रीकृष्णं यथासंभवं संपूज्य चण्डिकायाश्च यथासंभवं महोत्सवं कृत्वा यथाशक्ति ब्राह्मणान् भोजयित्वा तेभ्यः सुवर्णमेदिनीधेनुवस्त्रादि[2] यद्यदिष्टं तत्तत् "कृष्णो मे प्रीयता"मिति दत्त्वा,

"यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥

सुजन्म वासुदेवाय गोब्राह्मणहिताय च ।
शान्तिरस्तु शिवं चास्तु"——इत्युक्त्वा

ब्राह्मणान् विसृज्य इष्टैः सह स्वयं पारणं कुर्याद् इति । इयं मन्वादिः ॥

इति श्रावणकृत्यानि ।

---

a. This and the following two lines are omitted in Ms. ख 1. तास्त्रा–ख. 2. दिकं–ख.

अथ भाद्रपदकृत्यानि ।

भाद्रपदामावास्यायां कुशग्रहणमुक्तं मदनरत्ने मरीचिना—

मासे नभस्येऽमावास्या तस्यां दर्भोच्चयो मतः ।
अयातयामास्ते ज्ञेयाः विनियोज्याः पुनः पुनः ॥'

[a] इति । नभस्यमावास्येति पाठोऽमांतमासेन । भाद्रपदशुक्लतृतीयायां हरितालिकाव्रतम् । तत्र सा मुहूर्तमात्रापि परा ।

रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम! ।
अन्येषु सर्वकार्येषु गुणयुक्ता प्रशस्यते ॥

इति ब्रह्मवैवर्तात् ।

[b] द्वितीयया तु या विद्धा तृतीया न कदाचन ।
कर्त्तव्या व्रतिभिस्तात! धर्मकामार्थतत्परैः ॥

[1] विहाय[2]एकां तु रंभाख्यां तृतीयां पुण्यवर्धिनीम् । इति स्कान्दे द्वितीयाविद्धाया[3]ः निषेधाच्च । निषेधप्रयोजकश्चात्र द्वितीयावेधो न त्रिमुहूर्तात्मक[4]ः, किन्तु कलाकाष्ठादिरूपोऽपि । तदुक्तं स्कान्दे—

कला काष्ठापि या चैव द्वितीया संप्रदृश्यते ।
सा तृतीया न कर्तव्या कर्तव्या गुणसंयुता ॥ इति ।

---

a. This line is omitted in Ms. घ. b. This stanza is omitted in Ms. घ. 1. 'तृतीया तु न कर्तव्या द्वितीयासंयुता तिथि': इति स्कान्दे–घ. 2. यैकान्तरां मुख्यां–ग. 3. विद्धानि–ग; संयुक्तानि–घ. 4. मुहूर्तपरः–ख; मुहूर्तकः–ग; मुहूर्ती–घ.

वतारमभिधाय बलिनिग्रहान्ते "एतत्सर्वं समभवदेकादश्यां नराधिपे"त्युक्त्वा "एषा व्युष्टिः समाख्याता एकादश्यां मया तव" इत्यभिधानात् ।

भाद्रपदशुक्लद्वादश्यां[1] श्रवणयोगे पारणं न कार्यम् "आभाकासितपक्षेष्वि"ति पूर्वोदाहृतवचनात् ।

उपोष्यैकादशीं मोहात् पारणं श्रवणे यदि ।
करोति हन्ति तत्पुण्यं द्वादश द्वादशीभवम् ।।

इति स्कान्दाच्च[2] । अत्र च[3] त्रेधाविभक्तश्रवणमध्यभागे एव पारणं वर्ज्यमित्युक्तं विष्णुधर्मे "श्रुतेश्च मध्ये परिवर्त्तमेति, सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम्" इति । अत्रैव परिवर्तनोत्सवं कुर्यात् "श्रुतेश्च मध्ये परिवर्तमेती"ति वाक्यात्[4] । अत्रैव शक्रध्वजोत्थापनमुक्तमपरार्के गर्गेण–

द्वादश्यां तु सिते पक्षे मासि प्रोष्ठपदे[5]ऽपि वा ।
शक्रमुत्थापयेद्राजा विष्णु[6]श्रवणवासरे ।।

इयमेव श्रवणद्वादशी । अस्याश्चाल्पश्रवणयोगेऽपि तन्निमित्तमुपवासादि भवत्येव[7] । तदुक्तं मात्स्ये–

द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः ।
न तु सा तेन संयुक्ता तावत्येव प्रशस्यते ।।

इति[8]। तत्रैकस्मिन्नेव दिने श्रवणयोगे यैव श्रवणयुक्ता सैव ग्राह्या । विद्धाधिकाया

---

1. आ–क, ग. 2. च omitted in Ms. ख, ग. 3. तु–क. 4. वचनात् घ. 5. दे तथा–घ. 6. विष्ण–क, ख, घ. 7. ति ।–क, ख, घ. 8. ता–ग.

द्विनद्वयेऽपि[1] श्रवणयोगे एकादशीयुता ग्राह्या ।

> द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि[2] ।
> स[3] एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञितः[4] ॥
>
> उपोष्य विधिवत्तत्र नरः संक्षीणकिल्बिषः ।
> प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥

इति मात्स्यात्[5] । तथा नारदीये—

> संस्पृश्यैकादशीं राजन् ! द्वादशीं यदि संस्पृशेत् ।
> श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति ॥

इति । तन्त्रेण[6] च तदेकादशीद्वादशीप्रयुक्तमुपवासद्वयं शुद्धाधिकाया द्विनद्वयेऽपि श्रवणयोगे उदये तद्योगवती ग्राह्या, 'उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रते' इति बृहन्नारदीयात् । यदा तु एकादश्येव श्रवण-युक्ता न द्वादशी तदा तस्यामपि व्रतं भवति ।

> यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् ।
> एकादशी तदोपोष्या पापघ्नी श्रवणान्विता ॥

इति नारदीयात् । विद्धाया अपि श्रवणयोगे विद्धापि ग्राह्या ।

> दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः ।
> श्रवणेन तु संयुक्ता सा शुभा सर्वकामदा ॥

इति वह्निपुराणात्[7] । इयं च बुधवारे अतिप्रशस्ता । अत्र व्रतं काम्यम् । नित्यमिति केचित् । पारणे[8] तु उभयान्तो मुख्यः । अन्यतरान्तो गौणः ।

---

1. ये श्र-क, ख, ग, 2. दा-घ. 3. ष-घ. 4. संज्ञकः-ख. 5. मत्स्यपुरा-णात्-घ. 6. णेव त—ख. 7. वासरे-ग. 8. णे—ङ,ग.

[a] दिवान्यतरांतस्याप्यलाभे[1]ऽपि दिवैव पारणम्, 'न रात्रौ पारणं कुर्या'दिति सन्निपारणनिषेधात्। अत्र संगमस्नानादि कार्यम्।

[b] श्रावणे संगमाः सर्वे परव्युष्टिप्रदाः सदा।
विशेषाद् द्वादशीयुक्ते बुधयुक्ते विशेषतः॥

इति। तथा,

दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे।
वस्त्रसंवेष्टितं दत्त्वा[2] छत्रोपानहमेव च॥

न दुर्गतिमवाप्नोति मतिमग्र्यां च विन्दति। तथा,

स्नानं जप्यं तथा दानं होमं श्राद्धं सुरार्चनम्।
सर्वमक्षय्यमाप्नोति तस्यां भृगुकुलोद्भव!॥

इति। ब्रह्मवैवर्तेऽपि,

बुधश्रवणसंयुक्ता संगमे विजया स्मृता।
वारिधानी प्रदातव्या दध्योदनसमायुता॥

प्रेतयोनौ न जायेत पूजयित्वात्र[3] वामनम्।
वंशः समुद्धृतस्तेन मुक्तः पितृऋणादसौ॥

इति।

अस्यामेव दुग्धव्रतारंभः। दुग्धव्रते पायसादिकं वर्ज्यम्[4]। दधिघृतादयस्तद्विकारास्तु[5] ग्राह्या एव।

---

1. भे तु-ख, भे वि-ग. b. Portion from 'श्रावणे' to 'पितृऋणादसौ' is omitted in Ms. घ. But the following lines only are found: भाद्रपदश्रवणैकादश्यां मध्याह्ने वामनावतारः। तत्र वामनपूजा-प्रतिमादानादिकं व्रतकाण्डे द्रष्टव्यम्। 2. द्यात्-ख. 3. त्वा च-क. 4. दि ध-क, ख, ग. 5. रा ग्राह्या-ग.

भाद्रपदशुक्लचतुर्दश्यामनन्तव्रतम् । तत्र पूर्वाह्णव्यापिनी ग्राह्या देवकर्मत्वात्[1] । "चतुर्दश्यां च पूर्णिमे"ति युग्मवाक्याच्च । न च[a] "मध्याह्ने भोज्यवेलायां समुत्तीर्ये"तीतिहासे[2] मध्याह्ने पूर्वगृहीतव्रतानां स्त्रीणां व्रताचरणप्रतीतेः शीलायाश्च पूर्वव्रतारंभप्रतीतेर्मध्याह्नस्यैव तत्कालत्वात् मध्याह्नव्यापिनी चतुर्दशी ग्राह्येति वाच्यम् । पूजाविधेः प्रत्यक्षत्वेनेतिहासरूपार्थवादोन्नेयत्वाभावात्[3] । तत्र च मध्याह्नाश्रवणात् प्रत्यक्षविधिविहितदैवकर्माङ्गत्वभूतपूर्वार्धविरोधे इतिहासे तन्मात्रकल्पनासंभवात् पूर्वाह्ण एव तस्य कालः । न च "पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथि"रिति माधवोदाहृतवचनात् मध्याह्नव्यापिनी ग्राह्येति युक्तम् ,

मुहूर्तमपि चेद् भाद्रे पूर्णिमायां चतुर्दशी ।
संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययम् ।।

इति निर्णयामृतोदाहृतस्कान्दविशेषवचनविरोधात् । माधवादयोऽप्येवम् ।

सिंहसंक्रान्तिदिनमारभ्यैकविंशतितमे[4] दिने अगस्त्योदयः । तदुक्तं[b] दिवोदासीये—

"उदेति याम्यां हरिसंक्रमाद्रवेरेकाधिके विंशतिमे ह्यगस्त्ये" – इति ।

तत्र काशपुष्पमयीमगस्त्यप्रतिमां संपूज्यागस्त्यः खनमान इत्यृचार्घ्यं दद्यात् ।

[c] मन्त्रस्तु,

---

1. वत्वात्—ग. 2. लायामितीति—क, ग. a. Portion from "न च मध्याह्ने" to "माधवादयोप्येवम्" is omitted in Ms. घ. But the following is added – केचित्तु मध्याह्ने भोज्यवेलायामिति तत्कथायां श्रवणात् मध्याह्नव्यापिनी ग्राह्येति वदन्ति । तस्य दूषणमन्यत्र मत्कृतौ द्रष्टव्यम्. 3. ते—ख.
4. न्तिसम—क, ख, ग. b. तदुक्तं..............ह्यगस्त्ये—इति- omitted in Ms. ग.
c. Portion from "मन्त्रस्तु" to "च पुत्रिणे"–found only in Ms ग.

काशपुष्पप्रतीकाश! अग्निमारुतसंभव ।
मित्रावरुणयोः पुत्र! कुम्भयोने! नमोऽस्तु ते ॥

वातापी भक्षितो येन समुद्रः शोषितः पुरा ।
लोपामुद्रापतिः श्रीमान् तस्मै नित्यं नमो नमः ॥

येनोदितेन पापानि यान्ति च व्याधयो लयम् ।
तस्मै नमोऽस्त्वगस्त्याय सशिष्याय च पुत्रिणे ॥

इत्यादि व्रतकाण्डे[1] द्रष्टव्यम् ।

भाद्रपदपौर्णमास्यां भविष्योत्तरोक्तं ब्रह्मसावित्रीव्रतम् ।

त्रयोदश्यां भाद्रपदे दन्तधावनपूर्वकम् ।
त्रिरात्रं नियमं कुर्यादुपवासस्य भक्तितः ।

इति[2] । अस्यां[3] कन्यार्कयुतायां[4] प्रपितामहान्तपितॄनुद्दिश्य श्राद्धं कार्यम् ।
तदुक्तं मार्कण्डेयपुराणे—

नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ ।
पौर्णमास्यां तु कर्तव्यं वराहवचनं यथा ॥

इति । नान्दीमुखत्वं दर्शितं तत्रैव—

पिता पितामहश्चैव तथैव प्रपितामहः ।
त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः ॥

---

1. पदे तु स्पष्टम्—ख. 2. omitted in Ms. ख 3. स्यामेव कन्या-ख.
4. ता—ग.

तेभ्यः पूर्वतरा ये च प्रजावन्तः सुखैधिताः ।
ते तु नान्दीमुखा नान्दी समृद्धिरिति कथ्यते ॥

इति । एतच्च नित्यं "प्रत्यब्द"मित्युक्तेः ।[2] नित्यत्वाच्च[a] यस्मिन् वर्षे भाद्रपद्याः कन्यार्कयोगाभावस्तदा अश्वयुजायां कन्यार्कयुक्तायां कार्यम्, हेमाद्र्युक्तभाद्रपद्युपलक्षणत्वस्यायुक्तत्वात् । एतच्च पार्वणविधानेन कार्यम् । विष्णुधर्मोत्तरे-

गोदानं प्रोष्टपद्यां च पौर्णमास्यां महाफलम् ।

मदनरत्ने मात्स्ये —

यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमुच्यते ॥

लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम् ।
पौर्णमास्यां प्रोष्ठपद्यां स याति परमं पदम् ॥

अष्टादशसहस्राणि पुराणं तत् प्रकीर्तितम् । इति ॥

इति भाद्रपदकृत्यम् ॥

अथ महालयाः ।

तत्र षट् पक्षाः । कृष्णप्रतिपदादिशुक्लप्रतिपदन्त एकः१ । प्रतिपदादिदर्शान्तो द्वितीयः २ । पञ्चम्यादि ३ अष्टम्यादि ४ दशम्यादि ५ चतुर्दशीवर्जं दर्शान्तमित्यपरे । दशसप्तपञ्चतिथिपक्षाः एक-दिनपक्षश्चेति । तत्र प्रथममाह शाट्यायनिः–

नभस्यस्यापरे पक्षे तिथिः षोडशकस्तु यः ।
कन्यागतान्वितश्चेत् स्यात् स कालः श्राद्धकर्मणि ॥

---

1. ये-क. 2. ति श्रुतेः- ख a. Portion from "नित्यत्वाच्च" to "इति भाद्रपदकृत्यम्" is omitted in Ms. ख.

इति । चेदित्यसंदिग्धे संदिग्धवचनम् 'शास्त्राणि चेत् प्रमाणं स्युः प्राप्तास्ते परमां गतिम्' इतिवत् । नभस्य इत्यमान्तमासेन । 'तिथिषोडशकश्चामावास्योत्तरां प्रतिपदमादाये'ति देवलेनोक्तम् ।

अहःषोडशकं यत्तु शुक्लप्रतिपदा सह ।
चन्द्रक्षया विशेषेण सापि दर्शात्मिका स्मृता ॥

इति । पञ्चदशदशसप्तपञ्चतिथिपक्षाः ब्रह्मपुराणे--

अश्वयुक् कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने ।
त्रिभागहीनं पक्षं वा त्रिभागं त्वर्धमेव वा ॥

इति । तृतीयो भागस्त्रिभागः । पक्षस्य तद्धीनता चाद्यानां चतसृणां चतुर्दश्याश्च वर्जनात् । एवमर्धत्रिभागयोरपि चतुर्दशीवर्जनम् ।

नभस्यस्यापरे पक्षे श्राद्धं कुर्याद्दिने दिने ।
नैव नन्दादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्दशी ॥

इति वचनेन प्रतिपदादिपक्ष एव चतुर्दशीवर्जननिषेधादितरपक्षेषु तद्वर्जनप्रतीतेः । नन्दादिवर्जनं तु न भवति संख्याहानिप्रसङ्गात् । गौतमः-- 'अथापरपक्षे[1] श्राद्धं पितृभ्यो दद्यात् पञ्चम्यादिसर्वस्मिंश्चे'ति । एकदिनपक्षो नागरखण्डे--

आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे ॥
तस्य संवत्सरं यावत् तृप्ताः स्युः पितरो ध्रुवम् ।

इति[2] । अस्मिंश्च पक्षे नन्दादिवर्जनमपि भवति । अत्र तदप्रवृत्तौ कारणाभावात् । नन्दादिवर्जनमाह नारदः—

1. षु वर्ष-ख 2. मिति-ख.

न नन्दासु भृगोर्वारे रोहिण्यां च त्रिजन्मसु ।
रेवत्यां च मघायां च कुर्यादापरपक्षिकम् ।।

इति[1] । नन्दा: प्रतिपत्षष्ठ्येकादश्य: । त्रिजन्मानि आद्यदशमैकोनविंशानि नक्षत्राणि । यत्तु "कर्तुश्च पुत्रदाराणां[2] च यानि त्रीणि जन्मर्क्षाणि वर्जयेत्" इति[3] क्वचिल्लिखितं वचनं तद्यदि स्वाकरं तदेवं व्याख्येयम् । कर्तुश्च पुत्रदाराणां च यानि त्रीणि जन्मर्क्षाणि आद्यदशमैकोनविंशानि तानि वर्जयेदिति । अन्यथा त्रिशब्दस्य बहुवचनस्य च वैयर्थ्यात् । कैश्चित् त्रिजन्मानि इत्यत्र जन्मतत्पूर्वोत्तरनक्षत्राणीति व्याख्यातं तत्पूर्वोत्तरनक्षत्रयोर्जन्मशब्दवाच्यत्वा-भावात् मूलालेखनाच्च उपेक्षितम् । अन्यत्रापि,

"नन्दाश्वकामाख्यारभृग्वग्निपितृकालभे ।
गण्डे वैधृतिपाते च पिण्डास्त्याज्या: सुतेप्सुभि:" ।।

इति । अश्व: सप्तमी, कामस्त्रयोदशी, आरो भौम:, अग्निपितृकालभानि कृत्तिकामघाभरण्याख्यानि नक्षत्राणि । पिण्डदानग्रहणं श्राद्धोपलक्षणम्[4], एकमूलकल्पनालाघवात् । अस्यापवाद: प्रयोगपरिजातोदाहृते संग्रहवचने—

अमापाते[5] भरण्यां च द्वादश्यां पक्षमध्यके ।
तिथिं वारं च नक्षत्रं योगश्च न विचारयेत् ।।

इति । मृततिथिसमानजातीयायामपि चतुर्दशीभिन्नायां तिथौ निषेधप्रयोजक-युक्तायामपि यावत्संभवं महालयश्राद्धमाचरन्ति । आधुनिकग्रन्थे वचनान्यपि लिखितानि । नागरखण्डे—

आषाढ्या: पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
मृताहनि पितुर्यो वै श्राद्धं दास्यति मानव: ।।
तस्य संवत्सरं यावत् संतुष्टा: पितरो ध्रुवम् ।

1. Omitted in Ms. ख. 2. णां त्रिजन्म—क. 3. ति व—घ. 4. णमेव,—ख. 5. मायां च भ—ख.

कात्यायनः—

> या तिथिर्यस्य तातस्य मृताहे तु प्रवर्तते ।
> सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः ॥ तथा,
>
> अशक्तः पितृपक्षे[1] तु करोत्येकदिने यदा ।
> निषिद्धेऽपि दिने कुर्यात् पिण्डदानं यथाविधि ॥

इति[2] । एतानि[a] वचनानि महानिबन्धेष्वदर्शनादनाकराणि । तथा च[3] मार्कण्डेयः—

> कन्यागते सवितरि दिनानि दश पञ्च च ।
> पार्वणेनैव विधिना श्राद्धं[4] तत्र विधीयते ॥ यस्तु,
>
> विवाहे विहिते मासे[5] त्यजेयुर्वादशैव हि ।
> सपिण्डं पिण्डनिर्वापं मौञ्जीबन्धे षडेव हि ॥

इति विवाहानन्तरं[6] पिण्डदाननिषेधो ज्योतिःशास्त्रे पराशरेण उक्तः तस्यापवादः स्मृतिसंग्रहे—

> महालये गयाश्राद्धे मातापित्रोर्मृतेऽहनि ।
> यस्य कस्यापि मर्त्यस्य सपिण्डीकरणे तथा ।
> कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वापणं सुतः ॥

इति । संन्यासिनां तु महालयश्राद्धं द्वादश्यां कर्तव्यम् ।

> यतीनां च वनस्थानां वैष्णवानां विशेषतः ।
> द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः ॥

---

1. पक्षमध्ये तु—ग, घ. 2. Omitted in क. a. This sentence is omitted in क and घ. 3. Omitted in ख and घ. 4. तत्र श्राद्धं—क. 5. सांस्य—ख. ग. 6. होतरं—ख; हायन—घ.

इति पृथ्वीचन्द्रोदयोक्तेः । वायुपुराणेऽपि[a]—

संन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद् यथाविधि ।
महालये तु यच्छ्राद्धं द्वादश्यामेव तद्भवेत् ॥

इति । इदं चान्नेनैव कर्तव्यम् ।

मृताहं[1] च सपिण्डं[2] च गयाश्राद्धे[3] महालये[4] ।
आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित् ॥

इति स्मृतिदर्पणे गालवोक्तेः । अथात्र देवताः—

पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।
[b]अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत् ॥

तथा,

अष्टकासु च वृद्धौ च प्रतिसंवत्सरं तथा ।
महालये गयायां[5] च सपिण्डीकरणात् पुरा ॥
मातुः श्राद्धं पृथक् कुर्यादन्यत्र पतिना सह ।

इति । हेमाद्रौ—

[c]महालये गयाश्राद्धे वृद्धावन्वष्टकासु[6] च ।
नवदैवत्यमत्रेष्टं[7] शेषं षट्पौरुषं विदुः ॥ इति ।

[8]सपत्नमातुस्तु मात्रा सहैकतन्त्रेण द्विपितृकश्राद्धवत् । निगमे—

---

a. This and the stanza following it are omitted in क and घ.
1. हे—ग. 2. ण्डे—ग. 3. द्धे—क, ख, घ. 4. ये—क, ख, घ. b. This line is omitted in क, ग and घ. 5. याश्राद्धे स—क, ख. c. Portion from "महालये" to "निगमे" is omitted in Ms. ख. 6. द्धौ चान्व—घ.
7. तमत्रेष्टं—ग; तमन्त्रेण—क. 8. त्नमात्रा—क.

महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च ।
ज्ञेयं द्वादशदैवत्यं तीर्थे[1] प्रोष्ठे मघासु च ॥

तथा हेमाद्रौ[2]—

उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः ।
श्वशुरभ्रातृतत्पुत्रऋत्विक्[3]शिष्याप्तपोषकाः ॥

भगिनीस्वामिदुहितृजामातृभगिनीसुताः ।
पितरौ[4] पितृपत्नीनां[5] पितुर्मातुश्च या स्वसा ॥

सखिद्रव्यदशिष्याद्यास्तीर्थे चैव महालये ।
एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः ॥ इति ।

संग्रहवाक्यं तु ऋषिवचनासंवादादनादृतम्[6] । अत्र प्रत्येकोऽष्टब्राह्मणभेद इति मुख्यः पक्षः । अशक्तौ चतुर्विंशतिमते एकस्मिन् ब्राह्मणे सर्वानाचार्यादीन् प्रपूजयेदिति । "दश द्वादश वा पिण्डान् दद्यादकरणं न तु" । विधवायास्तु विशेषः स्मृतिसंग्रहे—

चत्वारि पार्वणानीह विधवायाः सदैव हि ।
स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च ॥
ततो मातामहानां च श्राद्धं देयमनुक्रमात्[7] । इति । तथा,
श्वश्रूणां च विशेषेण मातामह्यास्तथैव च[8] । इति ।

अशक्तौ तु स्मृतिरत्नावल्याम्—

स्वभर्तृप्रभृति त्रिभ्यः स्वपितृभ्यस्तथैव च ।
विधवा कारयेच्छ्राद्धं यथाकालमतन्द्रिता[9] ॥ इति ।

---

1. तिथौ—क. 2. द्रिः—क. 3. गुरुशि—क. 4. रः—क. 5. पुत्रप—ग.
6. दाम्नादृतम्—घ. 7. श्राद्धदानमनुक्रमात्—ख; श्राद्धदानमुपक्रमेत्—ग, घ.
8. च । तस्याः षड्दैवत्ये विशेषः स्मृ—ख, ग. 9. Omitted in क and घ.

विधवा स्वयं संकल्पं कृत्वा अन्यद्वारा कारयेदित्युक्तं[1] प्रयोगपारिजाते। अत्र चैकः पाकः वैश्वदेवं तन्त्रम्[2]। पृथग्वा। एकोद्दिष्टे ह्यग्नौ करणं नास्ति। कर्तव्यमिति गृह्यकाराः। पुरूरवमाद्रवसंज्ञकौ[3] विश्वेदेवौ[4]। यत्तु "अपि कन्यागते सूर्ये श्राद्धे तु धुरिलोचनौ" इत्यादि पुराणसमुच्चयवचनं[5][6] तत्काम्यबुध्यादिक्रियमाणं महालयविषयमिति हेमाद्र्यादयः[7]। केचित् नित्येऽपि महालयश्राद्धे ताविच्छन्ति। मह्यं चेत्तन्न रोचते, यतः नात्र महालयपदं श्रूयते[8]। किन्तु कन्यागते सूर्ये श्राद्ध इत्येव। तत्र किं कन्यागते सूर्ये इतीयमधिकरणसप्तमी, उत निमित्तसप्तमी ? आद्ये कन्यागताधिकरणकेषु वार्षिकादिष्वतिप्रसंगः। द्वितीये महालयश्राद्धस्य[a] तन्निमित्तकत्वाभावेन तत्र धुरिलोचनौ न स्याताम्।

आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पञ्चमः।
श्राद्धं तत्र प्रकुर्वीत कन्यां गच्छतु वा न वा॥

आगतेऽपि रवौ कन्यां श्राद्धं कुर्वीत यत्नतः।
आषाढ्याः पञ्चमः पक्षः प्रशस्तः पितृकर्मसु॥

इति जातूकर्णजाबालवचनाभ्यां महालयश्राद्धस्य केवलपञ्चमपक्षप्रयुक्तत्वात्। तत्रैव,

शक्रध्वजनिपातांको यः स्यात्पक्षस्तु पञ्चमः।
स विज्ञेयोऽपरः[9] पक्षः श्राद्धं तत्र विधीयते॥

---

1. दिति प्र–ख, ग. 2. तन्त्रम्। एकोद्दिष्टे तु पाणिहोमः। पुरू–क, घ. 3. वार्द्रसं–ख. 4. ज्ञौ वि–ख, ग. 5. णवचनं–ख, घ. 6. वाक्यं–क. 7. मदनरत्ने पारिजाते–क, घ; Portion upto 'द्वितीये महालय' is also omitted in these Mss. 8. omitted in Ms. ख. a. From "महालयश्राद्धस्य" to "महालयश्राद्धे इति" (Page 90) is–missing in Ms घ. 9. व–ख, ग.

पुत्रानायुर्धनं धान्यमारोग्यं भूतिमेव च ।
प्राप्नोति पञ्चमे दत्त्वा श्राद्धं कामांस्तथापरान् ।।

एतान्यपि हि हिंसन्ति पञ्चमं यो व्यतिक्रमेत् ।
तस्मान्नातिक्रमेद्विद्वान् पञ्चमे पैतृकं विधिम् ।

इति । कन्यायोगस्तु प्राशस्त्यार्थः । न तु तस्य निमित्तत्वम् । किंविषयं तर्हीदं वचनमिति चेत् श्रूयतामवधानेन,—

"नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ
पौर्णमास्यां तु कर्तव्यं"—

इति वचनविहिते श्राद्धे कन्यार्कयुक्तपौर्णमास्यानिमित्तत्वेन तत्र कन्यार्कस्यापि निमित्तत्वात्तत्र भवेतां धुरिलोचनौ । यद्वा कन्यासंक्रान्तिश्राद्धे भवेतां । न तु कदापि नित्ये महालयश्राद्धे इति । अत्र च प्रतिदिनप्रयोगभेदाद्दक्षिणाभेदः । यत्तु हेमाद्रिणाऽभ्यासपक्षेऽन्ते दक्षिणादानमित्युक्तं तत्कर्मैक्येऽपि प्रतिदिनं प्रयोगभेदात् दक्षिणायाश्च प्रयोगाङ्गत्वादयुक्तम् । एतच्च गुर्विणीपतिना पिण्डरहितं युक्तं कार्यम् । तथा च दक्षः —

मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।
न जीवत्पितृकः कुर्यात् गुर्विणीपतिरेव च ।।

इति । जीवत्पितृकस्यान्वष्टक्यं[1] मातृवार्षिकादौ[2] वचनात् भवति । नान्यत्रेति केचित् । श्राद्धाङ्गं तर्पणं पक्षश्राद्धे श्राद्धोत्तरं प्रत्यहं, सकृन्महालये तु [3]परेद्युः । तदुक्तं नारदीये—

1. कान्व—ख. 2. दि—क. 3. परदिने—घ.

पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने ।
सकृन्महालये चैव परेऽहनि तिलोदकम् ॥ इति ।

प्रयोगपारिजाते गर्गः—

[1]कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् ।
पितृणां प्रत्यहं कार्यं निषिद्धे[2]ऽपि च तर्पणम् ॥

एतच्च श्राद्धं नित्यम् ।

आषाढ्याः पञ्चमे पक्षे यः श्राद्धं न करिष्यति ।
शाकेनापि दरिद्रोऽपि सोऽन्त्यजत्वमुपेष्यति ॥

आसनं शयनं भोज्यं स्पर्शनं भाषणं तथा ।
तेन सार्धं करिष्यन्ति ये ते पापतरा नराः ॥

इति नागरखण्डे[3]ऽकरणे प्रत्यवायश्रवणात् । काम्यं च,

पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा ।
प्राप्नोति पञ्चमे दत्त्वा श्राद्धं कामांश्च पुष्कलान् ॥

इति कार्ष्णाजिनवचनात् । मलमासे सत्युत्कर्षः ।

यावच्चान्त्रियो मासः कन्यार्के जायते यदा ।
दैवं पित्र्यं तदा कर्म उत्तरे मासि युज्यते ॥

इति । [a]यदुक्तं तदाश्विनेऽधिमासे[4] तत्र गौणकाले प्राप्तस्य महालय-श्राद्धस्योत्कर्षार्थमित्याद्यन्यत्र मत्कृतौ द्रष्टव्यम् । पितृमरणप्रथमाब्दे तु

1. ष्ण—क. 2. द्धे दिवसेऽपि च—ग. 3. ण्डे प्र—ग. a. This sentence is omitted in Ms. घ. 4. धिके मा—क.

कृताकृतम् । कृतेऽभ्युदयोऽकृते प्रत्यवायो नास्ति ।[a] अत्र भरण्यां श्राद्धमतिप्रशस्तम् ।

भरणी पितृपक्षे तु[1] महती परिकीर्तिता ।
तस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत् ॥

इति मात्स्यात् । इदं[b] पिण्डरहितं कर्तव्यम् । तथा च पुलस्त्यः —

अयनद्वितये श्राद्धं विषुवद्द्वितये तथा ।
भरणीषु च कुर्वीत[2] पिण्डनिर्वपणं न हि ॥

पाद्मेऽपि "संक्रान्तिषु च सर्वासु पिण्डनिर्वपणादृते" इति । पृथ्वीचन्द्रोदये—

नभस्यकृष्णपक्षे[3] तु द्वितीया यदि याम्यभे ।
तृतीया त्वग्नितारामिःसहिता प्रतिपदा पितुः ॥

इति । अस्मिन्नेव पक्षे कपिला षष्ठी । तदुक्तं वाराहे—

नभस्यकृष्णपक्षे तु रोहिणी[4] पातभूसुतैः ।
युता[5] षष्ठी पुराणज्ञैः कपिला परिकीर्तिता ॥

व्रतोपवासनियमैर्भास्करं तत्र पूजयेत् ।
कपिलां च द्विजाग्र्याय दत्त्वा क्रतुफलं लभेत् ॥

इति । अत्रैव 'हस्तार्के फलातिशयः' इति निर्णयामृते । इयमेव चन्द्रषष्ठी । तदुक्तं भविष्ये—

तद्वद्भाद्रपदे मासि षष्ठ्यां पक्षे सितेतरे
चन्द्रषष्ठीव्रतं कुर्यात् पूर्ववेधः प्रशस्यते ।

---

a. This sentence is omitted in Ms. घ. 1. श्राद्धप—ख. b. portion from "इदं पिण्ड" to "निर्वपणादृते, इति" is omitted in Ms. घ. 2. कर्तव्यम्—ख. 3. स्यापरपक्षस्य—ग. 4. तृतीया पात—ख. 5. या तु ष—ख.

चन्द्रोदये यदा षष्ठी पूर्वा वाप्यपरेऽहनि ।
चन्द्रषष्ठी[1] सिते पक्षे सैवोपोष्या प्रयत्नतः ।।

इति । अत्रापि[a] भाद्रपदोऽमान्तमासेन । इयमेव तत्पुरुषकल्पादिः ।

अत्रैव षष्ठ्याम् आश्वलायनेन मध्यावर्षसंज्ञश्राद्धमुक्तम्, "एतेन मध्या-वर्षं प्रोष्ठपद्या अपरपक्ष" इति । इदं च 'सप्तम्यादिषु त्रिष्वहस्सु अष्टकावत् कार्यमेतेनें'ति कृत्स्नातिदेशादिति वृत्तिकृत् । हरदत्तस्तु माघावर्षमिति[b] पाठमङ्गीकृत्य माघयुक्तवर्षासु भवं त्रयोदशीश्राद्धमिति व्याचख्यौ ।

अत्रैवाष्टम्यां महालक्ष्मीव्रतसमापनम् । तत्र चन्द्रोदययोगिनी[2] ग्राह्या । तत्काले चन्द्रार्घ्यदानविधानात् । चन्द्रोदयव्रतत्वेन "चन्द्रोदयव्रते चैव तिथि-स्तात्कालिकी स्मृता" इति वचनादुभयत्र चन्द्रोदये सत्त्वेऽसत्त्वे वा,

कृष्णपक्षेऽष्टमी[c] चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्तव्या परविद्धा न कुत्रचित्[3] ।।

इति वचनात् पूर्वा । यद्युत्तरदिने चन्द्रोदयोत्तरं त्रिमुहूर्ता तदोत्तरैव । पूर्वा परविद्धा वा ग्राह्या चन्द्रोदये तु 'त्रिमुहूर्ता तु सा पूज्या परतश्चोर्ध्व-गामिनी' इति पुराणसमुच्चयवचनात् ।

अर्धरात्रमतिक्रम्य वर्तते योत्तरा तिथिः ।
तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदा ।।

---

1. ष्ठ्यसि–ख, ग. a. 'अत्रापि...... ....कल्पादि': –omitted in घ.
b. 'माघावर्ष'... कृत्य'–omitted in घ. 2. व्यापिनी–घ. c. कृष्णपक्षे ......इति वचनात् omitted in Ms. घ. 3. कर्हिचित्–ग.

इति वचनाच्च । अस्यामेवाष्टम्यां[a] श्राद्धं गयाश्राद्धतुल्यफलम्[1] । तथा च ब्रह्माण्डे–

आषाढ्याः पञ्चमे पक्षे गयामध्याष्टमी स्मृता ।
त्रयोदशी गजच्छाया गया[2] तु पितृपैतृके ॥

इति । अत्रैव नवम्यामन्वष्टकाश्राद्धम् । तत्र कात्यायनः–

अन्वष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतम् ।
पित्रादिमातृमध्यं[3] च ततो मातामहान्तकम् ॥

हेमाद्रौ छागलेयः–

केवलास्तु क्षये कार्याः[4] वृद्धावादौ प्रकीर्तिताः ।
अन्वष्टकासु मध्यस्थाः नान्त्याः कार्याः कदाचन ॥

इति । दीपिकायां तु मातुः श्राद्धमादौ कार्यमित्युक्तं निर्णयामृते मैत्रायणीयगृह्यपरिशिष्टे-

अन्वष्टक्यं गयाप्राप्तौ सत्यां यच्च मृतेऽहनि ।
मातुः श्राद्धं सुतः कुर्यात् पितर्यपि च जीवति ॥

यद्यपि जीवत्पितृकस्य पश्चाप्यन्वष्टकाः नित्यास्तथापि आचारादशक्तस्येयमावश्यकीति केचित् । मातामहचरणैस्तु नवम्यां क्रियमाणं मातुः

---

a. Portion from 'अस्यामेव' to 'पितृपैतृके ।। इति" is omitted in ग;

1. omitted in Mss क and ग. 2. तुल्येति पि–ख. 3. गम्यं–क.

4. चैव-घ.

श्राद्धं प्रतिपदि क्रियमाणं मातामहश्राद्धं च महालयापरपक्षनिमित्तकमेवेति कालतत्त्वविवेचने सप्रपञ्चं[1] निरूपितम् । अत्र स्वमातरि जीवन्त्यामपि सपत्नमातृभ्यो दद्यादित्युक्तमाधुनिकग्रन्थेषु—

> सर्वासामेव मातॄणां श्राद्धं कन्यागते रवौ ।
> नवम्यां हि प्रदातव्यं ब्रह्मलब्धवरा हि ताः ।।

इति । अत्र सर्वासां नामनिर्देशेनैकोऽर्घ्यः पिण्डश्च । नामैक्ये तु द्विवचनादिप्रयोग इति वृत्तिकृत्[2] । भर्तुर्मरणोत्तरं श्राद्धं न कार्यम् 'श्राद्धं नवम्यां कुर्यात्तन्मृते भर्त्तरि लुप्यत" इति वचनादिति केचित् । अन्ये तु एतद्वचनस्य निर्मूलत्वात् कर्तव्यमित्याहुः । [a]मातामहचरणास्तु मृतपितृकेण[3] पितृश्राद्धदिन एव पृथक् पृथग्वा मातृतृप्तेरपि संवादितत्वाज्जीवत्पितृकेणैव कर्तव्यमित्याहुः । सर्वं चैतत् कालतत्त्वविवेचने द्रष्टव्यम्[4] । इदं जीवत्पितृकेणापि सपिण्डकं[5] कार्यम् । हेमाद्रौ विष्णुपुराणे— 'अन्वष्टकादिषु[6] स्त्रीणां श्राद्धं कार्यं तथैव च' इत्युपक्रम्य 'पिण्डनिर्वपणं कार्यं[7] तस्यामपि नृसत्तम!' इत्युक्तत्वात्[8] । [b]तस्यामन्वष्टकायामित्यर्थः । अपिशब्देन तीर्थमहालयप्रत्याब्दिकादीनां[9] ग्रहणम् । तेन गुर्विणीपतेरप्येतेषु पिण्डदानं न भवत्येव । अत्रातिदेशादेव पिण्डदाने प्राप्ते गुर्विणीपतित्वादि-

---

1. सोपपत्तिकमुक्तम्—घ. 2. कारः-घ. a. This sentence is missing in ग. 3. कर्तृकपि-ख. 4. स्पष्टम्-घ. 5. सपिण्डं-क, पिण्डकं--घ. 6. कासु च स्त्री—ख, ग. 7. यंमित्युक्तत्वात्-घ. 8. त्तम्—क. b. This and the 2 sentences followaig it are omitted in Ms घ. 9. कानां-ख.

प्रयुक्तनिषेधप्रतिप्रसवार्थत्वाद्वचनस्य[1] । मातृश्राद्धे[2] सुवासिनीभोजनमुक्तं मार्कण्डेयपुराणे—

मातुः श्राद्धे तु संप्राप्ते ब्राह्मणैः सह भोजनम् ।
सुवासिन्यै प्रदातव्यमिति शातातपोऽब्रवीत् ॥

भोजनं भोज्यमन्नम् ।

भर्तुरग्रे मृता नारी सहदाहेन वा मृता ।
तस्याः स्थाने[3] वियुञ्जीत विप्रैः सह सुवासिनीम्[4] ॥

इति । तत्रैव मदालसावाक्यम्—

स्त्रीश्राद्धे पुत्र! देयाः स्युरलङ्काराश्च योषिते[5] ।
मञ्जीरमेखलादामकर्णिकाकङ्कणादयः ॥

इति । [a] अस्यामेव नवम्यां बिल्वशाखायां देवीप्रबोधनमुक्तं देवीपुराणे—

कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभे दिवा ।
नवम्यां बोधयेद्देवीं गीतवादित्रनिस्वनैः ॥

इनि । अत्रैव त्रयोदश्यां श्राद्धं महाफलं मघायुक्तायां त्वतिप्रशस्तम् । "मघायुक्ताथ तत्रापि शस्ता राजन्! त्रयोदशी"ति वचनात् । अत्र मलमासेऽपि श्राद्धं कार्यम्, अनन्यगतिकत्वात् ।

मघात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकम् ।
अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लु चः ॥

1, स्य च-क, घ । 2. अत्र मा—घ. 3· ने तु यु-ख. 4. नीः-घ. 5· ताम्-ख, तः—घ. a. This sentence and the stanza following it are omitted in Ms. घ

इति काठकगृह्यात्[1] । इदं च युगादिविशेषप्रयुक्तत्वात् पिण्डरहितं कार्यम ।

अयनद्वितये श्राद्धं विषुवद्द्वितये तथा ।
युगादिषु च कर्तव्यं पिण्डनिर्वपणादृते ॥

इति वचनात् । [a]अपिण्डकश्राद्धे विशेषमाह छागलेयः—

पिण्डो यत्र निवर्तेत मघादिषु कथञ्चन ।
संकल्पं तु तथा कार्यं नियमाद् ब्रह्मवादिभिः ॥

संकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणम् ।
नावाहनाग्नौ करणे न पिण्डान्विकिरं[2] न[3] च (?) ॥

अशक्त्या सपिण्डश्राद्धाकरणेऽप्येवमेव ।

अशक्त्या पार्वणश्राद्धं यथावत् कर्तुमक्षमः ।
पिण्डार्घ्यादिविहीनं तु संकल्पश्राद्धमाचरेत् ॥

इति वचनात् । एतच्च पुत्रवतान्तरोद्देशेन न कार्यम् ।

कृष्णपक्षे त्रयोदश्यां यः श्राद्धं कुरुते नरः ।
पञ्चत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितम् ॥

इति वचनात् । अत एव,

यो वाञ्छति नरो मुक्तिं पितृभिः सह चात्मनः ।
असन्तानश्च यस्तस्य श्राद्धे प्रोक्ता त्रयोदशी ॥

---

1 ह्योक्तेः—घ. a. Portion from 'अपिण्डकश्राद्धे' to 'निश्चितम् । इति वचनात्' is omitted in Ms. घ. 2. ण्डान्विक—क. 3. च न—ख

इति नागरखण्डे[1]। तत्रैव,

> अद्यप्रभृति यः श्राद्धं त्रयोदश्यां करिष्यति ।
> कन्यासंस्थे सहस्रांशौ तस्य स्याद् वंशसंक्षयः ॥

इति । बहुभिर्वचनैर्बहुफलार्थतया[2] विहितस्यात्यन्तनिषेधायोगात्‌ विषयभेदे वक्तव्ये पिण्डदानयुक्तत्वरूपविस्तरराहित्यरूपस्तावदेकस्तद्विषयो[3] नागरखण्डे उक्तः—

> अतः श्राद्धं विना देयं तद्दिने मधुपायसम् ।
> खड्गमांसं कालशाकं मांसं वाध्रीणसस्य च ॥
>
> [a] तस्याभावेऽपि दातव्यं क्षीरौदनमनुत्तमम् ।
> तस्मिन्नहनि विप्रेभ्यः पितॄणां तुष्टये नृप ! ॥
> तस्याभावेऽपि दातव्यं जलं तिलविमिश्रितम् ।

इति । अत्र श्राद्धशब्दः पिण्डदानपरः[4], तस्यापि पितृदैवत्यत्वेन श्राद्धशब्द-वाच्यत्वात् । अग्रे ब्राह्मणभोजनस्योक्तत्वेन तन्निषेधासंभवात् । अन्योऽप्येकवर्गोद्देश्यकरूपो[5] निषेधविषयः कार्ष्णाजिनिनोक्तेः[6]—

> श्राद्धं न चैकवर्गस्य त्रयोदश्यामुपक्रमेत् ।
> न तृप्तास्तत्र[7] ते यस्य प्रजां हिंसन्ति तस्य ते ।

इति । एकवर्गस्य पितृवर्गमात्रस्य न कुर्यात् । किन्तु मातामहवर्गस्यापि कुर्यादिति विधेर्विषयः । न च दर्शश्राद्धातिदेशादेव त्रयोदशीश्राद्धे माता-महवर्गस्यापि प्राप्तत्वादेकवर्गोद्देश्यकश्राद्धनिषेधानुपपत्तिः । दर्शश्राद्ध एव

---

1. खण्ड्-क 2. थि ख. 3. स्तावदेतद्वि-ख. a This stanza is missing in Ms. ख. 4. त्र्य पि-ख. 5. कारूक-ग. 6. ने—ग. 7, -स्त-ख.

मातामहश्राद्धानावश्यकत्वस्य मिताक्षराद्यामुक्तत्वात् । तदनावश्यकत्वे तु त्रयोदश्यामेकवर्गश्राद्धनिषेधो वृद्धिश्राद्धादिषु च "षड्भ्यःपितृभ्यस्तदनु श्राद्ध–दानमुपक्रमे"दित्यादिमातामहश्राद्धपुनर्वचनमेम मूलम् । हेमाद्रघुदाहृतवचनेऽपि–

नेच्छेत् त्रयोदशीश्राद्धं पुत्रवान् यः सुतायुषे ।
एकस्यैव न कुर्यात् स पार्वणं तु समाचरेत् ।।

एकस्यैव[1]-एकवर्गस्यैव । पार्वणं- पर्वणि दर्शे क्रियमाणेनामावास्याश्राद्धेन सदृशं[2] षड्देवत्यमित्यर्थः । केचित्तु "न तृप्तास्तत्र[3] ते यस्ये"ति दोषश्रवणात् पितृव्यादीनामपि महालयवत् श्राद्धं कर्तव्यमिति वदन्ति । तद्दूषणं काल-तत्त्वविवेचने द्रष्टव्यम् । तेन कृष्णत्रयोदशीमात्रे "पुत्रवत् गृहिणा त्रयो-दश्यां बहुप्रजा" इति वचनविहितं बहुपुत्रेच्छया श्राद्धं न कर्तव्यम् । भाद्रपदकृष्णत्रयोदश्यां तु पितृवर्गमात्रस्य न कर्तव्यं, किन्तु मातामहवर्गस्यापि । तत्रापि पिण्डदानं न कर्तव्यम् । किन्तु ब्राह्मणभोजनमात्रं मधुघृतक्लृप्त-पायसादिना इति सामान्यविशेषरूपविधिनिषेधवचनानां व्यवस्था सिद्धा । अस्मिन् पक्षे केवलमघापि श्राद्धकालः । तथा च वसिष्ठः—

पिता पितामहश्चैव तथैव प्रपितामहः ।
उपासते सुतं जातं पिप्पलं शकुना इव ।।

मधुमांसैश्च शाकैश्च पयसा पायसेन च ।
एष नो दास्यति श्राद्धं वर्षासु च मघासु च ।।

इति । इदं चाविभक्तैरपि पृथक् कार्यम् । तथा च हेमाद्रौ–

---

1. न वर्गस्य-क, ख. 2. दे-ख.

विभक्ता वाविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः ।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना ॥

इति । नित्यं चात्र श्राद्धम् ।

प्रोष्टपद्यामतीतायां तथा कृष्णा त्रयोदशी । इत्युपक्रम्य,

एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ॥

इति विष्णुधर्मोत्तराच्च । इयमेव योगविशेषेण गजच्छाया । तदुक्तं ब्राह्मे-

योगो मघात्रयोदश्याः कुञ्जरच्छायसंज्ञकः[1] ।
भवेन्मघायां संस्थे च शशिन्यर्के करे स्थिते ॥

इति । अस्मिन्नेव पक्षे चतुर्दश्यां दुर्मरणमृतानां श्राद्धं कार्यम् । तथा च मरीचिः—

विषसर्पश्वापदादितिर्यग्ब्राह्मणघातिनाम् ।
चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हिते ॥

इति । नागरखण्डे—

अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा ।
उपसर्गमृतानां च विषमृत्युमुपेयुषाम् ॥

वह्निना च प्रदग्धानां जलमृत्युमुपेयुषाम् ।
सर्पव्याघ्रहतानां च शृङ्गैरुद्बन्धनैरपि ॥

श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिप!

इति । मार्कण्डेयपुराणे—

---

1. कीर्तितः -ख.

युवानः पितरो यस्य मृताः शस्त्रेण वा हताः ।
तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता ।।

इति । प्रायोनशनाभ्यां मृतानां तु विधितोऽपि भवति । "प्रायोनशनशस्त्राग्निविषोद्बन्धनानम् तथा चतुर्दश्यां भवेच्छ्राद्ध"मिति ब्रह्मपुराणात् । प्रायो महाप्रस्थानं युद्धमृतानां च, 'प्रीयन्ते पितरश्चास्य ये च शस्त्रहता रणे" इति वृद्धमनुस्मरणात् । एतच्च शस्त्रघातादिनिमित्तम् । चतुर्दशीश्राद्धं पित्रादीनामप्येकोद्दिष्टमेव भवति, न तु पार्वणम् । तथा च गार्ग्यः[1]–

चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणात्परम् ।
एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः ।। इति ।

पित्रादित्रिष्वपि[2] शस्त्रहतेषु सर्वेषामेकोद्दिष्टान्येव कार्याणि पार्वणविधायकवचनाभावात् । यत्तु,

पित्रादयस्त्रयो यस्य शस्त्रघातदिभिर्हताः ।
स भूतेः पार्वणं कुर्यादाब्दिकानि पृथक् पृथक् ।।

इति वचनं प्रामाणिकग्रन्थेष्वदर्शनादनाकरम् । इदं चैकोद्दिष्टं सदैव कार्यम् ।

प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः ।
दैवयुक्तं तु तच्छ्राद्धं पितृणामक्षयं भवेत् ।।

इति प्रयोगपारिजातोदाहृतवचनात् । यस्त्वेतस्यामेव चतुर्दश्यां मृतस्तस्य क्षयाहनिमित्तं श्राद्धं पार्वणमेव[3] कर्तव्यम्,

1. गर्गः ख. 2. पितृ त्रि- घ. 3. तत्पार्वणमेव-ख; पार्वणविधिनैव-घ.

[1] अमावास्यां क्षयो यस्य प्रेतपक्षेऽथवा पुनः ।
पार्वणं तस्य कर्तव्यं नैकोद्दिष्टं कदाचन ।।

इति विज्ञानेश्वरधृतवचनात् । अमावास्यायां विशेषमाह अपरार्के यमः–

हंसे करस्थिते या तु अमावास्या करान्विता ।
सा ज्ञेया कुञ्जरच्छाया इति बौधायनोऽब्रवीत् ।। इति ।

अथ आश्विनकृत्यम् ।

आश्विनशुक्लप्रतिपद्यां [2] चाराज्जीवत्पितृकेण दौहित्रेण महालयापरपक्ष-निमित्तकं मातामहश्राद्धं [3] कार्यम् । [4] तदुक्तं हेमाद्रौ–

जातमात्रोऽपि दौहित्रो जीवत्यपि च मातुले ।
कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते ।।

इति त्वनाकरम् । [5] इयं च संगवव्यापिनी ग्राह्या ।

प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणम् ।
श्राद्धं मातामहं कुर्यात्सपिता संगवे सिते ।।

इति वचनादिति निर्णयदीपे । इदमप्यनाकरम् । इदं च "मुण्डनं पिण्डदानं चे"ति दक्षवचनेन जीवत्पितृकं प्रति पिण्डदाननिषेधादन्वष्टकावच्च विशेष-वचनाभावात् पिण्डरहितं कार्यमिति केचित् । अन्ये तु जीवत्पितृकं प्रति [a] पिण्डदानमात्रमनेन निषिध्यते । किन्तु,

---

1. अमायां च क्षयो यस्य प्रेतपक्षे तथैव च–ख. 2. राद् यदि वी-घ. 3. कर्तव्यम्-ख. 4. त........द्रौ-Found only in Ms. घ. 5. This sentence is omitted in Ms. घ. a. Portion from "किन्तु" to "निषिध्यते" (Page 103, line3)} is omitted in Ms. घ.

दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकम् ।
न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणम् ।।

पित्र्यं जीवत्पितुर्नेष्टमिति[1] वचनेनैकवाक्यतया श्राद्धमेव निषिध्यते । तद्वाक्यगतं दर्शादि उपलक्षणम् । एवं च तत्र विशेषवचनप्राप्तं[2] श्राद्धं सपिण्डमेव भवतीत्याहुः ।

अस्यामेव नवरात्रव्रतारंभः । तत्र व्रतस्वरूपं भविष्योत्तरे[3]–

एवं च विन्ध्यवासिन्यां नवरात्रोपवासतः ।
एकभक्तेन नक्तेन स्वशक्त्या याचितेन वा ।।

पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ।
गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने ।।

स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ।
वैश्यैः शूद्रैर्भक्तियुक्तैः[4] म्लेच्छैरन्यैश्च मानवैः ।।

स्त्रीभिश्च कुरुशार्दूल! तद्विधानमिदं श्रृणु । इति ।

देवीपुराणेऽपि–

कन्यासंस्थे रवौ शुक्लामाश्विने प्राप्य नन्दिकाम् ।
अनाशी त्वथवैकाशी नक्ताशी वाथ[5] वाय्वदः ।।

भूमौ शयीत[6] चामन्त्र्य कुमारीर्भोजयेन्मुदा ।
वस्त्रालङ्कारदानैश्च सन्तोष्याः प्रतिवासरम् ।।

बलिं च प्रत्यहं दद्यादोदनं मांसमाषवत् ।
त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः ।।

---

1. [illegible]-क-ख. 2. प्तं स-क, ख, घ. 3. ष्ये-घ. 4. तैः-ग.
5. वा [illegible]ः-घ. 7. वा-ख.

इति[1]। अत्र देवीपूजाप्रधानमुपवासादिकमङ्गम् ।

> पूजयित्वाश्विने मासि विशोको जायते नरः ।
> [a] एवमन्यैरपि सदा देव्याः कार्यं प्रपूजनम् ।।
> विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकम् ।

इत्यादौ पूजाया[2] एव फलसम्बन्धात् । अत्र प्रतिपदः खण्डत्वे केचित्तावत् परविद्धा ग्राह्येत्याहुः । तथा चोक्तं मार्कण्डेयदेवीपुराणयोः[3]—

> पूर्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी ।
> नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता ।।
> देशभङ्गो भवेत्तत्र दुर्भिक्षं चोपजायते ।
> नन्दायां दर्शयुक्तायां यत्र स्यान्मम पूजनम्[4] ।।

इति[5]। तथा[6],

> अमायुक्ता न कर्तव्या प्रतिपत्पूजने मम ।
> मुहूर्तमात्रा कर्तव्या द्वितीया द्विगुणान्विता ।। तथा,
> न दर्शकलया युक्ता प्रतिपच्चण्डिकार्चने ।
> उदये द्विमुहूर्तापि ग्राह्या सोदयगामिनी ।।

इति । शुद्धाधिका तु पूर्वैव ग्राह्या, संपूर्णत्वात् अमायोगाभावाच्च । यदा चामाविद्धा प्रतिपत्परदिने नास्ति तदा विद्धापि ग्राह्या । एतद्विषयाण्येव "अमायुक्ता प्रकर्तव्ये"ति नृसिंहप्रासादोदाहृतानि वचनानि । मातामहचरणैस्तु माधवहेमाद्र्युक्तनक्तव्रतत्वानुरोधेन खण्डाप्रतिपत्प्रदोषव्यापिनी

---

1. omitted in Ms. घ. a. This and the following line are omitted in Ms. घ. 2. omitted in Ms. घ. 3. यपुराणदेवी-घ. 4. स्यात्पूजावं मम-घ. 5. omitted in घ. 6. omitted in घ.

ग्राह्येत्युक्तम् । नक्तव्रतत्वं न नक्तभोजनरूपत्वात् तस्य पाक्षिकत्वादंगत्वाच्च । किन्तु पूजारूपस्य प्रधानस्य नक्तकालसाध्यत्वात् । तच्च "निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यत" इत्यादिसामान्यवचनात् ,

आश्विने मासि मेघान्ते प्रतिपद् या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्वीत[1] रात्रौ देवीं प्रपूजयेत् । तथा,

[a] रात्रिव्रतमिदं देवि! सर्वपापप्रणाशनम् ।
रात्रिव्रतमिदं तस्य रात्रौ कर्तव्यतेष्यते ।।

इत्यादि देवीपुराणादिवचनेभ्यश्चावगम्यते । एवं च पूजारूपस्य प्रधानस्य रात्रिकालत्वे स्थिते "कर्मणो यस्य यः काल" इति वचनात् प्रदोषव्यापिनी प्रतिपन्नवरात्रव्रते ग्राह्या। तत्र पूर्वदिने एव [b] प्रदोषव्याप्तौ पूर्वा । एतद्विषयाण्येव,

अमायुक्तैव कर्तव्या प्रतिपच्चण्डिकार्चने ।
न ग्राह्या परसंयुक्ता शुद्धसन्तानकांक्षिभिः ।।

इति नृसिंहप्रसादोदाहृतवचनानि । तल्लसंहितायामपि,

द्वितीया शेषसंयुक्ता प्रतिपच्चण्डिकार्चने ।
मोहादथोपदेशाद्वा कृता पुत्रविनाशकृत् ।।

आरंभे नवरात्रस्य द्वितीया त्रुटिसम्मिता[2] ।
न केवलं तिथिं हन्ति वेधात्सा पुत्रसंपदम् ।। तथा,

द्वितीयादिकलोपेता प्रतिपच्चण्डिकार्चने ।
वर्जनीया प्रयत्नेन विषलेशो यथाम्भसि ।।

---

1. omitted in Ms. घ. a This line is omitted in Ms. ग.
b Portion from 'प्रदोषव्याप्तौ' to 'राज्यभंगः प्रजायते (page 106) is omitted in Ms. घ, 2. संयुता—ख.

धवलनिबन्धे देव्युवाच—

प्रतिपच्छेषसंयुक्तद्वितीयायां ममार्चनम् ।
कृतं धर्मं नाशयति सन्तति पुत्रपौत्रिकीम् ॥

अमायुक्तैव सा ग्राह्या प्रतिपच्चण्डिकार्चने ।
अन्यथाकरणे[1] तावद्राज्यभंगः प्रजायते ॥ इति ।

दिनद्वये तद्व्याप्तावुत्तरा । दिनद्वये तदव्याप्तावुत्तरैव, सायाह्नरूपगौणकालव्याप्तिलाभात् । [a]एतद्विषयाण्येव द्वितीयायुक्तनिषेधकानि च वचनानि । द्विमुहूर्तापि इत्यपिशब्देन कैमुत्यन्यायप्रदर्शनात्[2] कालादिशब्दा अविरुद्धाः । यत्तु,

आद्यास्तु नाडिकास्त्याज्याः षोडश द्वादशापि वा ।
अपराह्ने च कर्तव्यं शुद्धसन्ततिकांक्षिभिः ॥

इति वचनं, तद्

आद्याः षोडशनाडीस्तु लब्ध्वा यः कुरुते नरः ।
कलशस्थापनं तत्र अरिष्टं जायते ध्रुवम् ॥

इति वचनान्तरैकवाक्यतया कुलाचारप्राप्तकलशस्थापनविषयम्[b] । एवं द्वितीयाविद्धाप्रतिपद्विधायकानि अमायुक्तनिषेधकानि[3] च वचनानि वस्तुतस्तद्विषयाण्येव ।

अमायुक्ता सदा चैव प्रतिपन्निन्दिता तथा ।
तत्र चेत् स्थापयेत् कुंभं दुर्भिक्षं जायते ध्रुवम् ॥

---

1. ख–क, ख. a This sentence and the sentence following it are omitted in Ms. घ. 2. यद-ख. b. "विषयम्।....स्तद्विषयाण्येव"— omitted in Ms. घ. 3 नि वस्तु–ख

प्रतिपत्सद्द्वितीया तु कुंभारोपणकर्मणि ।

इति रुद्रयामलवचनात् । यदपि "प्रारम्भं नवरात्रं स्याद्धित्वा चित्रां च वैधृत"मिति वचनं तदपि,

चित्रा वैधृतियुक्ता चेत् प्रतिपच्चण्डिकार्चने ।
तयोरन्ते विधातव्यं[1] कलशारोपणं गृहे ।।

इति वचनात् कलशस्थापनविषयमेव[2] । तत्र विशेष[3] उक्तः कात्यायनेन–

प्रतिपद्याश्विने मासि भवेद्वैधृतिचित्रयोः ।
आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकम् ।।

भविष्ये–

चित्रा वैधृतिसंयुक्ता प्रतिपच्चेद्भवेन्नृप! ।
त्याज्याः ह्यंशा[4]स्त्रयस्त्वाद्यास्तुरीयांशे[5] तु पूजनम् ।।

इति । तथा[a] रुद्रयामले–

संपूर्णा प्रतिपद्यैव चित्रायुक्ता यदा भवेत् ।
वैधृत्या वापि युक्ता[5] स्यात्तदा माध्यन्दिने रवौ ।।
अभिजित्तु मुहूर्तं यत्तत्र स्थापनमिष्यते ।

इति । तथा,

न रात्रौ स्थापनं कार्यं न च कुंभाभिषेचनम् ।

विष्णुधर्मे–

भास्करोदयमारभ्य यावत्तु दश नाडिकाः ।
प्रातःकाल इति प्रोक्तः[6] स्थापनारोपणादिषु ।।

---

1. प्रकर्तव्यं–घ. 2. नमेव विषयम्–क. 3. यमाह दुर्गोत्सवे कात्यायनः–घ. 4. स्त्वंशा–घ. a. 'तथा रुद्र" to 'स्थापनमिष्यते, इति' । omitted in Ms. घ. 5. सा त––क. 6. क्यातः–ग.

इति । रुद्रयामले—

स्नानं माङ्गलिकं कृत्वा ततो देवीं प्रपूजयेत् ।
शुभाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकाम् ।।
यवान् वै वापयेत्तत्र गोधूमैश्चापि संयुतान् ।
तत्र संस्थापयेत् कुंभं विधिना मन्त्रपूर्वकम् ।।
सौवर्णं राजतं वापि ताम्रं मृण्मयजं तु वा ।

इति । देवीपूजा च जयन्तीमन्त्रेण कार्या ।

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते ।।
अनेनैव तु मन्त्रेण जपहोमादि कारयेत् ।

इति देवीपुराणात् । दुर्गालिङ्गको[1] वैदिक आगमिको वा ।

तल्लिङ्गैः पूजयेन्मन्त्रैः सर्वदेवान् समाहितः ।

इत्यग्निपुराणात् ।

'प्रणवादिचतुर्थ्यन्तं नमोन्तं देवताम[2] वा ।
नाम्ना सर्वं समापयेद्' इति साधारणवाक्यात्[3] । पूजा च षोडशोपचारैः पञ्चोपचारैरन्यैश्च राजोपचारैश्छत्रचामरादिभिः । सा च त्रिकालं प्रदोषे विशेषेण । पूजानन्तरं च मार्कण्डेयपुराणादिगतं देवीमाहात्म्यं पठेच्छृणुयाद्वा ।

माहात्म्यं भगवत्याश्च पुराणादिषु कीर्तितम् ।
पठेद्वा[4] शृणुयाद्वापि सर्वकामसमृद्धये ।।

इति वचनात् । तथा,

1. कैर्वैदिकैरागमिकैर्वा—ख. 2. नामवाचि वा—क, ग. 3. वचनात्-ख.
4. श्च—ख, घ.

एकोत्तराभिवृद्धा तु नवमी यावदेव हि ।
चण्डीपाठं पठेद्वापि[1] जापयेद्वा विधानतः ॥

इति । श्रवणं च ब्राह्मणादेव कर्तव्यम्, ।
"वाचकं ब्राह्मणं विद्यान्नान्यवर्णजमादरात्" ।
इति भविष्यपुराणात् । पौराणस्तोत्रपाठश्च नारयणादीन् नमस्कृत्य कर्तव्यम् ।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

इति वचनात् । जयशब्दार्थश्च भविष्ये–

अष्टादशपुराणानि रामस्य चरितं तथा ।
विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत! ॥

कार्त्स्नं च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
शैवाश्च धर्मा राजेन्द्र! मानवोक्ता महीपते ॥

जयेति नाम एतेषां प्रवदन्ति मनीषिणः ।

इति । पाठप्रकारश्च मत्स्यसूक्ते–

आदौ च प्रणवं स्तोत्रं वा संहितां पठेत् ।
अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः ॥

सर्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत् ।
शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः ॥

न कार्यासक्तमनसा कार्यं स्तोत्रस्य वाचनम् ।
आधारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः ॥

---

1. जपेद्वापि–ग, पठेच्चापि–घ.

हस्तसंस्थापनादेव यस्मादल्पफलं भवेत् ।

[a] स्वयं च लिखितं यत्तु कविना लिखितं च यत् ॥

अब्राह्मणेन लिखितं तच्चापि लिखितं भवेत् ।
ऋषिच्छन्दादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः ॥

स्तोत्रेण दृश्यते यत्र प्रणवन्यासमाचरेत् ।
साङ्कल्पिकस्तोत्रपाठे[1] संख्यां कृत्वा पठेत् सुधीः ॥

अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ।
कृते विरामे मध्ये तु अध्यायादि पठेत् पुनः ॥

इति । दुर्गामन्त्रं वैदिकमागमिकं वा जपेज्जापयेद्वा ।

दुर्गाग्रतो जपेन्मन्त्रमेकचित्तः समाहितः ।

इति देवीपुराणात् । कुमारीपूजनं च प्रत्यहं यथाशक्ति एकद्वयादिक्रमेण कार्यम् । तत्प्रकारश्च देवीपुराणे—

ब्रह्मोवाच—

न तथा तुष्यते शक्र! होमदानजपेन तु ।
कुमारीभोजनेनात्र यथा देवी प्रसीदति ॥ अत्र—नक्तान्ते ।

प्रक्षाल्य पादौ सर्वासां कुमारीणां च वासव! ।
सुलिप्ते भूतले रम्ये तत्र ता आसने स्थिताः ॥

पूजयेद् गन्धपुष्पैश्च स्रग्भिश्चापि मनोरमैः ।
पूजयित्वा विधानेन भोजनं तासु दापयेत् ॥

---

a. This and the succeeding line are omitted in Ms. ख.
1. सङ्कल्पितस्तो–क, सङ्कल्पिते स्तोत्र–घ.

[illegible]डणीखण्ड[illegible]गुडं [illegible]त्रिक्षीरं [illegible]क्षिपत् । [illegible]
तासां देयं कुमारीणां शनै[illegible] [illegible]

पानीयं याचितं देयमन्नं वा याचितं शुभम् ।
तास्तृप्तास्तु यदा सर्वास्तदा त्वाचमनं दद्देत् ॥

आचम्य चाक्षतान् [illegible] [illegible] [illegible] ।
दातुः शिरसि दातव्याः कन्यकाभिरथाक्षताः ॥

तेनापि प्रणिपातस्तु कर्तव्यो भक्तिपूर्वकः ।
अनेन विधिना शक्र! देवी क्षिप्रं प्रसीदति ॥

ददाति विविधान् कामान् मनोभीष्टान् सुराधिप! ।
राज्यं कृत्वा ततः पश्चाद्देवलोकं च गच्छति ॥

इति । स्कान्दे—

एकैकां पूजयेत् कन्यामेकवृद्धया तथैव च ।
द्विगुणं त्रिगुणं वापि प्रत्येकं नवकं वरम् ॥

नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु ।
एकवृद्धया लभेत् क्षेममेकैकेन श्रियं लभेत् ॥

एकवर्षा तु या कन्या पूजार्थं तां विवर्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥

द्विवर्षकन्यामारभ्य दशवर्षावधि क्रमात् ।

---

2. स-ग.

तासां च क्रमेण कुमारिका त्रिमूर्तिः कल्याणी रोहिणी काली चण्डिका शाम्भवी दुर्गा सुभद्रेति नामान्युक्तानि स्कान्दे—

कुमारिका द्विवर्षा तु[1] त्रिवर्षा तु त्रिमूर्तिनी ।
चतुर्वर्षा तु कल्याणी पञ्चवर्षा तु रोहिणी ॥

षड्वर्षा तु भवेत् काली सप्तवर्षा तु चण्डिका ।
अष्टवर्षा शाम्भवी तु दुर्गा तु नवमी स्मृता ॥

दशवर्षा सुभद्रेति नामभिः परिकीर्तिता ।
अत ऊर्ध्वं तु या कन्याः सर्वकार्येषु वर्जिताः ॥

आसां क्रमेण फलान्याह स एव—

दुःखदरिद्र्यनाशाय शत्रूणां नाशनाय च ।
आयुष्यबलवृद्ध्यर्थं कुमारीः पूजयेन्नरः ॥

[a] आयुष्कामस्त्रिमूर्तिं तु त्रिवर्गस्य फलाप्तये ।
अपमृत्युव्याधिपीडादुःखानामपवृत्तये ॥

सौख्यधान्यधनारोग्यपुत्रपौत्राभिवृद्धये ।
कल्याणीं पूजयद्धीमान् नित्यं कल्याणवृद्धये ॥

आरोग्यसुखकामी तु धनकामस्तथैव च ।
यशःकामी नरो नित्यं रोहिणीं परिपूजयेत् ॥

विद्यार्थी च जयार्थी च राज्यार्थी च विशेषतः ।
शत्रूणां च विनाशार्थी कालिकां पूजयेन्नरः ॥

---

1. ब–ग. a. This stenza is omitted in Ms. ब.

संग्रामे जयकामी च चण्डिकां परिपूजयेत् ।
दुःखदारिद्र्यनाशाय नृपस्योन्नयनाय च ।

महापापविनाशाय शाम्भवीं च प्रपूजयेत्[1] ।
सर्वलोकस्य शत्रूणामुग्रसाधनकर्मणि ।।

दुर्गां दुर्गतिनाशाय पूजयेद् यत्नतो बुधः ।
सौभाग्यधनधान्यादिवाञ्छितार्थफलाप्तये ।।

सुभद्रां पूजयेन्मर्त्यो दासीदासविवृद्धये ।

पूजाप्रकारश्च तत्रैव[2] उक्तः—

प्रातःकाले विशेषेण कृताभ्यंगो विशेषतः ।
आवाहयेत्ततः कन्यां मन्त्रेणानेन भार्गव! ।।

मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं ।
नवदुर्गात्मिकां[3] साक्षात् कन्यामावाहयाम्यहम् ।।

इत्यावाहनमन्त्रः—

ततः संपूजयेद्धीमान् मन्त्रैरेभिः पृथक् पृथक् ।

पूजामन्त्राः[4]—

जगत्पूज्ये! सर्ववन्द्ये! सर्वशक्तिस्वरूपिणि! ।
पूजां गृहाण कौमारि! जगन्मातर्नमोऽस्तु ते ।। कुमार्याः ।।

त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीम् ।
त्र्यैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ।। त्रिमूर्तेः ।।

---

1. परिपू–घ. 2. नित्य उ–क. 3. म्बि–घ. 4. न्त्रः–ख.

कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ।
कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहम् ।। कल्याण्याः ।।

अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ।
अनन्तशक्तिकां देवीं रोहिणीं पूजयाम्यहम् ।। रोहिण्याः ।।

कामचारां शुभांकां तां कालचक्रस्वरूपिणीम् ।
कामदां करुणोदारां कालीं सम्पूजयाम्यहम् ।। काल्याः ।।

चण्डचारां चण्डमायां चण्डमुण्डप्रभञ्जनीम् ।
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ।। चण्डिकायाः ।।

सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ।
सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम् ।। शाम्भव्याः ।।

दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्तया दुर्गां दुर्गतिनाशिनीम् ।। दुर्गायाः ।।

सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ।
सुभद्रां जननीं देवीं सुभद्रां पूजयाम्यहम् ।। सुभद्रायाः ।।

एवमभ्यर्चनं कुर्यात् कुमारीणां प्रयत्नतः ।
कञ्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ।।

नानाविधैर्भक्ष्यभोज्यैर्भोजयेत् पायसादिभिः ।
हीनाधिकाङ्गीं कुष्ठादिविकारां कुकुलां तथा ।।

ग्रन्थिस्फुटितगर्भाङ्गीं रक्तपूयव्रणाङ्किताम् ।
जात्यन्धां केकरीं काणां कुरूपां तनुरोमशाम् ।।

एकवं[1]शसमुद्भूतां कन्यां सम्यग् प्रपूजयेत् ।

1. वं वं–ख.

ब्राह्मणीं सर्वकार्येषु जयार्थे[1] नृपवंशजाम् ॥

लाभार्थे[2] वैश्यवंशोत्थां सुतार्थे[3] शूद्रवंशजाम् ।

दारणे चान्त्यजातीयां पूजयेद्विधिना नरः ॥

इति । क्वचित्तु सर्वासामेक एव मन्त्र उक्तः[4]–

मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ॥

नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ।

इति । अत्र वेदपारायणमुक्तं रुद्रयामले–

एवं चतुर्वेदविदो विप्रान् सर्वान् प्रसादयेत् ।
[5]तेषां च वरणं कार्यं वेदपारायणाय[6] वै ॥

तथा देवीपुराणे–

यदाद्ये दिवसे कुर्याच्चण्डिकापूजनादिकम् ।
द्विगुणं तद् द्वितीयेऽह्नि त्रिगुणं तत्परेऽहनि ॥

नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ।

इति । अशक्तौ पूजादिकमन्येन करणीयम् ।

स्वयं वाप्यन्यतो वापि पूजयेत् पूजयेत वा ।

इति देवीपुराणात् । इदं च शुक्रास्तादावपि कार्यम् ।

नष्टे शुक्रे तथा जीवे सिंहस्थे च बृहस्पतौ ।
कार्या चैव स्वदेवार्चा प्रत्यहं कुलधर्मतः ॥

---

1. वं–क 2. वं–ख. 3. वं–ख 4. omitted in Ms. ग. 5. एतेषां च–ख. 6. णाय वा–ग; णाय च–घ.

इति धर्मप्रदीपात् । अत्र [1] साश्वसाश्वपूजनमुक्तं [illegible] देवीपुराणे-

अश्वयुक्शुक्लप्रतिपत्स्वातियुक्ते सुशोभने ।
पूर्वमुच्चैःश्रवा [2] नाम प्रथमं सूर्यमावहत् ॥

तस्मात् साश्वैर्नरैस्तत्र पूज्योऽसौ श्रद्धयान्वितैः ।
पूजनीयाश्च तुरगा नवमीं यावदेव हि ॥

शान्तिस्वस्त्ययनं कार्यं तदा तेषां दिने दिने ।
धान्यं भल्लातकं कुष्ठं वचासिद्धार्थकांस्तथा ॥

पञ्चरंगेण सूत्रेण कण्ठे तेषां तु बन्धयेत् ।
वायव्यैर्वारुणैः सौरैः शक्तैर्यन्त्रैः सवैष्णवैः ॥

वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिने दिने ।
तुरगा रक्षणीयास्तु पुरुषैः शस्त्रपाणिभिः ॥

दारिद्र्यतः क्वचित्तत्र न च वाह्याः कथञ्चन ।

इति । तथा,

ज्येष्ठा येऽपि पुरा तत्र गजाश्चाष्टौ महाबलाः ।
पृथिवीमावहन् पूर्वं सशैलवनकाननाम् ॥

कुमुदै[3]रावतः पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलस्तस्मात्तांस्तत्र पूजयेत् ॥

शाक्रादृक्षात्समारभ्य नवम्यन्तं च पूर्ववत् ।

इति । [a] अत्रैव प्रतिपदाद्य[4]ष्टमीपर्यन्तं जयार्थिना नृपेण लोहाभिसारिकाख्यं[5] कर्म कर्तव्यम् । तथा च भविष्योत्तरे—

---

1. मसे अश्व—घ. 2. जातो प्र-ख. 3. द:—ख, घ. a. From "अत्रैव" to "मन्त्रपूर्वकम् । इति" (Page117) omitted in Ms. घ.
4. दाष्ट—क, ग. 5. ख्यं कर्त—क, ग.

जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात् ।
लोहाभिसारिकं कर्म कारयेद् यावदष्टमीम् ॥

प्रागुदक् प्रवणे देशे पताकाभिरलंकृतम् ।
मण्डपं कारयेद्दिव्यं नवसप्तकरं शुभम् ॥

षोडशकरमित्यर्थः ।

आग्नेय्यां कारयेत्कुण्डं हस्तमात्रं सुशोभनम् ।
मेखलात्रयसंयुक्तं योन्याश्वत्थदलाभया ॥

राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ।
आनीय मण्डपे तानि सर्वाण्येवाधिवासयेत् ॥

ततस्तु ब्राह्मणैः स्नातः शुक्लाम्बरधरः शुचिः ।
ॐकारपूर्वकैर्मन्त्रैस्तल्लिङ्गैर्जुहुयाद् घृतम् ॥

लोहनामाभवत् पूर्वं दानवः सुमहाबलः ।
स देवैः समरे क्रुद्धैः बहुधा शकलीकृतः ॥

तदङ्गसंभवं सर्वं लोहं यद् दृश्यते क्षितौ ।
लोहाभिसारिकं कर्म तेनैतदृषिणा स्मृतम् ॥

शस्त्रास्त्रमन्त्रैर्होतव्यं पायसं घृतसंयुतम् ॥
हुतशेषं तुरंगाणां राजान्नमुपहारयेत् ।

बद्धपर्याणकान् तत्र गजाश्वान् समलंकृतान् ।
भ्रामयेन्नगरे नित्यं नन्दिघोषपुरःसरान्[1] ॥

---

1. वाद्यघो–ख.

प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः ।
पूजयेद्राजचिह्नानि फलमाल्यानुलेपनैः ॥

हुतशेषं प्रदातव्यमौपनायनिके गजे ।
तस्याभिहरणाद्राज्ञो विजयः समुदाहृतः ॥

पूजामन्त्रान् प्रवक्ष्यामि पुराणोक्तानहं तव ।
यैः पूजिता प्रयच्छन्ति कीर्तिमायुर्यशोबलम् ॥

a
छत्रमन्त्रः—

यथा चन्द्रश्छादयति शिवायेमां वसुन्धराम् ।
तथा च्छादय राजानं विजयारोग्यवृद्धये ॥

चामरमन्त्रः—

शशाङ्ककरसङ्काश![1] क्षीरडिण्डीरपाण्डुर![2] ।
प्रोत्सारयाशु दुरितं चामरामरदुर्लभ! ॥

b
तत्र प्रथमं रेवंतपूजा सदाचारात् कर्तव्या ।

पूजामन्त्रः—

नमो देवादिदेवाय तुरंगबलचारिणे ।
सूर्यपुत्राय देवाय तुरंगाणां हिताय च ॥

तुरंगपरिषद्यस्य नृपतेः परिधावति ।
सस्वर्गं साधिपं रक्ष शरणं त्वां व्रजाम्यहम् ॥

---

a. In mss क and ग the names of Mantras are written in the end of each of them. 1. शशिनः कर—क, ग. 2. हिमडि—क, ग.

b. From 'तत्र' to 'अथाश्वपूजा'— omitted in Mss. क and ग.

मन्त्रान्तरम्–

सूर्यपुत्र! महाबाहो! छायाहृदयनन्दन!
शान्तिं कुरु तुरंगाणां देवंताय नमोऽस्तु ते ॥

अथाश्वपूजा । अश्वमन्त्रः–

गन्धर्वकुलजातस्त्वं मा भूयाः कुलदूषकः ।
ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥

प्रभावाच्च हुताशस्य वर्धयस्व तुरंगमान् ।
तेजसा चैव सूर्यस्य मुनीनां तपसा तथा ।

रुद्रस्य ब्रह्मवीर्येण पवनस्य बलेन च ॥
स्मर त्वं राजपुत्रत्वं च कौस्तुभं च मणिं स्मर ।

यां गतिं पितृहा गच्छेत् मातृहा भ्रूणहा तथा ॥
भूमिहानृतवादी च क्षत्रियश्च पराङ्मुखः ।

सूर्याचन्द्रमसौ वायुर्यावत् पश्यन्ति दुष्कृतम् ॥
व्रज त्वं तां गतिं क्षिप्रं तव पापं भवेत्तदा ।

निष्कृतो यदि वा छन्नो[1] युद्धे[2]ऽध्वनि तुरंगम! ॥
रिपून् विजित्य समरे सह भर्त्रा सुखी भव ॥

ध्वजमन्त्रः-

---

1. छि–ग. 2. द्धा–ख.

शक्रकेतो! महावीर्य! श्यामवर्णार्चयाम्यहम् ।
पतत्रिन्! वैनतेय! त्वं तथा नारायणध्वज! ।।

काश्यपेयामृतत्रातर्नागारे! विष्णुवाहन! ।
अप्रमेय! दुराधर्ष! रणे देवारिसूदन! ।।

गरुत्मन्! मारुतगतिस्त्वयि सन्निहिता यतः ।
अस्त्रचर्मायुधान्यत्र रक्ष त्वं च रिपून् दह ।।

गजमन्त्रः—

कुमुदैरावणः पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नील एते वै देवयोनयः ।।

तेषां पुत्राश्च पौत्रश्च वनान्यष्टौ समाश्रिताः ।
भद्रो मन्दो मृगश्चैव राजा संकीर्ण एव च ।।

वने वने प्रसूतास्ते स्मरयोनिं महागजाः ।

यूथानि सुमहान्ति च — इति मदनरत्ने पाठः ।

पान्तु त्वा वसवो रुद्रा आदित्याः समरुद्गणाः ।।

भर्तारं रक्ष नागेन्द्र! स्वामी च प्रतिपाल्यताम् ।
अवाप्नुहि जयं युद्धे गमने स्वस्ति नो व्रज ।।

श्रीस्ते सोमाद् बलं विष्णोस्तेजः सूर्याज्जवोऽनिलात् ।
युद्धं रक्षन्तु नागाश्च दिशश्च सह दैवतैः ।।

अश्विनौ सह गन्धर्वैः पान्तु त्वां सर्वतः सदा ।

पताकामन्त्रः—

हुतभुग् वासवो रुद्रा वायुः सोमो महर्षयः ।
नागकिन्नरगन्धर्वा यक्षभूतगणा ग्रहाः ।।

प्रमत्तास्तु महादेव्यो भूतेशो मातृभिः सह ।
शक्रसेनापतिः स्कन्दो वरुणश्चाश्रितास्त्वयि ।।

प्रदहन्तु रिपून् सर्वान् राजा विजयमृच्छतु ।
यानि प्रयुक्तान्यरिभिर्दूषणानि समन्ततः ।।

पतन्तूपरि शत्रूणां हृतानि तव तेजसा ।।
कालनेमिवधे यद्वत्तद्वत् त्रिपुरघातने ।।

हिरण्यकशिपोर्युद्धे युद्धे देवासुरे तथा ।
शोभितासि तथैवाद्य शोभया समरे स्मर ।।

नीलां श्वेतामिमां[1] दृष्ट्वा नश्यन्त्वाशु नृपारयः ।
व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः ।।

पूतना रेवती गौरी कालरात्रीति या स्मृता ।
दहत्वाशु रिपून् सर्वान् पताके! त्वं[2] मया स्मृता ।।

खड्गमन्त्रः—

असिर्विशसनः खड्गो विकर्मा च दुरासदः ।
श्रीगर्भो विजयश्चैव धर्माधारस्तथैव च ।।

इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा ।
कृत्तिका ऋक्षमाहुस्ते गुरुर्देवो महेश्वरः ।।

हिरण्यं च शरीरं ते धाता देवो जनार्दनः
पिता पितामहो देवस्तन्मां पालय सर्वदा ।।

---

1. ब–घ. 2. याचिता–ख

तासां च क्रमेण कुमारिका त्रिमूर्तिः कल्याणी रोहिणी काली चण्डिका शाम्भवी दुर्गा सुभद्रेति नामान्युक्तानि स्कान्दे—

कुमारिका द्विवर्षा तु त्रिवर्षा तु त्रिमूर्तिनी[1] ।
चतुर्वर्षा तु कल्याणी पञ्चवर्षा तु रोहिणी ॥

षड्वर्षा तु भवेत् काली सप्तवर्षा तु चण्डिका ।
अष्टवर्षा शाम्भवी तु दुर्गा तु नवमी स्मृता ॥

दशवर्षा सुभद्रेति नामभिः परिकीर्तिता ।
अत ऊर्ध्वं तु या कन्याः सर्वकार्येषु वर्जिताः ॥

आसां क्रमेण फलान्याह स एव—

दुःखदरिद्र्यनाशाय शत्रूणां नाशनाय च ।
आयुष्यबलवृद्ध्यर्थं कुमारीः पूजयेन्नरः ॥

[a] आयुष्कामस्त्रिमूर्तिं तु त्रिवर्गस्य फलाप्तये ।
अपमृत्युव्याधिपीडादुःखानामपवृत्तये ॥

सौख्यधान्यधनारोग्यपुत्रपौत्राभिवृद्धये ।
कल्याणीं पूजयद्धीमान् नित्यं कल्याणवृद्धये ॥

आरोग्यसुखकामी तु धनकामस्तथैव च ।
यशःकामी नरो नित्यं रोहिणीं परिपूजयेत् ॥

विद्यार्थी च जयार्थी च राज्यार्थी च विशेषतः ।
शत्रूणां च विनाशार्थी कालिकां पूजयेन्नरः ॥

---

1. ख–ग. a. This stenza is omitted in Ms. ख.

संग्रामे जयकामी च कालिकां प्रपूजयेत् ।
दुःखदारिद्र्यनाशाय नृपवश्यमोहनाय च ।

महापापविनाशाय शाम्भवीं[1] च प्रपूजयेत् ।
सर्वलोकैकशत्रूणामुग्रसाधनकर्मणि ।।

दुर्गां दुर्गतिनाशाय पूजयेद् यत्नतो बुधः ।
सौभाग्यधनधान्यादिवाञ्छितार्थफलाप्तये ।।

सुभद्रां पूजयेन्मर्त्यो दासीदासविवृद्धये ।

पूजाप्रकारश्च तत्रैव[2] उक्तः—

प्रातःकाले विशेषेण कृताभ्यंगो विशेषतः ।
आवाहयेत्ततः कन्यां मन्त्रेणानेन भार्गव! ।।

मन्त्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीं ।
नवदुर्गात्मिकां[3] साक्षात् कन्यामावाहयाम्यहम् ।।

इत्यावाहनमन्त्रः—

ततः संपूजयेद्धीमान् मन्त्रैरेभिः पृथक् पृथक् ।

पूजामन्त्राः[4]—

जगत्पूज्ये! सर्ववन्द्ये! सर्वशक्तिस्वरूपिणि! ।
पूजां गृहाण कौमारि! जगन्मातर्नमोऽस्तु ते ।। कुमार्याः ।।

त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीम् ।
त्र्यैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ।। त्रिमूर्तेः ।।

---

1. चरिपू—घ. 2. नित्य उ—क. 3. म्बि—घ. 4. न्त्रः—ख.

कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ।
कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहम् ।। कल्याण्याः ।।

अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ।
अनन्तशक्तिकां देवीं रोहिणीं पूजयाम्यहम् ।। रोहिण्याः ।।

कामचारां शुभांकां तां कालचक्रस्वरूपिणीम् ।
कामदां करुणोदारां कालीं सम्पूजयाम्यहम् ।। काल्याः ।।

चण्डचारां चण्डमायां चण्डमुण्डप्रभञ्जनीम् ।
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ।। चण्डिकायाः ।।

सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ।
सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम् ।। शाम्भव्याः ।।

दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्तया दुर्गां दुर्गतिनाशिनीम् ।। दुर्गायाः ।।

सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ।
सुभद्रां जननीं देवीं सुभद्रां पूजयाम्यहम् ।। सुभद्रायाः ।।

एवमभ्यर्चनं कुर्यात् कुमारीणां प्रयत्नतः ।
कञ्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ।।

नानाविधैर्भक्ष्यभोज्यैर्भोजयेत् पायसादिभिः ।
हीनाधिकाङ्गीं कुष्ठादिविकारां कुकुलां तथा ।।

ग्रन्थिस्फुटितगर्भाङ्गीं रक्तपूयव्रणाङ्किताम् ।
जात्यन्धां केकरीं काणां कुरूपां तनुरोमशाम् ।।

एकवंशसमुद्भूतां[1] कन्यां सम्यग् प्रपूजयेत् ।

---

1. वं वं—ख.

ब्राह्मणीं[1] सर्वकार्येषु जयार्थे नृपवंशजाम् ॥

लाभार्थे वैश्यवंशोत्थां[2] सुतार्थे[3] शूद्रवंशजाम् ।

दारणे चान्त्यजातीयां पूजयेद्विधिना नरः ॥

इति । क्वचित्तु सर्वासामेक एव मन्त्र उक्तः[4]–

मन्त्राक्षरमयीं लक्ष्मीं मातृृणां रूपधारिणीम् ॥

नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ।

इति । अत्र वेदपारायणमुक्तं रुद्रयामले–

एवं चतुर्वेदविदो विप्रान् सर्वान् प्रसादयेत् ।

तेषां[5] च वरणं कार्यं वेदपारायणाय[6] वै ॥

तथा देवीपुराणे–

यदाद्ये दिवसे कुर्याच्चण्डिकापूजनादिकम् ।

द्विगुणं तद् द्वितीयेऽह्नि त्रिगुणं तत्परेऽहनि ॥

नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ।

इति । अशक्तौ पूजादिकमन्येन करणीयम् ।

स्वयं वाप्यन्यतो वापि पूजयेत् पूजयेत वा ।

इति देवीपुराणात् । इदं च शुक्रास्तादावपि कार्यम् ।

नष्टे शुक्रे तथा जीवे सिंहस्थे च बृहस्पतौ ।

कार्या चैव स्वदेवार्चा प्रत्यहं कुलधर्मतः ॥

---

1. थं–क 2. थं–ख. 3. थं–ख 4. omitted in Ms. ग. 5. एतेषां च–ख. 6. णाय वा–ग; णाय च–घ.

इति धर्मप्रदीपात् । अत्र साश्वपूजनमुक्तं [1] [illegible] देवीपुराणे-

अश्वयुक्शुक्लप्रतिपत्स्वातियुक्ते सुशोभने ।
पूर्वमुच्चैःश्रवा [2] नाम प्रथमं सूर्यमावहत् ।।

तस्मात् साश्वैर्नरैस्तत्र पूज्योऽसौ श्रद्धयान्वितैः ।
पूजनीयाश्च तुरगा नवमीं यावदेव हि ।।

शान्तिस्वस्त्ययनं कार्यं तदा तेषां दिने दिने ।
धान्यं भल्लातकं कुष्ठं वचासिद्धार्थकांस्तथा ।।

पञ्चरंगेण सूत्रेण कण्ठे तेषां तु बन्धयेत् ।
वायव्यैर्वारुणैः सौरैः शाक्तैर्यन्त्रैः सवैष्णवैः ।।

वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिने दिने ।
तुरगा रक्षणीयास्तु पुरुषैः शस्त्रपाणिभिः ।।

दारिद्र्यतः क्वचित्तत्र न च वाह्याः कथञ्चन ।

इति । तथा,

ज्येष्ठा येऽपि पुरा तत्र गजाश्चाष्टौ महाबलाः ।
पृथिवीमावहन् पूर्वं सशैलवनकाननाम् ।।

कुमुदैरावतः [3] पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलस्तस्मात्तांस्तत्र पूजयेत् ।।

शाक्राद्वृक्षात्समारभ्य नवम्यन्तं च पूर्ववत् ।

इति । [a] अत्रैव प्रतिपदाद्यष्टमीपर्यन्तं [4] जयार्थिना नृपेण लोहाभिसारिकाख्यं [5] कर्म कर्तव्यम् । तथा च भविष्योत्तरे—

---

1. मस्ते अश्व—घ. 2. जातो प्र—ख. 3. वः—ख, घ. a. From "अत्रैव" to "मन्त्रपूर्वकम् । इति" (Page117) omitted in Ms. घ.
4. दाष्ट—क, प. 5. ख्यं कर्त—क, ग.

जयाभिलाषी नृपतिः प्रतिपद्प्रभृति क्रमात् ।
लोहाभिसारिकं कर्म कारयेद् यावदष्टमीम् ॥

प्रागुदक् प्रवणे देशे पताकाभिरलंकृतम् ।
मण्डपं कारयेद्दिव्यं नवसप्तकरं शुभम् ॥

षोडशकरमित्यर्थः ।

आग्नेय्यां कारयेत्कुण्डं हस्तमात्रं सुशोभनम् ।
मेखलात्रयसंयुक्तं योन्याश्वत्थदलाभया ॥

राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ।
आनीय मण्डपे तानि सर्वाण्येवाधिवासयेत् ॥

ततस्तु ब्राह्मणैः स्नातः शुक्लाम्बरधरः शुचिः ।
ॐकारपूर्वकैर्मन्त्रैस्तल्लिङ्गैर्जुहुयाद् घृतम् ॥

लोहनामाभवत् पूर्वं दानवः सुमहाबलः ।
स देवैः समरे क्रुद्धैः बहुधा शकलीकृतः ॥

तदङ्गसंभवं सर्वं लोहं यद् दृश्यते क्षितौ ।
लोहाभिसारिकं कर्म तेनैतदृषिणा स्मृतम् ॥

शस्त्रास्त्रमन्त्रैर्होतव्यं पायसं घृतसंयुतम् ॥
हुतशेषं तुरंगाणां राजान्नमुपहारयेत् ।

बद्धपर्याणकान् तत्र गजाश्वान् समलंकृतान् ।
भ्रामयेन्नगरे नित्यं नन्दिघोषपुरःसरान्[1] ॥

1. वाद्यघो–ख.

इति । अत्राष्टचत्वारिंशद्दूर्वांकुरान्[1] हस्ते गृहीत्वा मंत्रेण पूजयेदित्युक्त्या "एवमेवंविधां पूजामष्टाचत्वारिंशद्वारं समाचरे"दिति वचनादेकैकावृत्तौ अष्टचत्वारिंशद् दूर्वाः विज्ञायन्ते । "स्वयमधात्तदेवान्नम्" इति अन्नान्तर-[2] परिसंख्या क्रियते । न च तैदोष्यम्, एवकारेणान्यनिवृत्तेरुक्तत्वात् । "अत्र ह्येवापतन्तीतिवत्" । अत्र केचित् "व्रतस्यास्य फलं प्रोक्तं जागरे मुनिसत्तमे"ति वचनात् जागरणं प्रधानं तत्र रात्रिव्यापिनी ग्राह्येति । वस्तुतस्तु व्रतस्य जागरभिन्नत्वेन प्रतीतेस्तस्यैव जागरे सति फलसम्बन्धाभिधानात् तस्यांगत्वमेव । वचनं तु इतरांगापेक्षयावश्यकत्वद्योतनार्थम् । "युगभूताना"मिति युग्मवाक्यात् ।

चतुर्थीसंयुता कार्या पञ्चमी परया न तु ।
दैवकर्मणि पित्र्ये च शुक्लपक्षे तथा सिते ।

इति हारीतवचनात्,

भुक्त्वा जागरणे नक्ते चन्द्राद्यर्धव्रते[3] तथा ।
ताराव्रतेषु सर्वेषु रात्रियोगो विशिष्यते ।।

इति वचनाच्च पूर्वविद्धा[a] ग्राह्येति वक्तुं युक्तम् । मम तु प्रतिभाति,[b] 'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथि'रिति वचनान्मध्याह्नव्यापिनी ग्राह्या । उभयत्र[4] तथात्वे अतथात्वे वा पूर्वोदाहृतवचनेभ्यः पूर्वेति ।

आश्विनशुक्लसप्तमी बृहत्कल्पादिः । अस्मिन् पक्षे मूलनक्षत्रे सरस्वती स्थापनमुक्तं देवीपुराणे—

---

1. दंकु-ख 2. न्नपरिसंख्या—क; न्नान्तरसंख्या परिक्रि-ख. 3. र्घ्यं-ख.
a. From 'पूर्वविद्धा' to बृहत्कल्पादिः- omitted in Ms. घ. b This sentence is omitted Ms. ख. 4. त्वे वा अत-क, ख.

मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनम् ।
उत्तरासु बलिं दद्यात् श्रवणेन विसर्जयेत् ॥

इति । रुद्रयामले—

मूले ऋक्षे सुराधीश! पूजनीया सरस्वती ।
पूजयेत् प्रत्यहं देवीं यावद्वैष्णवमृक्षकम्[1] ।

नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन ।
पुस्तके स्थापिते देव! विद्याकामो द्विजोत्तमः ॥

इति । षष्ठ्यादिपक्षोऽप्युक्तः कालीपुराणे[2]—

बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च ।
सप्तम्यां विल्वशाखां[3] तामाहृत्य प्रतिपूजयेत् ॥

पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥

प्रभूतबलिदानं च नवम्यां विधिवच्चरेत् ।
ध्यायेद्दशभुजां देवीं दुर्गां[4] मन्त्रेण पूजयेत् ॥

[a] विसर्जनं दशम्यां तु कुर्याद्वै शाबरोत्सवैः ।
धूलिकर्दमनिक्षेपैः क्रीडाकौतुकमंगलैः ॥

भगलिंगाभिधानैश्च भगलिंगप्रगीतकैः ।

[5] इति । देवीपुराणे—

---

1. व!—क, ख, ग. 2. लिकापु—ग, घ. 3. शाखायां तामाहृत्य प्रपू—ख, ग. 4. गौम—ख, घ. a. This stenz is omitted in Ms. ग. 5. omitted in Ms. ग.

ज्येष्ठनक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणम् ।[1]
सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ॥

पूर्वषाढयुताष्टम्यां पूजाहोमाद्युपोषणम् ।
उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवाम् ॥

श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेत् ।

इति । अत्र च तत्तत्तिथीनां[2] तत्तन्नक्षत्रयोगः शुभफलातिशयार्थो, न तु स एवादरणीयः । तदुक्तं लैंगे–

मूलाभावेऽपि[3] सप्तम्यां केवलायां प्रवेशयेत् ।
तथा तिथ्यन्तरेष्वेवमृक्षे वृत्ते फलोच्चयः ॥

देवलः—

तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम् ।
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि ॥

इति । सप्तम्यादिपक्षो भविष्ये–

व्रती प्रपूजयेद्देवीं सप्तम्यादिदिनत्रये । इति ।

भविष्योत्तरेऽपि—

त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रमम् । इति ।
अष्टमीनवम्योरेव वा पूजनं कर्तव्यम् ।

अष्टम्यां च नवम्यां च जन्ममोक्षप्रदां शिवाम् ।
पूजयित्वाश्विने मासि विशोको जायते नरः ॥

---

1. यां-क, घ. 2. तत्तिथीनां तन्नक्षत्रयोगसंभवे फला-ग. 3. वे तु-घ.

इति वचनात् । केवलाष्टमीपूजोक्ता ब्राह्मे—

तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥

अत्यर्थं पूजनीया सा तस्मिन्नहनि मानवैः ।
उपोषितैर्धूपदीपवस्त्रैर्माल्यानुलेपनैः ॥

इति । अयं च केवलाष्टम्युपवासः पुत्रवतो निषिद्धः ।

उपवासं महाष्टम्यां पुत्रवान् न समाचरेत् ।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत्[1] ॥

इति कालिकापुराणात् । केलनवमीपूजा भविष्ये—

लब्धाभिषेका वरदा शुक्ले चाश्वयुजस्य च ।
तस्मात् सा तत्र संपूज्या नवम्यां चण्डिका बुधैः ॥

इति । उपवासोऽप्यस्यामुक्तः—

तस्मादियं महापुण्या नवमी पापनाशिनी ।
उपोष्या तु प्रयत्नेन सततं सर्वपार्थिवैः ॥

इति । पत्रिकापूजायामाश्विन[2]कृष्णनवम्यां बोधनासामर्थ्ये नवरात्रान्तर्गताषष्टम्यां तत्कर्तव्यम्, "षष्ठ्यां बिल्वतरौ बोधं सायंसन्ध्यासु कारयेत्" इति भविष्यवचनात् । अत एव षष्ठी सायंसन्ध्याव्यापिनी ग्राह्या । आमन्त्रणं तु [3]पत्रीप्रवेशाव्यवहितपूर्वदिने कुर्यात्—

1. विसर्जयेत्—ग, घ. 2. मश्वयुक्कृ—घ. 3. व्रती प्र—क.

व्रती प्रवेशात् पूर्वेद्युः सायाह्ने बिल्ववासिनीम्[1] ।
चण्डीमामन्त्रयेद्विद्वान् नात्र षष्ठीपुरस्क्रिया: ।।

इति[2] । मत्स्यसूक्ते–

ज्येष्ठा वाप्यथवा षष्ठी सायंकाले[3] न चेद् भवेत् ।
सायमेव तथापि स्याद्बिल्वशाखाभिमन्त्रणम् ।।

पूर्वां षष्ठीं सनक्षत्रां सायं प्राप्तामपि त्यजेत् ।
यदा तु पत्रिकापूजा न परेद्युर्भविष्यति ।।

सन्निकृष्टं तु यत् पूर्वं पत्रिकादिवसस्य तु ।
तद्दिने वरणं कृत्वा परे शाखां प्रवेशयेत् ।।

इति । पत्रिकापूजायां[4] प्रातःकालीनमुत्तरोत्तरतिथिविद्धमेव[5] ग्राह्यम् ।

भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः ।
तिथावुदयगामिन्यां सर्वास्ताः कारयेद् बुधः ।।

इति नन्दिकेश्वरपुराणात् । अष्टमी तु पत्रिकापूजातिरिक्तेऽपि[6] देवीपूजने च नवमीविद्धैव ग्राह्या, "वसुरन्ध्रयो"रिति युग्मवाक्यात् ।

शरन्महाष्टमी पूज्या नवमीसंयुता सदा ।
सप्तमीसंयुता नित्यं शोकसन्तापकारिणी ।।

सप्तमीशल्यसंयुक्तां मोहादज्ञानतोऽपि च[7] ।
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते ।।

---

1. शायिनीम्-ग. 2. इति तत्स्वरूपोक्तेः–ख. 3. सायाह्ने यदि चेद्भवेत्–क.
4. याः- ख. 5. नम् न तूत्त–क. 6. पत्नीपू-ख, ग. 7. वा-ग.

इति मदनरत्नधृतस्मृतिसंग्रहा[1]च्च । स्मृतिसमुच्चये–

सप्तमी शल्यसंविद्धा वर्जनीया सदाष्टमी ।
स्तोकापि सा तिथिः पुण्या यस्यां सूर्योदयो भवेत् ।।

दुर्गोत्सवे-

[2]मूलेनापि हि संयुक्ता सदा त्याज्याष्टमी बुधैः ।
लेशमात्रेण [3]सप्तम्या अपि स्याद्यदि दूषिता ।।

अत एव गौरीतृतीयावदेकाष्टम्या अल्पसप्तमीयोगेन त्याज्यत्वम् । अल्पाया अप्युत्तरस्या अष्टम्याः ग्राह्यत्वं द्रष्टव्यम् । यदा तु परदिने नवमी सूर्योदयं न स्पृशति तदाष्टमी सप्तमीविद्धैव ग्राह्या ।

यदा सूर्योदये न स्यान्नवमी चापरेऽहनि
तदाष्टमीं प्रकुर्वीत [a]सप्तम्या सहितामपि ।।

इति [4]स्मृतिसंग्रहात् । तथा च,

अहं भद्रा च भद्रा च नावयोरन्तरं क्वचित् ।
तस्माद्वै सप्तमीविद्धा कार्या दुर्गाष्टमी तिथिः ।।

इत्यादिवचनान्येतद्विषयाण्येव । इयं भौमेऽतिप्रशस्ता,

अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ।
कुजवारो भवेत्तत्र पूजनीया प्रयत्नतः ।।

---

1. संग्रहे–ख. 2. मूलर्क्षेणापि संयु- ख. 3. म्यां यद्या स्या–घ. a. From 'सप्तम्या' to 'फडिति मूलार्कैः (Page 135) omitted in Ms. ग. 4. ग्रहे–ख

इति मदनरत्नधृतवचनात् । अत्र विशेषेण पूजा कार्या ।

पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद् बलिदानं महानिशि ॥

इति कालिकापुराणात् । [a] बलिदानप्रकारस्तु देवीपुराणे—

कन्यासंस्थे रवौ शुक्रशुक्लाष्टम्यां प्रपूज्य तु ।
द्रोणपुष्पैश्च विल्वाम्रजातीपुंनागचम्पकैः ॥

पश्चादं लक्षणोपेतं गन्धपुष्पसमन्वितम् ।
विधिवत् कालि कालीति जप्त्वा खड्गेन घातयेत् ॥

स च मन्त्रः-'ॐ कालिका यज्ञेश्वरी लोहदण्डायै नमः' इति ।

तदुत्थं[1] रुधिरं मांसं गृहीत्वा पूतनादिषु ।
नैऋतेभ्यः प्रदातव्यं महाकौशिकमन्त्रितम्[2] ॥

मन्त्रो वक्ष्यते, कालिकापुराणे—

उत्तराभिमुखो भूत्वा बलिं पूर्वमुखं तथा ।
निरीक्ष्य साधकः पश्चादिमं मन्त्रमुदीरयेत् ॥

---

a. Portion from "बलिदानप्रकार" to 'सर्वत्रैवं विधिः स्मृतः [Page 135]-is omitted in Ms. च. But the following lines are found there:-

तथा, पशुघातः प्रकर्तव्यो गवलाश्ववधस्तथा । तथा,

देवीं तु पूजयित्वा ये अर्धरात्रेऽष्टमीषु च ।
घातयन्ति पशून् भक्तया ते भवन्ति महाबलाः ॥
बलिं च ये प्रयच्छन्ति सर्वभूतविनाशनम् ।
तेषां तु तुष्यते देवी यावत्कल्पं तु शाङ्करम् ॥

इति ।

1. त्थ-क. 2. ते-क.

पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥

चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम् ।
चामुण्डाबलिरूपाय बले! तुभ्यं नमोस्तु ते ॥

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा ।
अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥

'ऐं ह्रीं श्री'मिति मन्त्रेण तं बलिं मत्स्यरूपिणम् ।
चिन्तयित्वा न्यसेत् पुष्पं मूर्ध्नि चैतस्य[1] भैरवः ॥

अभिषिच्य बलिं पश्चात् करवालं च[1] पूजयेत् ।
रसना त्वं चण्डिकायाः सुरलोकप्रसाधिका ॥

ह्रीं ह्रीं खड्गेति मन्त्रेण ध्यात्वा खड्गं तु पूजयेत् ।
पूजयित्वा ततः खड्गं ॐ ह्रीं फाडिति मन्त्रकैः ॥

गृहीत्वा विमलं खड्गं छेदयेद् बलिमुत्तमम् ।
ॐ ह्रीं ऐं ह्रीं कौशिकीति मन्त्रेणाप्यायतामिति ॥

स्थाने नियोजयेद्रक्तं शिरश्च सप्रदीपकम् ।
एवं दत्त्वा बलिं पूर्णं फलं प्राप्नोति साधकः ॥

बलिदाने तु दुर्गायाः सर्वत्रैवं विधिः स्मृतः ॥

इति । इदं च बलिदानं अग्नीषोमीयपशुहिंसान्यायेन धर्म्यमपि क्षत्रियादि-विषयमेव । ब्राह्मणस्य तु,

---

1. तु—ख.

"सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः" इतीयमेव पूजा भवति। तस्य सात्त्विककर्मस्वेवाधिकारस्य भगवद्गीतादिषु प्रसिद्धत्वात्। स्पष्टमुक्तं राजकर्तृत्वं[1] देवीपुराणे–

तदर्धयामिनीशेषे विजयार्थं नृपोत्तम!।
पश्चादं लक्षणोपेतं गन्धधूपस्रगर्चितम्॥

विधिवत् कालि कालीति जप्त्वा खड्गेन घातयेत्।

एवं[a] सुरया स्वगात्ररुधिरेण च पूजा ब्राह्मणस्य न भवति।

स्वगात्ररुधिरं दत्वा ब्रह्महत्यामवाप्नुयात्।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते॥

इति कालिकापुराणात्। माषभक्तादिना तु ब्राह्मणस्य बलिदानं भवति।

माषकुल्माषमांसाद्यैर्देयो दिक्षु बलिर्निशि।
एते बलिसमा ज्ञेयास्तृप्तौ छागसमाः स्मृताः॥

इति कालिकापुराणात्।

एतेष्वपि[2] ब्राह्मणस्य मद्यमांसव्यतिरिक्तत्वमेव भवति,

राजसी बलिदानाद्यैर्नैवेद्यैः सामिषैस्तथा– इति मांसबलिदानादेः राजसत्वाभिधानात्। रुद्रयामले।

छागाभावे तु कूष्माण्डं श्रीफलं वा मनोहरम्।
वस्त्रसंवेष्टितं कृत्वा छेदयेच्छुरिकादिना॥

इति। होमस्तु,

1. तृंकत्वं-क. a. This line is omitted in Ms. घ. 2. क्तेषु भ–घ.

श्री

धातुरत्नावली

श्रीनारायणभट्टशिष्यकृता

श्रीनारायणमिश्रश्रीगुरुचरणारविन्दयुगलमहम् ।
निःशेषविबुधपटलीसंश्रयितं शश्वदाश्रये मनसा ॥१॥

वृकोदराद्यैरुदितेष्वनेक-
दिशाश्रिता ये खलु धातुसङ्घाः ।
गुरूक्तितस्तानखिलाननुदाहृ-*
त्यारोपितप्रायमिह प्रथामः ॥२॥

Ms. utilised for this publication--1038. G.
Abbreviations:-

1 क— कविकल्पद्रुमः
2 क्षी— क्षीरतरङ्गिणी
3 धा. का—धातुकाव्यम्
4 प्र— प्रक्रियासर्वस्वम्
5 प्र-क- प्रक्रियासर्वस्वे कल्पद्रुमेऽधिका धातवः
6 मा—माधवीयधातुवृत्तिः

---

* बाहुल्येनोदाहृतिषु उदाहरणेषु आरोपितं यथा स्यात् तथेति भावः ।

$

पदमिह ञितां णिचामप्येकं द्वे वा यथार्हमितरेषाम् ।
कथयामि लुगादेर्लावित्याद्यप्यनुसरन् दैवम् ॥३॥

भू सत्ताजननादिषु भवति विपाचनविमिश्रणविचिन्तासु ।
चौ भावयतीत्यथ णौ प्राप्तौ तङि भावयेत भवते भवति ॥४॥

वेदे जनिस्तुतिकुसुमं गतौ,
गत्यामगात शपि शब्दगतस्य गायेत् ।
ज्यानौ जिनाति नियमोपनयव्रतादे-
शेषु ज्यवेत लुङि शप्यमाव्यविम: क्लि ॥५॥

जानातीत्यवबोधने श्नि पुनरस्माण्णौ पुकि ज्ञापयेत्
प्रेक्षायां च निशातनश्रवणयो: सन्तोषणे मारणे ।

---

४ भू सत्तायाम् । I. प. 'सत्तायामित्यर्थोक्तिरुपलक्षणम् । पुत्रो भवतीति जनने । भवत्यसावित्यैश्वर्यप्राप्तौ । भवतु शत्रुरस्तीति भूतिलिप्सायाम्' । प्र. भुवोऽवकल्कने X. आ 'अस्यावकल्कने णिच् स्यात् । तच्च मिश्रीकरणम् । अन्ये तु चिन्तने विपाचनेऽवकल्कने चेत्याहुः' । प्र. 'भुवावो प्राप्त्यर्थः प्र. 'भूधातुः प्राप्त्यर्थे वा णिजन्तः । णिजणिचोः आत्मनेपदी च स्यात् । अणिचि आत्मनेपदं नेत्येके' । धातुकाव्यव्याख्या । एतदनुसारेण प्रयोगः— 'आमन्दवनिता बभूवुः धा, का. ३. ५२.

५ गा स्तुतौ III प. छान्दसः । 'गा स्तुतौ । जन्मनि च द्रुमे' प्र. 'गा लि स्तुतौ जन्मनि' क. ४१. गाङ गतौ I. आ गै शब्दे I. प. ज्या वयोहानौ IX. प. ज्यानिर्वयोहानिः । 'ज्युङ उपनयननियमव्रतोपदेशेषु । ज्यवते माणवको मुनिर्ब्रह्मचारी च' । प्र. क. अयं गत्यामेव मुद्रिते द्रुमे । 'च्युङ् ज्युङ् जुङ गत्यां' क. ५८.

$ ञितां सर्वेषां णिचां केषाञ्चिच्चोभयपदित्वात् तदुदाहरणान्यत्र क्वचित् परस्मैपदरूपं क्वचिदात्मनेपदरूपम् ।

मित्वेन ज्ञपयेन्नियोगवचनादाज्ञापयेतेति चौ
ज्ञानज्ञापनयोर्ज्ञपेज् ज्ञपयते वा मित्वतो ज्ञपयेत् ॥६॥

शपि दाने यच्छति लुकि सवर्णेच्छ्वाद् [illegible] ।
दत्ते, दाने [illegible] दायति शपि, [illegible] श्ये ॥७॥

द्रो लुकि पलायनेऽद्रात् स्वप्ने न्यद्रादिहैव निद्रायेत् ।
धारणपोषणदानेष्वदधाद् [illegible] चूषणे धयति ॥८॥

पा पाने पिबतीत्यस्य पा रक्षायामपाल्लुकि ।
शोषणार्थस्य [illegible] पायत्याद्यान्तिमी शपि ॥९॥

---

